ऐसे वर्णनों में कवि लोकदर्शन से प्रभावित हुआ है। यद्यपि इस काव्य का मुख्य रस शान्त है, परन्तु शृङ्गार, वात्सल्य आदि मन को रंजित करने वाले रसों से उसे पुष्ट किया गया है। 'जयन्तविजय' काव्य का उद्देश्य धर्म-प्रचार होने पर भी उसका कथानक शान्तरस-पर्यवसायी नहीं है[1]। पद्मानन्द-महाकाव्य में आदिजिन (ऋषभदेव) के चरित का वर्णन है। इसमें ऋषभदेव के पूर्वभवों के वर्णन में शृंगारिकता देखी जा सकती है। 'मुनिसुव्रत' महाकाव्य के प्रारंभ में मगध, राजगृह, राजा सुमित्र और रानी पद्मावती का वर्णन है। 'नलायनम्' महाकाव्य में जैन-परम्परानुमोदित नलदमयन्ती की कथा वर्णित है। 'शान्तिनाथ-चरित' में युद्ध और प्रेम के प्रसग भरे पड़े हैं। पौराणिक महाकाव्यों में भी कवियों का दृष्टिकोण अन्य महाकाव्यों के समान ही रहा है। इन सभी काव्यों में पाठक को लौकिकता में अलौकिकता का, राग के माध्यम से विराग का, शृंगाररस के माध्यम से शान्त का, आसक्ति में अनासक्ति का और प्रवृत्ति के साथ निवृत्ति का विकास देखने को मिलता है।

जहाँ पर कवि को अवसर मिला, उसने कालिदास की तरह लौकिक प्रेम का वर्णन करते हुए, मन को स्थिरता प्रदान करते हुए उसमें प्रेम के उदात्तीकृत रूप को विकसित होते हुए दिखाया। जहाँ ऐसा अवसर नही मिला वहाँ उसने अपने आदर्श चरित-नायक या नायिका के पूर्वभव का आधार लेकर लौकिक प्रेम आदि के वर्णन का अवसर निकाल लिया। धर्म के गम्भीर तत्त्व का विवेचन ऐसे वातावरण का निर्माण करके किया और एक सीमा तक धार्मिक उपदेश देने की प्रवृत्ति को काव्य का सुन्दर आवरण पहनाने की किसी ने सफल और किसी ने असफल चेष्टा की। धर्म का विवेचन करते समय अप्रस्तुत के रूप में लोकजीवन के रसात्मक क्षणों को लाकर इस दिशा में महत्त्वपूर्ण कार्य किया।

प्रस्तुत महाकाव्य के कथानक को देखने से यह बात भली भांति प्रकट हो जाती है कि इस काव्य की रचना में भी कवि ने अपने पूर्ववर्ती व समकालीन कवियों का अनुकरण किया है।

---

१. डॉ० श्यामशंकर दीक्षित—तेरहवीं चौदहवीं शताब्दी के जैन महाकाव्य, पृ० ३०५।

जिनपालोपाध्याय ने इस महाकाव्य में शृंगार के लौकिक पक्ष को स्थान देने के लिये सनत्कुमार के पूर्वभवों का आधार लिया है। शृगार का स्थायीभाव रति है। जन्म लेते ही बालक का भूमि से सम्पर्क हो जाता है। इसलिये गर्भ में धारण करने वाली माता और भूमि रति के सर्वप्रथम आलम्बन हैं। 'जननी जन्मभूमिश्च स्वर्गादपि गरीयसी' का उद्घोष इसी मनोवैज्ञानिक तथ्य की ओर संकेत करता है। जिनपालोपाध्याय ने सर्वप्रथम काव्य-जननी भारती का वन्दन किया। तदुपरान्त भावभीने स्वर मे जम्बूद्वीप में जाह्नवी और सिन्धु से सिंचित भारतभूमि का यशोगान किया है। आगे काव्य के प्रथमांश की आधार-भूमि कांचनपुर की शोभा का वर्णन है। नगर का उत्कट शृगारिक वर्णन सोद्देश्य हुआ है। राजा विक्रमयशा ५०० सुन्दर पत्नियों में रमण करता हुआ भी नागदत्त श्रेष्ठी की सुन्दरी पत्नी विष्णुश्री की ओर आकृष्ट होता है। विष्णुश्री के अप्रतिम सौन्दर्य का वर्णन उद्दीपन विभाव का उत्कृष्ट उदाहरण है। कवि विष्णुश्री के विषय मे कहता है—

> रम्भा किमेषा त्रिदिवावतीर्णा, किं वा रतिः प्रोज्झितभर्तृसगा।
> लक्ष्मीरुताहो! हरिविप्रयुक्ता, शम्भो सकोपा किमु पार्वती वा[1]।

उसके सौन्दर्य से अभिभूत विक्रमयशा सोचता है—

> इमां विना तु क्षणमप्यलं न, प्राणानवस्थापयितुं स्मरार्त्तः।
> ग्रीष्मोष्मसन्तप्तशिलातलस्थः, सरश्च्युतो मत्स्य इवातिदीनः[2] ॥

इसी प्रसंग में 'यथा तथाऽऽत्मा परिरक्षणीयः'[3] विचारसूत्र आया है जो लोकधर्म का आधार है। यही सोच कर वह विष्णुश्री का हरण करवा लेता है। वासना विवेक को अवरुद्ध कर देती है। विवेकहीन राजा राज्य और पारिवारिक जीवन को तिलाञ्जलि देकर विष्णुश्री में आसक्त हो जाता है। रानियां अपने दौर्भाग्य की कारणभूता विष्णुश्री को मरवा देती हैं और श्मसान में विष्णुश्री के शव को देखकर वियोगसन्तप्त राजा को विरक्ति हो जाती है। आगे वह सन्मार्ग का पथिक होकर कठोर तप द्वारा अपने जीवन को सार्थक बनाता है और स्वर्गलोक मे यशस्वी होता है।

---

१. सनत्कुमारचक्रिचरितम्, १–७०।
२. वही, १–८२।
३. वही, १–८६।

सनत्कुमार के जीवन-चरित की पृष्ठभूमि पूर्वभव के रूप में उपस्थित करके कवि ने प्रवृत्ति और निवृत्ति में समन्वय स्थापित करने की चेष्टा की है। विक्रमयशा के जिनधर्म-नामक दूसरे जन्म का उल्लेख भी इस महाकाव्य में हुआ है जिसमें विरही नागदत्त अग्निशर्मा के नाम से जिनधर्म से पूर्वजन्म का बदला लेता है।

इसके पहले नागदत्त भ्रमरयोनि में जीवन धारण कर चुका था। प्राचीन साहित्य में भ्रमर मन की चंचल प्रवृत्तियों का प्रतीक रहा है और इस प्रकार साधना के मार्ग में साधक की उल्लसित चेतना के प्रतिद्वन्द्वी के रूप में वर्णित किया जाता रहा है। सांस्कृतिक कवि कालिदास ने कण्वाश्रम में शकुन्तला के ऊपर मँडराने वाले भ्रमर की प्रतीक-योजना द्वारा काम-संयम की ओर संकेत किया है। लोकगीतों में भ्रमर के अभिधान प्रिय को बुलाने की बात बहुधा आती है[1]। वहाँ प्रिय को सौन्दर्यलिप्सु के रूप मे ही स्वीकार किया गया है। प्रस्तुत चरित में भी सनत्कुमार के पूर्वभव के प्रतिद्वन्द्वी भ्रमर की योजना प्रतीकात्मक है और उसके माध्यम से चंचल मनोवृत्तियों के क्रमशः अपनयन और प्रज्ञोपलब्धि की ओर संकेत किया गया है।

साधक जिनधर्म तप करके शक्र-पद प्राप्त कर लेता है। नागदत्त उसका वाहन ऐरावत गज बनता है। वहाँ से च्युत होकर वह प्रकोपन-नामक देव बनता है और शक्र के रूप में आयु पूर्ण हो जाने पर जिनधर्म कुरुजांगल प्रदेश में हस्तिनापुर में अश्वसेन के राजकुमार के रूप में उत्पन्न होता है। यही राजकुमार सनत्कुमार चक्रवर्ती के रूप में विख्यात होता है।

सनत्कुमार असिताक्ष-नामक यक्ष को पराजित करके भानुवेग विद्याधर-राज की आठ पुत्रियों से विवाह करता है। यक्ष ऋतुकर्म की प्रेरणा देने वाले मन की संज्ञा है। यहाँ संकेत है कि सनत्कुमार यक्ष-मन की तामसी (असित) शक्ति को जीत कर सात्विक आठ शक्तियों को प्राप्त करता है। समय पाकर असिताक्ष फिर सनत्कुमार को जंगल में छोड़ देता है। वहाँ वह विद्युद्वेग को मार कर सुनदा का वरण करता है। विद्युद्वेग मन की राजसी वृत्ति का नाम ज्ञात होता है, जिसे समाप्त करके सनत्कुमार सुनन्दा (आह्लादिनी शक्ति) पत्नी रूप में और प्रज्ञप्ति (प्रज्ञा) को प्राप्त कर लेता है।

सनत्कुमार विद्युद्वेग के पिता अशनिवेग को पराजित करके उसकी पुत्री

---

१. यथा—'भँवर म्हारा बागां में आज्यो जी'—राजस्थानी लोकगीत की पंक्ति।

बकुलमती का पाणिग्रहण भी कर लेता है। अंत में वह दिग्विजय करके चक्रवर्ती बनता है और रोग एवं जरा से ग्रस्त शरीर होने पर वैराग्य और तप द्वारा जीवन को सार्थक करके स्वर्गलोक को प्राप्त होता है। ऐसा ज्ञात होता है कि सनत्कुमार के जीवन की सभी घटनाये उसकी अध्यात्म साधना की ओर संकेत करती हैं।

डॉ वासुदेवशरण अग्रवाल ने कहा है कि सुन्दर फूल को देख कर उस फूल को धारण करने वाले वृक्ष का स्वरूप जानने का प्रयत्न करना चाहिए। इसी तरह कला, शिल्प, काव्य आदि मे सुन्दर कृति को देख कर भारत की संस्कृति के अश्वत्थ-वृक्ष को खोजना चाहिए। सनत्कुमारचक्रिचरितम् भारतीय संस्कृति को समझने की एक विशिष्ट दृष्टि जगाने का काम करता है। जैन-कथा-साहित्य मे सनत्कुमार चक्रवर्ती के चरित का वर्णन मिलता है, परन्तु ज्ञानलोक मे प्रवेश करने के लिए नवीन खिड़की खोलने का काम यह महाकाव्य करता है, जैन पुराण नही। कारण स्पष्ट है—महाकवि जिनपाल की प्रतिभा का ही यह चमत्कार है।

इस काव्य मे निवृत्ति-मार्ग की निःश्रेयस-परकता का प्रतिपादन किया गया है। भारतीय संस्कृति का आधार धर्म अथवा आचार है और जीवन का परम उद्देश्य निःश्रेयस है। अर्थ और काम का सस्कार ही धर्म औ निःश्रेयस मे प्रतिफलित होता है। भारत के संस्कृति-वैभव के प्रतीक सभी काव्यों में अर्थ और काम का क्रमिक संस्कार ही प्रतिपादित किया गया है। काव्य के माध्यम से आचार का प्रतिपादन करने का उद्देश्य लेकर चलने वाले अश्वघोष आदि बौद्ध और हरिश्चन्द्र, जिनपाल आदि जैन महाकवियों को भी भारत की यही सांस्कृतिक दृष्टि मिली है। जिनपालोपाध्याय ने अपने प्रस्तुत महाकाव्य में इस सांस्कृतिक उत्तरदायित्व का निर्वाह बड़ी ही सफलतापूर्वक किया है।

धर्म और दर्शन

जिनपालोपाध्याय ने इस काव्य की रचना ही धर्मसिद्धि के लिए की है। इसीलिए उसमें सदाचार के प्रति आग्रह, असामाजिक आचरण की निन्दा, विधि-मार्ग[1] प्रतिपादित आचार के लिए प्रेरणा और जीवन के प्रति निःश्रेयसी दृष्टि

---

१. सनत्कुमारचक्रिचरितम्, ५।५१। जिनवल्लभसूरि प्रतिपादित विधिमार्ग खरतरगच्छ का ही पर्याय है।

के समन्वित रूप का समावेश हो जाना स्वाभाविक ही है। धर्म, अर्थ, काम और मोक्ष जीवन के चार पुरुषार्थ स्वीकार किए गए हैं। इनमें धर्म मोक्ष की आधार भूमि है जिसका निर्माण अर्थ और काम के यथोचित प्रयोग से होता है। अर्थ का सञ्चय, रक्षण और व्यय जीवन को अन्यथाकर्त्तव्यता में व्यस्त बनाये रखता है। इन सब के मूल में कामवृत्ति निहित है। ये दोनों धर्म से अविरुद्ध होने पर निःश्रेयस्-परकता धारण कर लेते हैं। इस महाकाव्य में अर्थ और काम को निःश्रेयस्-परक बनाने के लिये सांकेतिक रूप से प्रेरणा दी गई है।

कामुकता को धिक्कारते हुए[1] जिनपाल ने असंयत काम को निन्द्य ठहराया है। कवि का विश्वास है कि पापात्मा के उग्र पाप उसे तत्काल पतन के मार्ग पर ढकेल देते हैं[2] और धर्म के मार्ग पर चलने से जीवन सफल होता है[3]। कवि सुन्दरता के माध्यम से सत्य को जीवन में प्रतिष्ठित करना चाहता है, इसलिए वह विक्रमयशा को सन्मार्ग में दीक्षित करने के लिये सुव्रतसूरि (गुणाढ्य) द्वारा बृहत्कथा सुनाने की बात कहता है[4]। कथा के माध्यम से ही सुव्रतसूरि कहते हैं कि मनुष्य जन्म पाकर विवेकी को विधि धर्म-मार्ग का अवलम्बन लेना चाहिए। वीतराग-अर्हत् की विधि पूर्वक अर्चना करनी चाहिए। कल्याण की कामना करने वालों (शिवमीहमानैः) को सम्यक् ज्ञान, सम्यक् दर्शन, सम्यक चारित्र्य आदि का सेवन करना चाहिए[5]। उत्तम दृष्टिपूर्वक भयंकर भोगों के पापास्रव से पलायन करना चाहिए[6]। विषय विष के समान हैं। ऊपर से वे रमणीय प्रतीत होते हैं, परन्तु वस्तुतः दुःखदायी प्रमाणित होते हैं। साधना किये बिना मुक्तिश्री की सिद्धि नहीं होती[7]। इन्द्रियों के विषयों से विराम ले लेने पर विशुद्ध भावों के अमृत से सिंची हुई अनुभूति प्राप्त होती है।

विक्रमयशा आचार्य के उपदेशानुसार वैराग्यवासित होकर, जिनेन्द्रगृह में विधिप्रपूर्ण अष्टाह्निका अर्चना कर दीक्षा ग्रहण करता है[8]।

---

१. सनत्कुमारचक्रिचरितमहाकाव्यम्, २-६।
२. वही, १-१७।
३. वही, १-६२।
४. वही, १-६१।
५. वही, १-६२-६४।
६. वही, १-६५।
७. वही, १-७१।
८. वही, १-७७।

जिनधर्म की धार्मिकता और उसके धर्मकृत्यों के अंकन में कवि ने उपासकों के आचार का विशदता के साथ चित्रण किया है[१]। जिनधर्म मार्गानुसारी[२] गुणों का धारक है, इसने सद्गुरु के पास सम्यक्त्वरत्न[३] स्वीकार कर, अनायतन[४] चैत्यों तथा श्राद्धविधान, होम, पिण्डप्रदान[५] आदि का त्याग कर दिया है। वह द्वादशव्रत-धारक है[६]। षडावश्यक का अनुष्ठानक है[७]। इसने जिनचैत्य का निर्माण कर सिद्धान्त-विधानानुसार आचार्य से प्रतिष्ठा करवाई है[८]। यहाँ जिनपाल ने अनायतन का अर्थात् चैत्यवासि-आचार्यों द्वारा अधिकृत चैत्यों का हेयता का संकेत कर विधिमार्ग-स्वगच्छीय परम्परा की अनुष्ठान-पद्धति की ओर प्रेरणा की है।

जिनधर्म के साथ अग्निशर्मा का व्यवहार नृशंसतापूर्ण है। ऐसा ज्ञात होता है कि इस प्रसंग मे कवि जैनधर्म की प्रशंसा और वैदिक-परम्परा की हीनता की ओर संकेत करना चाहता है; परन्तु काव्यात्मक दृष्टिकोण से यह प्रतीति नितान्त असंगत है। कवि का उद्देश्य अपने कथानायक का चारित्रिक उत्कर्ष प्रकट करना है और ऐसा तभी सम्भव हो सका है जब उसने उसकी सहनशीलता को उसके विरोधी के क्रूर-स्वभाव के साथ आनुपातिक ढंग से प्रस्तुत किया। अग्निशर्मा के स्वभाव में जितनी बदले की भावना, क्रूरता और कठोरता मिलती है, जिनधर्म में उतनी ही अधिक सहनशीलता, सहजता और कोमलता के दर्शन होते हैं। वह अंग-भंग को सहजभाव से स्वीकार कर लेता है और इसके लिए किसी को भी दोष नहीं देता। इसके विपरीत अपना ही दोष स्वीकार करता है—

> न चान्यदोषेण ममैष दाहो, यदन्यथावृत्ति न जातु कर्म।
> बृहस्पतिं न ग्रसते कदाचिद्, विधुन्तुदश्चन्द्रमसा विराद्धः॥[९]

---

१. सनत्कुमारचक्रिचरितमहाकाव्यम्, ४–१६–५५।
२. वही, ४–१८।
३. वही, ४–२०।
४. वही, ४–१६।
५. वही, ४–२३–२४।
६. वही, ४–३०।
७. वही, ४–५३।
८. वही, ४–५०।
९. वही, ५–२१।

इन्हीं भावनाओं से ओतप्रोत होकर जिनधर्म विधिचैत्यों[1] की यथाविधि अर्चना कर, संघ का समादर कर और अर्थीजनों को दान देकर गृह-त्याग कर देता है। सौधर्मेन्द्र के रूप में जिनेश्वरों के पांचों कल्याणकों के समय ऐश्वर्य के साथ वस्त्रादि-महोत्सव भी करता है।[2]

सनत्कुमार चक्रवर्ती भी प्रबुद्ध होने पर राज्य में अभय-घोषणा[3] (अमारी पटह) करवाता है और जिनगृहों में आठ दिनों तक महोत्सवपूर्वक अर्चना करवा कर प्रव्रज्या-ग्रहण करता है।

सनत्कुमार-चक्रिचरितम् में मानव की स्वाभाविक प्रवृत्तियों का यथोचित विवेचन तो हुआ ही है साथ ही उसका उदात्तीकृत रूप भी काव्य का विषय बना है। सतत साधनारत रह कर आत्मसंयम, श्रद्धा और तप द्वारा शिवत्व की ससिद्धि ही इस काव्य का प्राण है।

संस्कृत के महाकवियों में जिनपलोपाध्याय का स्थान

संस्कृत-साहित्य की महाकाव्य-विधा अत्यंत प्रौढ और विकसित है। जितने महाकाव्य मिले हैं उनसे अनुमान किया जा सकता है कि कई अन्य महाकाव्य भी रहे होंगे। आक्रान्ताओं ने कई को नष्ट कर दिया होगा; कई कालक्रम से वैसे ही नष्ट हो गए होंगे। केवल कुछ अतिप्रसिद्ध महाकाव्य ही शेष रह गए हैं प्राप्त महाकाव्यों में 'सनत्कुमारचक्रिचरितम्' का स्थान बहुत ही ऊंचा है। यद्यपि वैदिक, जैन और बौद्ध परम्परा में वर्गीकरण करके महाकाव्यों का अध्ययन करना वैज्ञानिक नहीं है; परन्तु ऐसे वर्गीकरण से एक सीमा बन जाया करती है अध्ययन करने और तुलना करने के लिए।

संस्कृत के प्रमुख महाकाव्यो में रघुवंश, कुमारसम्भव, किरातार्जुनीयम्, शिशुपालवधम् और नैषधीयचरितम् के नामों का उल्लेख प्रमुखतया किया जाता है। यदि धार्मिक और दार्शनिक आग्रह की बात को छोड़ दिया जाय तो यह महाकाव्य उपर्युक्त प्रमुख काव्यों की शृंखला की अगली कड़ी बन सकती है। वैसे विषय व वर्णन की दृष्टि से इस काव्य को क्षेमेन्द्र के पौराणिक इतिवृत्तात्मक काव्य 'दशावतारचरित', बोधिसत्त्वावदानकल्पलता' आदि के समकक्ष

---

१. सनत्कुमारचक्रिचरितमहाकाव्यम्, ५–५१।

२. वही, ६–१७।

३. वही, २४–१।

रखा जा सकता है, अंतर इतना ही है कि कल्पना के चमत्कार की ओर क्षेमेन्द्र की दृष्टि नहीं थी। इस विशेषता में जिनपाल भारवि, माघ और श्रीहर्ष के अनुगामी हैं।

काव्य की रागात्मिका वृत्ति का उपयोग धार्मिक उद्देश्य की सिद्धि के लिए करने वाले कवियों की परम्परा में जिनपालोपाध्याय अश्वघोष, शिवस्वामी (दोनो बौद्ध); रत्नाकर, मंखक (दोनों शैव), धनेश्वरसूरि, वाग्भट (दोनों जैन) के अनुयायी हैं। अश्वघोष कालिदास के 'सुकुमारमार्ग' के सफल महाकवि हैं। उनके 'बुद्धचरित' और 'सौन्दरानन्द' महाकाव्य अपनी प्रसादगर्भित गरिमा में अनुपम हैं। शिवस्वामी के 'कपिफणाभ्युदय' में धर्म के प्रति आग्रह भी है और विचित्रमार्गीय विस्तार के साथ कल्पना-प्रियता के दर्शन भी होते हैं। इनका यह काव्य 'सनत्कुमारचक्रिचरितम्' से तुलनीय है। रत्नाकर का 'हरविजय' अपनी बृहत्कायता के कारण संस्कृत-साहित्य में बेजोड़ है। 'श्रीकण्ठचरित' में मंखक की काव्य-जगत् के प्रति बहुमुखी दृष्टि को देखा जा सकता है तो सनत्कुमार-चक्रिचरितम् घटनाबाहुल्य में इनसे आगे है।

जैन महाकवियों मे जिनपालोपाध्याय का स्थान निश्चय ही महत्त्वपूर्ण है। इनको काव्य की सुपुष्ट परम्परा मिली थी। शब्द-चमत्कार अधमकाव्य के रूप में भले ही स्वीकार किया जाय; परन्तु इसमें कोई संदेह नहीं कि भाषा पर असाधारण अधिकार प्राप्त किये बिना ऐसे चमत्कार की सृष्टि नहीं की जा सकती। इसलिए विचित्रमार्गी कवियों के प्रयत्न को बिना सराहे नहीं रहा जा सकता। जिनपाल ने भी चमत्कार-प्रदर्शन में रुचि दिखाई है। यह युग का प्रभाव तो है ही, साथ ही कवि के भाषा पर असाधारण अधिकार का प्रमाण भी है। हेमचन्द्रसूरि (त्रिषष्टिशलाकापुरुषचरित्र), धनेश्वरसूरि (शत्रुञ्जय-माहात्म्य), वाग्भट (नेमिनिर्वाण), अभयदेव (जयन्तविजय), अमरचन्द्रसूरि (बालभारत) आदि जैन महाकाव्यकार जिनपाल की समानता नही कर पाते। भाषा, भाव और भावप्रकाशन में जिनपाल की तुलना इन्हीं के समकालीन हरिश्चन्द्र से की जा सकती है। उसका 'धर्मशर्माभ्युदय' संस्कृत के जैन महाकाव्यों में माघकाव्य के समान महत्त्वपूर्ण माना जाता है तो जिनपाल का सनत्कुमारचक्रि-चरितम् 'नैषधीयचरितम्' के समान सम्मान पाने का अधिकारी है। जिनपाल की कृति विस्तार मे ही 'धर्मशर्माभ्युदय' से अधिक नहीं है अपितु वह गुणों की दृष्टि से भी आगे है।

जिनपाल पहले से चली आई हुई परम्परा को पुष्ट करने में ही सफल नहीं हुए,

वरन् उन्होंने परवर्ती केशव आदि चमत्कार-प्रेमी कवियों के लिये प्रेरणा का कार्य भी किया है।

इस कृति मे न तो घटना-बहुलता के कारण कहीं शिथिलता आने पाई है, न काव्यगत असंगतियां ही दिखाई पड़ती हैं। प्रस्तुतीकरण में नाटकीयता का समावेश होने के कारण 'सनत्कुमारचक्रिचरितम्' अत्यन्त उच्चकोटि के महाकाव्यों में गणना किये जाने योग्य है।

यह चरित्र-प्रधान काव्य है। सनत्कुमार चक्रवर्ती के चरित्र का विस्तृत चित्रण करने में कवि ने औचित्य का सदैव ध्यान रखा है। घटना-चित्रण में कवि को इतनी सफलता मिली है कि इस महाकाव्य को घटना-प्रधान भी कहा जा सकता है। जैनदर्शन और आचार का चित्रण करने में भी कवि को सफलता मिली है। यह धर्म और मोक्ष की संसिद्धि को लक्ष्य करके लिखा गया है। इनका अर्थ और काम से सन्तुलन बिठाने की ओर कवि ने संकेत उचित ही किया है। एक उच्चकोटि के महाकवि के रूप में जिनपालोपाध्याय चिरस्मरणीय रहेंगे।

प्रति-परिचय

प्रस्तुत महाकाव्य की अद्यावधि एकमात्र हस्तलिखित प्रति प्राप्त होने से संपादन-कार्य में इसी प्रति का उपयोग किया गया है। प्रति की स्थिति इस प्रकार है—

माप—२७+६.५ सी. एम.

पत्र—१८४=२, . अन्तिम दो पत्रों में महाकाव्य के २१ वें सर्ग में प्रयुक्त १५ चित्र-काव्यों का आलेखन है। इन पत्रों पर पत्रांक लगा हुआ नहीं है। प्रत्येक पत्र की द्वितीय पृष्ठि में एक तरफ देवनागरी लिपि के अंक आलेखित हैं और दूसरी तरफ ताडपत्रीय जैन लेखन-परम्परा के अनुसार अक्षरात्मक अंकों का आलेखन है।

पंक्ति—७

अक्षर—४२

आधार—कागज

लिपि—देवनागरी

लेखन—वि. सं. १२७८; लिपिकार ने लेखन-पुष्पिका इस प्रकार दी है-

सम्वत् १२७८ ।। वैशाख वदि ५ लिखितं

दशा—७४७ वर्ष पूर्व कागज पर लिखित होने पर भी इसकी दशा आज भी श्रेष्ठतम कही जा सकती है। केवल प्रथम और अंतिम पत्र सामान्यतया जीर्ण हो रहे हैं और पत्रांक १४६ एव १४७ का कुछ अश कीटकों द्वारा भक्षित है तथा शायद चिपक गए हों और उन्हें अलग करते समय असावधानी के कारण कुछ अक्षर नष्ट हो गए हैं। बिना पत्रांक के अन्तिम दोनों पत्रों मे घर्षण के कारण चित्र-काव्यों के अक्षर अस्पष्ट हो गए हैं साथ ही जहाँ पत्रों के घर्षण के कारण अक्षर धूमिल हो गए थे वहाँ परवर्ती किसी विद्वान् ने दूसरे अक्षर लिख कर उन अक्षरों को पूर्ण तो अवश्य किया है किंतु वे अशुद्ध हैं।

वैशिष्टच—(१) ग्रंथकार जिनपालोपाध्याय के जीवन-काल में ही लिखित होने के कारण इसे आदर्श प्रति की कोटि में रखा जा सकता है।

(२) शुद्धतम एवं संशोधित है। कई स्थानों पर कतिपय अक्षरों को या चरण को ही काट कर पत्र के किनारों पर शुद्ध पाठ लिखा हुआ है।

(३) कहीं-कहीं पर क्लिष्ट-शब्दों के पर्याय भी हाँसियों पर लिखे हुए हैं।

(४) प्रथम सर्ग के पद्य २१, २४ और ५६ में लिपिकार ने पाठान्तरों का प्रयोग भी किया है।

(५) अक्षर बड़े-बड़ और लिपि सुवाच्य है।

प्रस्तुत सम्पादन में जहाँ कही पाठ अशुद्ध प्रतीत हुआ वहाँ मैंने शुद्ध पाठ ऊपर दिया है और टिप्पणियो पाठ देकर 'इति तु पुस्तके' या 'प्रतौ पाठ:' का निर्देश किया है एवं पर्यायों का मैंने सर्वत्र ही पादटिप्पणी के रूप में प्रयोग किया है।

आभार-प्रदर्शन

यह आदर्श प्रति मुझे सौभाग्य से वि. सं. २००९ में प्राप्त हुई थी। इसका महाकाव्यत्व और दुर्लभता के कारण मैंने वि. सं. २०११ में बम्बई के प्रवास में इसकी प्रेस कॉपी तैयार की थी और तभी से मैं इसके प्रकाशन के लिए

प्रयत्न में था। उस समय मेरी यह अभिलाषा पूर्ण न हो सकी। प्रेस कॉपी करने के चौदह वर्ष पश्चात् स्वनामधन्य वेदमूर्ति डॉ. फतहसिंहजी, निदेशक रा. प्रा. वि. प्र. जोधपुर ने इस महाकाव्य को राजस्थान पुरातन ग्रथमाला की सं० १९६८-६९ की योजना में प्रकाशनार्थ ग्रंथों में स्वीकृत कर इसका मुद्रण-कार्य प्रारम्भ करवाया और इस सम्पादन को श्रेष्ठ बनाने के लिए जिस आत्मीयता के साथ समय-समय पर परामर्श एव विर्देश देकर कृतार्थ किया इसके लिए मैं आपका अत्यंत आभारी हूँ और आजन्म ऋणी रहूँगा।

मेरे परम मित्र ही नहीं अपितु अग्रजतुल्य श्री लक्ष्मीनारायणजी गोस्वामी ने जिस निष्ठा के साथ प्रूफ-सशोधन और पाठ-शुद्धि आदि में सहयोग दिया है उसके लिए मैं उनके प्रति हार्दिक कृतज्ञता व्यक्त करता हूं।

साधना प्रेस, जोधपुर के व्यवस्थापक श्री हरिप्रसादजी पारीक भी धन्यवाद के पात्र हैं जिन्होने इसके मुद्रण में पूर्ण सहयोग दिया है।

अन्त में मैं अपने परम पूज्य गुरुदेव खरतरगच्छालङ्कार आचार्यप्रवर स्व० श्रीजिनमणिसागरसूरिजी महाराज का यहाँ पर स्मरण न करना मेरे लिए महान् कृतघ्नता होगी; क्योंकि उन्हीं के आशीर्वाद और कृपा से मैं आज कुछ योग्य बन सका।

म० विनयसागर

खरतरगच्छालङ्कार-युगप्रवरागम-श्रीजिनपतिसूरिशिष्य-

महोपाध्याय-श्रीजिनपालगणि-'शिष्यलेश'-प्रणीतम

सनत्कुमारचक्रिचरितमहाकाव्यम्

प्रथमः सर्गः

।। ॐ नमो जिनपतये ।।

श्रियोऽपि वासात् कमलान्मनोज्ञा-वासाप्तिहृष्टेव यदीयवक्त्रे ।
स्याद्वादभङ्ग्या नरिनर्ति वाणी, नन्द्यात् स देवो जिनपत्यभिख्यः ।।१।।

यस्याङ्गभाभिः ककुभो विभिन्नाः, कश्मीरजालेपरुचिं वहन्ति ।
ज्योत्स्नासनाथास्वपि शर्वरीषु, श्रियं स दत्तां जिनवर्द्धमानः ।।२।।

प्रतापभाजापि सहस्रभासा, न नाशितं यन्निविडं तमस्तत् ।
शुक्लद्युताऽप्यस्तमनायि येन, प्रदोषमोषं स करोतु वीरः ।।३।।

प्रज्ञाप्रकर्षेण समुद्यता स्राक्, भानोरिवाद्योत्यतरुक्चयेन ।
अशेषमाकाशमिवार्थजालं, यस्यास्त्वसौ भद्रकृदिन्द्रभूतिः । ४।।

स्फुरन्महावामनिरस्ततामसो, दोषान्तकृत् सत्पथदीपनादृतः ।
नालीकभक्तिप्रवरः शुभोदयः, श्रीसिद्धसेनो जयताद्दिवाकरः ।।५।।

अन्येऽपि सर्वेऽपि युगप्रधानाः, सितांशुसंवादियशःप्रतानाः ।
जयन्ति नानातिशयैर्जनाना-मत्यद्भुतैः स्मारिततीर्थनाथाः ।।६।।

सितां सदावृत्तमुखश्रियास्तो, निजप्रभाप्राभृतकेन नूनम् ।
उपास्त यां शुभ्ररुचिः कलावान्, सा भारती भूतिभरं तनोतु ।।७।।

विहाय शेषान् सुमनःसमूहान्, गुणाढ्यरागेण रजःसनाथान् ।
समग्रविद्यावदनारविन्द-माध्वीकमन्वासिषताशु येषाम् ।।८।।

दन्तद्युतिप्रस्फुरणानुगामी, कथासु येषां वचनप्रपञ्चः ।
सम्पद्यते मर्त्यमलक्षयाय, मूर्तोऽमलो गाङ्ग इव प्रवाहः ॥६॥

व्यजेषत क्ष्मापसदः समक्षं, प्रावादुका यैः शतशः सदर्पाः ।
तार्क्ष्यैरिवोच्छ्वासितविश्वविश्वाः, शश्वत्परच्छिद्रदृशो भुजङ्गाः ॥१०॥

अनन्यतुल्यानि तपांसि येषां, कलावपि प्रेक्ष्य विवेकिलोकः ।
श्रुतेष्वपि प्राच्यतपोधनेषु, व्यधत्त दृष्टेष्विव सत्यतास्थाम् ॥११॥

यशःप्रमोदोदयसविदां पदं, किमप्यवाप्यक्षरमल्पबुद्धिना ।
मयाऽपि येषां प्रवरप्रसादतः, सुयोगभाजा परमात्मनामिव ॥१२॥

गुरून्निजांस्तान् जिनपत्यभिख्यांस्त्रैलोक्यकीर्त्यातिशयाम्बुराशीन् ।
युगप्रधानत्वयशःसुधांशु - क्षीराम्बुधीनादरतोऽभिवन्दे ॥१३॥

षड्भिः कुलकम् ।

प्रणम्य नम्यानिति विघ्नघातिनः, सन्मङ्गलांस्तान् जगतोप्रमोदिनः ।
प्रवर्धमानाधिकधामसम्पदा, वितीर्णगोमण्डलरागमण्डनान् ॥१४॥

सनत्कुमारस्य कुमारतेजसः, सपत्नकक्षानलशक्तिकत्वतः ।
पुष्यन्महापुण्यकलापिनः शुभं, चरित्रमिन्दुद्युतिसोदरं ब्रुवे ॥१५॥

युग्मम् ।

प्रागेव सिन्धोर्मथनात् प्रजासृजा, संगृह्य लावण्यरसं विनिर्ममे ।
इतीव यस्याङ्गमनङ्गकामिनी-मनःसमाकर्षणयोगतां दधौ ॥१६॥

सुमेरुगर्भादिव यः समुद्धृतः, सद्यः समुत्कीर्ण इवेन्द्रशस्त्रतः ।
सुरासुरास्त्रानतभेद्यविग्रहः, प्रपप्रथे वज्रमयः क्षमातले ॥१७॥

प्रज्ञप्तिमन्त्रास्त्रनभोविहारिता, अन्येऽप्यभूवन्नतिशायिनो गुणाः ।
ते यस्य नो पूर्वभुवोऽपि चक्रिणोऽलञ्चक्रुरत्युच्छ्रततेजसोऽपि यान् ॥१८॥

येनाशु चक्रेण विनापि चाददे, समग्रविद्याधरचक्रवर्तिता ।
सत्त्वोत्कटेनाकटकेन साहसात्, पञ्चाननेनैव मृगाधिराजता ॥१९॥

अनात्मरक्षः समभूत् प्रचण्डो, यक्षोपि साक्षाद् युधि येन रुद्धः ।
किं कृष्णसर्पोपि करोति तत्र, स्याद् यत्र शत्रुर्नकुलः सदर्पः ॥२०॥

त्रैलोक्यजेत्रा स्मरचक्रवर्तिना, श्रितान्यपि स्वान्तधनानि यो हठात् ।
दिवाप्यहार्षीत् सकलानि सुभ्रुवां, सुगुप्तभावान्यपि साहसाम्बुधिः[1] ॥२१॥
तदङ्गनाभ्योऽष्टसहस्रसंगुणाभजन् जिता मर्त्यमृगेक्षणा वधूः ।
योऽपत्रपिष्णोरतिदूरसंस्थितिं, समादिदेशेव हरेस्तपस्विनः ॥२२॥
नाचक्रमुः शुद्धसमाधिमास्थितं, कर्मद्विषद्भूमिपतेर्भटा इव ।
यं कासशोषादिगदापदेशतः, सप्ताद्रिनाथाग्रमितार्कसप्तयः ॥२३॥
प्रायः पृथिव्यां नररत्नखानावपि प्रजज्ञे न यदाकृतीनाम् ।
यद्वा पयोधावपि रत्नयोनौ, रत्नं कियत् कौस्तुभसन्निभं स्यात् ॥

पाठान्तरं वा द्वितीयार्द्धे —

रत्नाकरेष्यम्बुनिधौ कियद्वा, रत्नं प्रतिद्वन्द्वि भवेत् सुधांशोः ॥२४॥
तं सार्वभौमावनिपालकीर्त्ति - लुण्टाकमुट्टोकितसद्गुणाश्वम् ।
के नाम नाकर्णयितुं सकर्णाः, समुत्सहन्ते शतशः कथाभिः ॥२५॥
दशभिःकुलकम्

तस्याद्भुताचारविचारसिन्धो-रन्तश्चरत्सच्चरित बलान्माम् ।
वाचालयत्यम्बुजखण्डकोशं, गर्भे ध्वनद्भृङ्गकुलं यथोच्चैः ॥२६॥
क्व तादृशो सौगुणरत्नराशिः, क्वाज्ञोऽहमेतच्चरितं चिकीर्षुः ।
सुरेशितुः क्ष्मावहनीयमद्रि-मुद्वोढुमुत्कः कुणिरेष नूनम् ॥२७॥
करालपातालतलं विवस्वान्नागाधिराजोपि नभस्तलं चेत् ।
विगाहते मन्मतिरप्रगल्भा, तदाऽस्य वृत्तं गुरुणाप्यगम्यम् ॥२८॥
नवप्रियाप्रेममृधानकध्वनी, उपस्थिते योद्धुरिवाहवागमे ।
स्वजाड्यवर्ण्यस्तुतिपक्षपातिते, द्वैताय बुद्धिर्मम किं करोम्यतः ॥२९॥
तथाप्यवज्ञाय विधीयतेऽज्ञतां, गुणानुरागेण तदीयसंकथा ।
न हि प्रियान्प्रेमत उज्झनं युधो, भवेद् भटस्यापि भटत्वभूषणम् ॥३०॥
छन्दोविशुद्धौ न न संस्कृतोक्तौ, प्रगल्भते वाक्प्रतिभापि नो मे ।
तथापि मामुत्कयति प्रसह्य, स्ववर्णने चक्रिचरित्रमग्र्यम् ॥३१॥

१. केनोपमा यातु स चक्रनायक इत्यपि प्रतौ पाठः ।

सुमेरुनाभिः शशिमण्डलाकृतिर्द्वीपोऽस्ति जम्बू प्रथमः पृथुर्भुवि ।
यो मध्यगो द्वीपगणस्य सर्वतः, प्राकाररूपोच्चजगत्यलंकृतः ॥३२॥

यः सप्तवर्षोप्यमितप्रवर्षो, यो निम्नगालिङ्गनकृत् कुलीनः ।
यो मर्त्यभूरप्यपवर्गभूमिः, किमन्यदाह्वास्ततमन्तरोपम् ॥३३॥

तत्रापि वर्षं पृथु भाति भारतं, यज्जाह्नवी-सिन्धुमहानदीद्वयम् ।
हारश्रियं बिभ्रदुदंशुवेदिका, सन्नायकभ्राजि दधाति सर्वदा ॥३४॥

पुरं पुरा तत्र च काञ्चनाख्यं, यथार्थमासीत् कनकाहितत्वात् ।
यद्वृत्तसालच्छलतो ह्यपाच्याः, कश्मीरजस्थासकतां प्रपेदे ॥३५॥

पयःप्रपूर्णा परिखाऽपि यस्य, द्वीपस्य पाथोधिरिवाभितोऽभूत् ।
प्रफुल्लपङ्केरुहलोलभृङ्ग-स्वनैः कलैः सालमिवोज्जगौ या ॥३६॥

यत्रेन्द्रनीलारुणरत्नकान्ता-संक्रान्तमूर्तिः कपिशीर्षकाली ।
नीलाब्ज-रक्तोत्पलखण्डलीलां, प्रातः प्रपेदे परिखाजलेषु ॥३७॥

रूपेण कामाद्धनदात् समृद्ध्या, बुद्ध्या गुरोर्यत्र गजाद्गतेन ।
न चक्षमुः क्षान्तिभृतोपि लोकाः, पराभवं जातु गुणैः समग्राः ॥३८॥

के राजहंसोज्ज्वलकञ्चुकाढ्याश्चक्रस्तनाः पुष्करिणीर्विलोक्य ।
रामा इवासन् स्मरसायकानां, लक्ष्यं न वृद्धा अपि यत्र पौराः ॥३९॥

अनङ्गलीलाभरभङ्गिभाजो, वपुःश्रिया भूषितरत्नभूषाः ।
पराजयन्ते स्म च यत्र कान्ताः, स्वर्गाङ्गना अङ्गविलासकान्ताः ॥४०॥

यत्रेन्दुकान्तावनिकुट्टिमेषु, ज्योत्स्नावलीढेषु विलासिनीनाम् ।
संक्रान्तलाक्षारसपादमुद्रा, निशास्वदुः कोकनदोऽप्यशङ्काम् ॥४१॥

यत्रावसेदुः पुरुषार्थसिद्धौ, न साधुभक्ता वणिजो जनाश्च ।
पद्माश्च हंसाश्च महासरस्सु, स्ववस्थिताः पुष्टियुजो न किं स्युः ॥४२॥

मनोजयानस्वरशौचचौर्यं, कुर्वन्नजस्रं कलहंसिकानाम् ।
वधूजनः कामनृपाश्रितः सन्, न्यरोधि राज्ञाऽपि न जातु यत्र ॥४३॥

दोर्दण्डविक्रमरिपूद्दलनाप्तकीर्त्ति-
कान्तानितान्तपरिरम्भविनिर्वृतात्मा ।

तस्मिन् स विक्रमयशा नृपतिर्यथार्थ-
नामाऽभवद् भुवि गुणैरुपमातिगो यः ॥४४॥

जितैर्नमद्भिर्नृपतिप्रतानैर्यस्य प्रतापः शिरसा समूहे ।
किरीटकोटीतटपद्मरागच्छलेन नूनं दिननाथदीप्रः ॥४५॥

नागाङ्गनाभिः परिगीयमानं, यशःसितं यस्य समाततान ।
पाताल उद्योतकुतूहलानि, प्रतिक्षणं हृष्टभुजङ्गमानाम् ॥४६॥

यस्यातिसौन्दर्यजितो मनोभूरमोघशस्त्रत्वमहो ! व्यतारीत् ।
नूनं रणेऽभूत् कथमन्यथास्य, द्विषन्न कोप्यप्रहतः शितास्त्रैः ॥४७॥

या निर्जरैः शत्रुविदारटङ्कैः, प्राज्यैर्भटैः सद्गुरुभिश्च कीर्णा ।
तां नूनमास्थानभुवं प्रपन्ने, ह्रियाऽश्रयद् यत्र दिवं महेन्द्रः ॥४८॥

सर्वोपसंहारविरोधभेद-शब्दश्रुतिर्नाटकलक्ष्मशास्त्रैः ।
यत्र प्रजाः शासति चण्डदण्डे, जनेऽभवन्नैव सुखावगाढे ॥४९॥

दूरं समाकृष्टविपक्षलक्ष्मी - सपुष्पकेशग्रहसौरभाढ्यम् ।
यत्पाणिपद्मं मधुपालिशोभां, श्यामायतां खड्गलतां दधार ॥५०॥

यस्यावरोधोऽप्यनिरुद्धमातु-र्वपुःश्रियासूत्रितदास्यदीक्षः ।
तथाप्युपास्यः परमादरेण, शृङ्गारयोनेरनिशं बभूव ॥५१॥

सारं समाकृष्य सुराङ्गनाभ्यः, सङ्ख्यातिगाभ्योऽपि विधिः प्रसन्नः ।
यस्याङ्गना नूनमिहानिनाय, स्वःस्त्रीषु यत् क्वापि न तादृशी श्रीः ॥५२॥

अन्तःपुरं पञ्चशतोप्रमाण - मासोच्चतुःषष्टिकलाऽभिरामम् ।
विनिर्जयत् षोडशभिः कलाभि-र्बिम्बं समग्र शशिनोऽपि यस्य ॥५३॥

दृष्टिर्यदन्तःपुरिकासु कामि-व्रातस्य लोलाऽपि पपात नैव ।
उन्मज्जनाभावभयेन मन्ये, लावण्यलीलामृतकूपिकासु ॥५४॥

विश्वोपभोग्येन यदीयकोशे, नायातु साम्यं कथमत्र कोशः ।
यक्षाधिनेतुः प्रणयैकपात्रं, त्रिलोचनो यस्य सखापि नग्नः ॥५५॥

पुरे दिवीवामरनायकस्य, तत्राधिपत्यं निहतारि यस्य[१] ।
आतन्वतः शासनसारवाचो, भयादिवागान्न कदाप्यनीतिः ॥५६॥

१. चक्रमिति पाठः ।

शक्तित्रयाधिष्ठितविग्रहेण, न विग्रहं कोऽपि ततान तेन ।
मृगाधिपेनोग्रनखाग्रभाजा, स्पर्द्धेत किं मत्तमतङ्गजोऽपि ॥५७॥

अर्थार्जने कर्हि कदापि भोगे-ऽन्यदा तु धर्मेपि समुद्यतस्य ।
न्यायैकनिष्ठस्य सदापि राज्ये, प्रजासु दौस्थ्यं न बभूव तस्य ॥५८॥

सिन्धाविव प्रोज्ज्वलरत्नजालै-र्व्योम्नीव भास्वद्रुचितारकौघैः ।
ऐश्वर्यदासीकृतपक्षराजैः, पौरैश्चिते तत्र पुरे प्रभूतैः ॥५९॥

बभूव भूमीश्वरमानपात्रं, वणिग्वरः केलिगृहं रमायाः ।
रूपप्रतिक्षिप्तमनोभवश्री-र्युवा विलासी किल **नागदत्तः** ॥६०॥

प्रतिष्ठितः सत्यवचाः पुरे यः, प्रियंवदः प्रीणितयाचकौघः ।
सिंहः समग्रव्यसनोग्रकुम्भिष्वलक्ष्यत न्याय इवेह मूर्त्तः ॥६१॥

यश्चारुतारुण्यविकासिलीला-सरोजिनीसन्ततिदीर्घिकायाः ।
सुवर्णचूर्णच्छुरितत्वमुच्चै-र्गौराङ्गकान्तिच्छलतो वहन्त्याः ॥६२॥

सौन्दर्यपीयूषनिधानकुम्भि-कुम्भोन्नमत्पीनपयोधरायाः ।
लीनद्विरेफाङ्कपयोजपत्र-विस्तीर्णसश्रीकविलोचनायाः ॥६३॥

निर्लाञ्छनप्रौढसुधांशुबिम्बा-भिभाविवक्त्राम्बुजमण्डनायाः ।
स्मरोद्भवद्विभ्रमराजधान्या, **विष्णुश्रियः** कान्ततया प्रतीतः ॥६४॥

षड्भिः कुलकम् ।

मित्रोन्मुखे शुद्धगुणावगूढे, लक्ष्मीरुचा साम्बुरुहीव यत्र ।
तथापि तस्यावनतस्य जग्मुर्दिनानि भूयांसि ससम्मदस्य ॥६५॥

अथाऽऽलुलोके नृपतिः कदाचित्, प्राणप्रियां तस्य विविक्तदेशे ।
स्रस्तोत्तरीयप्रकटास्यलक्ष्मी-विडम्बितोत्फुल्लसहस्रपत्राम् ॥६६॥

जृम्भावशोल्लासितबाहुमूलो-पलक्ष्यमाणस्तनकुम्भलक्ष्मीम् ।
श्लथीभवद्बन्धुरनीविबन्ध-व्यक्तस्मरोज्जृम्भकरोमराजिम् ॥६७॥

मोट्टायितेनावनताङ्गलेखां, मुष्टिग्रहार्हातुलमध्यभागाम् ।
ध्रुवं नृपान्तःकरणव्यधायाकृष्टां स्मरेण स्वशरा(रं.)सयष्टिम् ॥६८॥

विशेषकम् ।

निरीक्ष्य तां दृश्यपदार्थसीमां, शृङ्गारयोनेः परमास्त्रमेषः ।
व्यतर्कयद् विस्मयलोलनेत्रस्तदेकधीः प्रस्मृतधर्मशास्त्रः ।।६६।।
रम्भा किमेषा त्रिदिवावतीर्णा, किं वा रतिः प्रोज्झितभर्तृसंगा ।
लक्ष्मीरुताहो ! हरिविप्रयुक्ता, शम्भौ सकोपा किमु पार्वती वा ।।७०।।
अहो मुखं पार्वणचन्द्रकान्तं, चित्राकृतिः कापि कुचस्थलस्य ।
श्रोणिर्विलासायुधकेलिशय्या, राज्यास्तु रोम्णां न हि मूल्यमस्याः ।।७१।।
रम्येष्वपीन्दुप्रभृतिष्वहार्यः, कलङ्कसङ्गः सकलेषु दृष्टः ।
कल्याणसर्वावयवाऽकलङ्का, धात्रेयमेव ध्रुवमत्र सृष्टा ।।७२।।
पीयूषधारारसनिर्विशेषां, यत्र क्षिपेत् कामिनि दृष्टिमेषा ।
कटाक्षितः पुण्यशतैः स एव, क्षुद्रो भुवो भारकरस्तु शेषः ।।७३।।
अदृष्टिना तावदियं न शक्या, धात्रा विधातुं ध्रुवमद्भुतश्रीः ।
दृष्टा तु हातु स्थविरात्मनापि, प्रतीयते तत्त्वमहो न किञ्चित् ।।७४।।
यस्यैतदङ्गामृतभोगभङ्गिः, सम्पद्यते न स्मरतापभाजः ।
नेत्रापि तेन त्रिदिवालयानां, किं काशपुष्पायितजन्मनाऽत्र ।।७५।।
ध्यायन्निदं भूरि तदेकतानः, संस्तम्भितोऽभूत् क्षणमेष कामी ।
अन्तर्मनोजन्ममुदीर्यबाण-श्रेण्या भुवि प्रोत इवातिमात्रम् ।।७६।।
सप्तभिः कुलकम् ।

चैतन्यहारिस्मरनागराज-स्फुरद्विकाराद्गरलादिवैषः ।
मुमूर्च्छ चात्यन्तिकरागमग्ने, विलोकयंस्तन्मयमेव विश्वम् ।।७७।।
पुनः कथञ्चित् परिलब्धचेतनो, गवाक्षसञ्चारितुषारमारुतैः ।
उन्मत्तवद्भ्रूमुखपाणिलोचनं, व्यस्तं निचिक्षेप तदेकमानसः ।।७८।।
अचिन्तयच्चैष कथं नु लभ्या, मया सुपुण्येयमपुण्यभाजा ।
अमर्त्ययोग्या हि सुधा पवित्रा, स्वर्भानुभोग्या न पुरापि जाता ।।७९।।
आकृष्य भर्तुः समुपाददे चेदेतामहं वज्रमनास्तदापि ।
स्वकीर्त्तिहंसी जनवाच्यताख्ये, निमज्जिता कज्जलकुण्डके स्यात् ।।८०।।
अन्यायमार्गे यदि चास्मि वर्ते, न्यस्येत् पथि न्यायमये पदं कः ।
सीमामतिक्रामति चेत्पयोधि-र्वार्त्तापि का शेषसरस्सु तस्याः ।।८१।।

इमां विना तु क्षणमप्यलं न, प्राणानवस्थापयितुं स्मरार्त्तः ।
ग्रीष्मोष्मसन्तप्तशिलातलस्थः, सरश्च्युतो मत्स्य इवातिदीनः ॥८२॥
इदं तदत्यन्तमहो दुरूहं, कार्यं परं ब्रह्म यथाल्पबुद्धेः ।
क्षेपं क्षणार्द्धं क्षमते न कामः, क्षिपन्नविश्राममिषूनसङ्ख्यान् ॥८३॥
व्याघ्रोऽस्ति पृष्ठे पुरतस्तु दुस्तटी, पार्श्वद्वये ज्वालशताकुलः शिखी ।
महाशनिश्चोर्ध्वमधोन्धकूपकः, क्व संकटे मादृश ईदृशि व्रजेत् ॥८४॥
तथाप्यनल्पैर्विहितैर्विकल्पैः, किं मे महोत्साहवतोऽपि पुंसः ।
इष्टस्य कार्यस्य भवेन्न सिद्धिर्युद्धेऽपि यद्भीरुहृदः परेभ्यः ॥८५॥
यथा तथाऽऽत्मा परिरक्षणीय, इत्याह तावन्ननु दण्डनीतिः ।
शास्त्रेऽपि च स्वेतरकार्ययोर्यत्, स्वमेव कार्यं कथितं विधेयम् ॥८६॥
लोकेऽपि तीव्रं ज्वलिते स्वमस्तके, नैवान्यमूर्द्धज्वलनप्रतिक्रिया ।
कार्येति चास्या हरणं ततो वरं, यद्देहयात्रा न ममैतया विना ॥८७॥
एवं विनिश्चित्य च तां निजान् गृहानानाय(य्य)यद्गुप्तनरेण पार्थिवः ।
विष्णुश्रियं त्रासविलोललोचनां, मृगोमिव व्याघ्रपतिक्रमागताम् ॥८८॥
साऽथ प्राप्य नरेन्द्रमन्दिरमपि प्रादुर्भवन्मानस-
व्याबाधातिशयान्वभूच्छुचमलिस्त्रीवाब्जरुद्धा निशि ।
सौस्थ्ये सर्वमपि प्रमोदसदनं माघार्द्धरात्रेष्विव,
स्नानं वामदृशां गिरीशदयितासौभाग्यतृष्णास्पृशाम् ॥८९॥

इति युगप्रवरागमश्रीमज्जिनपतिसूरिशिष्यलेशविरचिते
श्रीसनत्कुमारचक्रिचरिते विष्णुश्रीहरणो
नाम प्रथमः सर्गः समाप्तः । छ. । १

द्वितीयः सर्गः

तदागमेत्यर्थमहो नरेन्द्रो, मुदं दधौ कोविदनिन्दितेऽपि ।
क्व वा जने स्याद्दृढपञ्चबाण-घुणक्षतान्तःकरणे विवेकः ॥१॥

मदोत्कटो गन्धमतङ्गराजो, मृणालिकां निर्दयमाशु मृद्नन् ।
रुध्येत केन क्षुधितो मृगेन्द्रो, मृगाङ्गनां मांसलविग्रहां वा ॥२॥

तीव्रोऽपि वह्निः सलिलेन शम्यते, तच्चेज्ज्वलेत् किं हि तदा निवर्त्तकम् ।
कथं च तत्र श्वसिति ज्वरार्दितः, सञ्जीवनी यत्र विषाय कल्प्यते ॥३॥

स्वयं वितन्वत्यसमञ्जसानि, क्षमाभृति न्यायपरे प्रकृत्या ।
कथं व्यवस्था स्मरवाडवाग्नि-सर्वंगितानर्थनिधौ जने स्यात् ॥४॥

कान्तानुरागोऽभिनवं विलोचनं, व्यनक्ति यत्सन्नमसेऽपि तामसौ ।
स्मराननाम्भोरुहदत्तसम्मदां, विनिर्गतां मानसमन्दिरादिव ॥५॥

धिक् कामुकत्वं जनवाच्यतासुहृत्, सद्गौरवोल्लुण्ठनपश्यतो हरम् ।
तथा हि तद्वास्त्रिदशेश्वरोऽप्यलं, तुलां समारोहति जीर्णतन्तुना ॥६॥

कुविन्दपाशेन कदर्थितानामिवेन्दुभासामपि सद्गुणानाम् ।
सम्पद्यते कामकलङ्कभाजो, यशःपटोन्मीलनपाटवं नो ॥७॥

न कामुकः पांसुरिवादधाति, स्थितिं गुरूणां हृदि चन्द्रबिम्बे ।
यतोऽस्य मालिन्यभृतः कुसस्थैः, सम भवेत् सन्ततमत्र मैत्री ॥८॥

विष्णुश्रियः प्रेमभरात् कथञ्चिन्नासौ न्यवर्तिष्ट विदन्नपीदम् ।
आकर्णिता यो घनतूर्यनादः, सङ्ग्रामभूमेरिव गन्धनागः ॥९॥

एनां रहस्यभ्यधित क्षितीशः, प्रिये तदेवं वसुधाधिपत्यम् ।
अहं हि ते किङ्करनिर्विशेषः, क्रीतः कटाक्षैर्भुवनैकसारैः ॥१०॥

सामन्तचक्रेऽपि पृथुप्रतापे, त्वच्छासनं खेलनमातनोतु ।
अन्तःपुरं चानुचरं तवेदं, छायेव सुभ्रु ! स्ववपुर्लतायाः ॥११॥

नमस्करिष्यन्ति च भक्तिभाजो, मन्मान्यतां वीक्ष्य समस्तपौराः ।
तनूदरि ! त्वां नयनाभिरामां, लेखां नवीनामिव शीतभासः ॥१२॥

मयि प्रसन्ने तव कातराक्षि!, क्षमातलं निघ्नमिति[1] प्रतीहि ।
समीपगे कल्पतरौ हि कस्य, न स्यात् सदा कल्पितकार्यसिद्धिः ॥१३॥

नृसिंहयोग्यां भवतीं कदर्यः, कथं नु पश्येदपि नागदत्तः ।
भद्रावशा जातु न रासभस्य, स्वप्नेऽपि भोग्याऽधमशेखरस्य ॥१४॥

सप्रश्रयं भूपमिति ब्रुवाणं, प्रत्याह सा साध्वससन्नकण्ठी ।
साऽपत्रपा वेपथुदुस्थगात्रा, सबाष्पनेत्रा परिमन्दमन्दम् ॥१५॥

पिता भवेद् भूमिपतिः प्रजानां, सदापि तद्रक्षणदीक्षितत्वात् ।
तत्र प्रवर्तेत कथं सरागा, वाणीव दृष्टिः कुलजाङ्गनायाः ॥१६॥

राज्येन किं तेन ममाद्य कार्यं, स्वं शीलशैलाग्रपरिच्युतायाः ।
दुग्धोपयोगोप्यतिसन्निपात-प्रपातिदेहस्य शिवाय न स्यात् ॥१७॥

यत्राऽऽस्यमप्यम्बुजवन्निशाया-मुद्घाटनं न क्षमते रजस्वि ।
सतीव्रतध्वंसविधौ हि बिभ्रन्, मालिन्यपङ्कं कुलपांसुलायाः[2] ॥१८॥

तत्रेतरस्यापि जनस्य निन्द्या, सामन्तचक्रे चतुरे मदीया ।
जात्यन्धवक्त्रे स्मितपत्रवल्लि-लेखेव नाज्ञापि बिभर्त्ति शोभाम् ॥१९॥

युग्मम् ।

त्वदीयमन्तःपुरमुत्तमत्वात्, सपत्नभावाच्च कथं विसोढा ।
भुजङ्गयोषाकुलवत् प्रपुष्टां, मां द्विष्टभावं नकुलीमिवोग्राम् ॥२०॥

संवीतमूर्त्तिर्यदि मक्षिकाभिश्चित्रीभवेत् सुन्दरतानिधानम् ।
तदा लभेयाहमपि प्रतिष्ठां, पापेह पौरैरनुगम्यमाना ॥२१॥

न भूपसङ्गप्रभवः प्रसादः, साध्वीषु साधुः पतिदेवतासु ।
किम्पाकभोगः क्षुधितप्रजासु, यथाभिरुच्योपि विपाकरौद्रः ॥२२॥

गुरूपदिष्टः पतिरेव नित्यं, कुलाङ्गनानाममनोरमोपि ।
कलङ्कधामापि तुषाररश्मिः, कुमुद्वतीनामिव माननीयः ॥२३॥

कुबेरलक्ष्म्योक इवेति कान्तं, साऽप्यर्थसारं वचनं वदन्ती ।
प्रत्याबभाषे नरपुङ्गवेन, स्वकार्यसंदीपितचापलेन ॥२४॥

---

१. मायत्तं । २. ०'पांसनायाः' इति पाठः पुस्तके ।

मुग्धेऽङ्गनाश्चित्तभुवोऽनुजीविका, भक्ताश्च तास्तस्य कथं हि शासनम् ।
विलङ्घयेयुः कमनीयकामिनां, विमाननात् तत्सुहृदो महीयसाम् ॥२५॥
कुलाभिमानोऽपि न कामिनीनां, तद्भक्तिभाजामुचितो विधातुम् ।
स्वस्वामिवश्यस्य हि सेवकस्य, का स्वैरिता तत्त्वविचारणायाम् ॥२६॥
स्वशासनातिक्रमकोपितेन, ध्रुवं जटित्वादिविडम्बनाभिः ।
विडम्बितास्तेन कुलादिसीमास्तं विद्विषन्तो विदधुर्व्रतस्थाः ॥२७॥
अस्यैव चाज्ञा शिरसा विधार्यते, लोकैकमल्लस्य सुरासुरैरपि ।
शेषेव कल्याणिनि ! कल्पितार्थदं, तत्सर्वथाराद्धुममुं त्वमर्हसि ॥२८॥
सा प्राह किं तेन सुकुण्डलेन, यत्त्रोटयत्यद्भुतलम्बकर्णम् ।
आराधितो दुर्गतये ध्रुवं स्यात्, यस्तेन किं सर्वगुणस्पृशापि ॥२९॥
प्रत्यब्रवीत्तामथ मर्त्यनायकः, प्रिये ! तदाराधननिष्ठचेतसाम् ।
अच्छिन्नसम्भोगजमोदमालिका, सुधानिमज्जद्वपुषां क्व दुर्गतिः ॥३०॥
इति प्रतीतेऽपि सुखे समक्षतः, क्षमो न कर्त्तुं सुतनो ! विपर्ययः ।
को ह्यम्भसि स्नानविहारपानजाः,प्राप्यापि केलीः कलयत्यसत्यताम् ॥३१॥
निवर्त्यते चेदसुतश्च भाविनः, आसादसातस्य मनोहरादपि ।
तदा महाजीर्णविपाकशङ्कया, भोक्तुं न युज्येत कदापि पायसम् ॥३२॥
इत्थं मुहुर्मानवनाथधूर्तकः, प्रदर्शयन्नुत्पथगामिनीः कथाः ।
विष्णुश्रियं सत्त्वपथान्न्यवर्तयत्, स्थैर्यं क्व वा स्त्रीषु विचक्षणास्वपि॥३३॥
ह्रीमात्रयुक्तामथ तामवेत्य, क्षितीश्वरः कुण्डलहारयष्टीः ।
कान्त्यास्तृताशामुखचक्रवालास्तस्यै ददौ दृष्टिमनोऽभिरामाः ॥३४॥
उवाच चैनां परलोकभीरुता, न सुन्दरी ते क्षणभाजि यौवने ।
किं कृष्णसारङ्गवदङ्गभामिनि !, प्रत्येति यात सदिदं कथञ्चन ॥३५॥
एवं ससामाप्रतिमप्रदान-प्रहारगाढप्रहतेव नष्टा ।
त्रपापि तस्याः समरोन्मुखानां, श्रेणिः प्रवाचामिव कातराणाम् ॥३६॥
मनोऽपि तस्या मदनावलीढं, हिमं यथा दाढ्र्यभृदप्यवश्यम् ।
क्षणेन दुद्राव विदग्धसङ्गानलोष्मतो न्यक्कृत सर्वधाम्नः ॥३७॥

विष्णुश्रिया विप्लुतधैर्ययाऽथ, स्मरस्य भूपस्य च शोभनाज्ञा ।
मेनेऽथवा स्वं हि हितं न वामा, विदन्ति दोषक्षतशुद्धबोधाः ॥३८॥

प्रत्याबभाषे तमिति स्मरार्त्ता, त्वदेकतानाऽहमिति प्रतीहि ।
नाम्भोजिनीनायकतः कदाचि-दम्भोजिनी येन पराङ्मुखी स्यात् ॥३९॥

हेलाखिलक्षोणितलावगाहिन्यपि प्रमोदो हृदि तस्य नाऽमात् ।
कान्तामुखस्मेरसरोजनिर्यद्वचोमधुस्वादनभङ्गिजन्यः ॥४०॥

तुष्टेन साऽथ प्रतिचारिकाभिः, प्रासाध्यत स्नानविधानपूर्वम् ।
सुनिर्मलश्लक्ष्णलसद्दुकूलैः, श्वेतद्युता द्यौरिव रश्मिजालैः ॥४१॥

नानामणिप्रोच्चरदंशुजाल-प्रबद्धशक्रायुधभूषणौघैः ।
विभूषिता कल्पलतेव साऽभात्, सञ्चारिणी विश्वविमोहनाय ॥४२॥

तां सत्कृतां वीक्ष्य तथा प्रसन्नां, कामं सकामो नृपतिर्बभूव ।
पान्थोऽतिहृष्टः सरसीमिवार्त्तस्तृषा विदूरागमसादिताङ्घ्रिः ॥४३॥

तस्यां महामन्मथकेलिवाप्यां, सरोजहंसः कमलावतंसः ।
नानाविनोदैरनयद्दिनानि, प्राप्तातुलश्रीरिव सप्रमोदः ॥४४॥

विष्वक्समुन्मीलितपुष्पनेत्रैस्तां सुन्दरीं द्रष्टुमिवोन्मुखेषु ।
तया करिण्येव करी कदाचिच्चिक्रीड लीलोपवनेषु भूपः ॥४५॥

कदापि तत्पीनकुचाभशारि-ग्रहाग्रहाद्यूतविनोदसक्तः ।
सार्द्धं तया तत्करदत्तदृष्टिर्दिनं समग्रं क्षणवन्निनाय ॥४६॥

सम्भावयामास तदेकतानो, दृष्टयापि नान्तःपुरमेष शेषम् ।
अन्धं यथा प्रौढमृगाङ्कवक्त्र-मप्युद्धतोन्मत्त इव क्षितीन्द्रः ॥४७॥

सकामतृष्णातिशयो निरन्तरं, विसारिदन्तांशुसुधाप्लवाचिताम् ।
पपौ स विस्फारितलोललोचनश्चकोरवत्तन्मुखचन्द्रचन्द्रिकाम् ॥४८॥

तथाऽभवत् तत्सुरतावमग्नो, यथोज्झितान्यप्रियकाम्यराशेः ।
शेषेन्द्रियाणामपि वृत्तयोऽस्य, त्वगिन्द्रियं नूनमनुप्रविष्टाः ॥४९॥

यथेन्दुमौलिः सततानुरागाद्, गिरीन्द्रपुत्र्याः क्षणमप्ययोगम् ।
त्रिस्रोतसो वा सलिलाधिनाथस्तस्यास्तथा नैच्छदसौ क्षितीशः ॥५०॥

कान्तावियोगादथ नागदत्त, आशीविषो वोद्धृततालुदंष्ट्रः ।
अन्तस्तताप क्व नु सुस्थता स्याच्छमीतरोः प्रज्वलकोटरस्य ॥५१॥
मनस्विभिः क्षम्यत एव मूर्द्धनश्छेदोऽपि कांताभिभवस्तु नोच्चैः ।
रामायणादावपि यत्प्रसिद्धो, रामाकृते वीरसहस्रनाशः ॥५२॥
प्रियागुणस्मृत्यभिसारिकाभिर्वाचालितोऽसौ विललाप दीनम् ।
हा !! हंसगामिन्यधुना तु कुर्युः, कस्या गतिं मे गृहकेलिहंसा ॥५३॥
त्वदङ्कपालीपरिवर्तलालितां, वीणामिमां स्कन्धतटे दधातु का ।
नृपाङ्गनायोग्यसुचम्पकस्रजो, न काककान्ता भवतीह भाजनम् ॥५४॥
विलुप्तदृष्टीव मुखं मनोरमं, मृणालिनीमुक्तमिवेह मानसम् ।
व्योमेव शीतद्युतिचन्द्रिकोज्झितं, त्वया विना शून्यमिवेक्ष्यते गृहम् ॥५५॥
रुष्टासि चेत् कोकिलयेव निम्बान्, मन्मानसाद्भीरु न सर्वथा किम् ।
नैशे त्वया प्रत्युत मीलिताब्जरुद्धालिनी स्थैर्यमिहाऽऽललम्बे ॥५६॥
इत्थं विलापेन कृशत्वमायया-वस्याङ्गयष्टिः शुचिनेव निम्नगा ।
समं नलिन्यातिविकस्वराब्जया, विशुद्धया चेतनयातिदुःखितः ॥५७॥
ततः पटिष्ठान्यपि तस्य माद्यत्प्लवङ्गवच्चापलमुद्वहन्ति ।
पत्न्या सह प्रोषितवृत्तिभावादिवावसादं दधुरिन्द्रियाणि ॥५८॥
विशस्थलेष्वक्षमनस्सु देहे, दस्युर्यथा प्राहरिकेषु गेहे ।
यथेष्टमुन्माद उदग्रचेष्टा, नानाकृतिस्तस्य समुज्जजृम्भे ॥५९॥
चित्रार्पितामप्यवलोक्य कान्तां, दूरोन्नमद्बाहुरधावदेषः ।
किं नैष[1] रोषो मयि कः कुतो वाऽवलोक्यसे चात्र मुहुः प्रजल्पन् ॥६०॥
रजोभिरुद्धूलयति स्म गात्रं, स्नात्वा यथा मत्तगजः करेण ।
साक्षादिवांहोभिरिहैव तूर्णं, क्षितीशरोषप्रभवैरनल्पैः ॥६१॥
उत्तालतालं च जहास नृत्यन्, भर्गाकृतिर्भैरवमूर्त्तिरेषः ।
पादप्रहारैरसमं पतद्भिः, प्रकम्पितक्षोणितलोऽतिरौद्रैः ॥६२॥
व्यभाव्यत प्रस्खलितक्रमं या, न व्यक्तवाग्लोलितरूक्षकेशः ।
तादृग्भिरेवानुगतः सडिम्भैर्मूर्त्तैः क्षितौ भूतपतिः सभूतः ॥६३॥

---

१. पुस्तके तु 'नैषि' पाठः ।

व्यामील्य नेत्रे कमलासनस्थो, योगीव चाव्यक्तमयं निदध्यौ ।
ध्यानावसाने च रिपाविवोग्रे, दृष्टे हितेऽपि भ्रुकुटिं बबन्ध ॥६४॥

उन्मादराजस्त्वरितं हनिष्यन्, व्यगोपयत्तं शठचौरनीत्या ।
तथा विडम्बैर्विविधैः परापत्, यथाखिलोन्मत्तशिरोमणित्वम् ॥६५॥

दृष्ट्वापि तं तादृशमीक्षणानां, कृपास्पदं कण्ठविवर्त्ति जीवम् ।
नैवान्वशेत क्षितिपो मनागप्यहो ! दुरन्ता स्मरतन्त्रताऽत्र ॥६६॥

विष्णुश्रियं चानुचचार राजा, कुटुम्बिनीं स्वामिव चक्रवाकः ।
क्व वा भवेत्तत्त्वविचारदृष्टिः, कामिष्वदृष्टिष्विव वामगेषु ॥६७॥

सङ्गीतकेऽसौ कलगीतिकान्ते, मार्दङ्गिकत्वं स्वयमभ्युपेत्य ।
प्रनर्त्तयामास विलोलनेत्रस्तत्पीनवक्षोरुहवल्गनेषु ॥६८॥

तां वेगवायूल्ललदंशुकान्त-व्यक्तातिरम्यावयवां वसन्ते ।
आंदोलयामास सलोलबाहुर्दोलासु लीलोपवने प्रहृष्टः ॥६९॥

स तत्र सक्तस्त्वतिमात्रमन्तः, स्वराज्यचिन्ता न चकार काञ्चित् ।
भवन्ति हि व्यालविषावलीढा, हिताहितार्थव्यवहारशून्याः ॥७०॥

पदे पदे भक्तमपि स्वकीयमन्तःपुरं चारु तिरश्चकार ।
द्विकः पिकासेव्यफलावनम्र-मुत्तुङ्गकम्राम्रवणं यथाऽज्ञः ॥७१॥

तत्प्रत्यहं तेन कदर्थ्यमानं, भावानुरागेऽपि चुकोप तस्मै ।
घर्षप्रकर्षान्ननु चन्दनादप्युद्गच्छति स्फारशिखः शिखावान् ॥७२॥

तथाप्यपश्यन्नवरोधनार्यो, विमृश्य तत्त्वं समवेत्य तावत् ।
कार्याणि यत्साहसनिर्मितानि, प्रायोऽनुतापाय भवन्ति पश्चात् ॥७३॥

नायं नृपोऽस्मासु कदाचिदेव, पारुष्यमाविश्चकृवान् रुषापि ।
ग्रीष्मेऽपि किं बालगभस्तिमाली, मृणालिनीमीलनतत्परः स्यात् ॥७४॥

तन्नूनमौपाधिकमस्य वृत्तं, विष्णुश्रिया सङ्क्रमितं ह्यनार्यम् ।
रात्रिं विनाऽन्यः प्रमदावनद्धः, कः कौशिकं ताण्डवयत्यकाण्डे ॥७५॥

पापा तदेषैव वणिग्वधूटी, कुटी गरिष्ठा कपटस्य मूलम् ।
प्रवृद्धसाम्राज्यतरुप्रमाथि-नानादुराचारपरश्वधानाम् ॥७६॥

अस्माकमुच्छेद्यत मा तदेषा, यतो न बाणेन हृतापि जातु ।
प्रक्षेपकं तस्य विहाय बाणोन्मुखीभवत्युद्भटसिंहराजिः ॥७७॥
ततस्तदुच्छेदविधिश्च ताभिः, प्रचक्रमे सत्वरमेव कर्त्तुम् ।
अवश्यनाश्येष्ववधीरणा स्याद्, ध्रुवं विनाशाय हि नाशकानाम् ॥७८॥
ताः कार्मणोच्चाटनपाटवान्विता-नुपाचरन् भूरिधनेन मान्त्रिकान् ।
नेमुश्च नीचानपि सत्तमानिव, स्वार्थाय किं किं हि न कुर्युरङ्गनाः ॥७९॥
प्रव्राजिकाकार्मणतश्च ताभिः, क्षणात् परावर्त्यत जीवितात्मा ।
मोघत्वमायाति कदापि लक्ष्ये, न हि प्रयुक्तं कुलिशं मघोना ॥८०॥
विष्णुश्रियं वीक्ष्य तथा विपन्नां, मुमूर्च्छ सम्मूर्च्छदतुच्छमन्युः ।
निमीलितस्वान्तहृषीकवृत्त्या, प्रेम्णा तु कुर्वन्निव तां नरेन्द्रः ॥८१॥
मयूरपक्षव्यजनानिलौघैः, स वीजितोऽप्यम्बुलवावमिश्रैः ।
न चक्षुरुत्क्षेपमपि व्यधत्त, चित्रार्पितारम्भ इवोग्रमोहः ॥८२॥
कर्पूरपारोघनचन्दनाम्बु-स्निग्धच्छटालालिततालवृन्तैः ।
चिरेण संज्ञां समवाप भूपश्चक्षुःपरिस्पन्दलवानुमेयाम् ॥८३॥
उन्मीलदक्षं वदनं तदीयं, वीक्ष्य स्फुटत्पत्रमिवाम्बुजन्मा ।
लोकः प्रमोदेन समुल्ललास, चन्द्रोदयेनेव पयोधिनाथः ॥८४॥

निविडनिजविपक्षोच्छेदमोदस्य पोपी ,
समभवदथ हर्षः कोऽपि भूपाङ्गनानाम् ।
शिशुमृगनयनानां वल्लभाभ्यासजाया ,
मुद इव सितशोचिर्द्योतसंयोगजन्मा ॥८५॥

इति युगप्रवरागमश्रीमज्जिनपतिसूरिशिष्यलेशविरचिते
श्रीसनत्कुमारचक्रिचरिते नृपप्रत्युज्जीवनो
नाम द्वितीयः सर्गः समाप्तः । छ. । २

तृतीयः सर्गः

अथोद्भवन्मन्युभरस्खलद्गी-र्विमुक्तलज्जं विललाप भूपः ।
यच्छन्निवास्रैरुपचीयमानै-र्जलाञ्जलिं संस्थितवल्लभायाः ॥१॥

वाङ्मात्रदानेऽपि पराङ्मुखी किं, प्रियेऽधुना स्निग्धतमापि पूर्वम् ।
गौर्जातु मुग्धार्भकदुग्धमात्रा-र्पणे दरिद्रा न हि कामदोग्ध्री ॥२॥

अन्तस्थमूकालिनिमीलिताब्ज-श्रियं दधद्धौतवचस्तवाऽऽस्यम् ।
ममाधुनाऽऽलोकयतोऽपि चित्तं, दुनोति दूरीकृतविभ्रमायाः ॥३॥

मुग्धे ! तव श्रोणितटावलग्ना, शोकातिरेकान्मणिमेखलापि ।
रोचिर्मिषप्रस्रवदश्रुराजि-र्विभाव्यते नूनमनूनमौना ॥४॥

त्वन्मानसे मानिनि ! माययायं, स्निग्धो मयीत्येवमवात्समस्मि ।
इतीव दीर्घेपि पथि प्रयान्त्या, नाऽभाषितोऽपि प्रखलो भवत्या ॥५॥

मृगीषु विप्रेक्षितमम्बुजेषु, वक्त्रद्युतिर्बर्हिषु केशपाशः ।
स्वस्य प्रयाणेऽत्र धृतं त्वयैतद्, ध्रुवं विनोदाय मदीक्षणानाम् ॥६॥

दुर्बोधमेवं ललितं त्वदीयं, नानाविधानं नियतेरिवेदम् ।
विषाऽमृतस्पर्द्धिविषादहर्ष-द्वयं समं यच्छति साम्प्रतं मे ॥७॥

इत्यादि भूपो विलपन्नवद्य, पिशाचकी शीघ्रमभूत् सशोकात् ।
काष्ठागतः कामनटोपदेशः, कथं कथं नाम न नाटयेद्वा ॥८॥

उत्थाय चैनां निजमङ्कमाशु, प्रारोपयद् दुर्वहकाययष्टिम् ।
बालामिवानङ्गविमोहिता वा, किं नाध्यवस्यंत्यतिदुष्करं यत् ॥९॥

रुदन् क्षणं गानपरो हसंश्च, जजल्प सासूयमनल्पमेषः ।
उद्दिश्यता स्त्रीषु हि शोकभाजां, वृत्तिः कुतस्त्यास्तु शुभैकरूपा ॥१०॥

नाद्यापि पूर्णा परिवादिनी सा, त्वया समारम्भि मया समं या ।
बद्धुं कथं प्रोज्झ्य गतासि तूर्णं, नारब्धहीनं ह्युचितं कदाचित् ॥११॥

यस्यास्तवासीन्नवपुष्पशय्या-बाधाकरी केलिषु कोमलाङ्ग्याः ।
सहिष्यसेऽग्निप्रचितां चितां साऽऽरोढुं कथं भामिनि! भीमरूपाम् ॥१२॥

तामङ्कतस्तस्य विलुप्तबुद्धेः, कथञ्चिदाकर्षति बन्धुवर्गे ।
उच्चैः स चुक्रोश तथा यथाऽस्य, स्वनैः सभाऽपि स्फुटति स्म नूनम् ॥१३॥

तत्र क्षणेऽभूत् क्षितिपः क्षताशः, शुभाशुभाचारविवेकशून्यः ।
मग्नो भृशं दुस्तरशोकपङ्के, गजेन्द्रवद्विह्वलनेत्रगात्रः ॥१४॥

उन्मादरक्षोऽपि विशेषतस्तं, तदा सिषेवे विकृतत्वभूमिः ।
अप्राप्तपूर्वस्य सदापि नूनं, लोभेन पुष्टाश्रयखेलनस्य ॥१५॥

कृतं कुकर्मेह विपाककाले, नानागुणं वेद्यत एवमेतत् ।
सहस्रवृद्धया नृपतिर्विडम्बाद्, यन्नागदत्ते विहितात्तमाप ॥१६॥

अत्युग्रपापा निपतन्ति सद्यः, पापात्मनां मूर्द्धनि नान्यथैतत् ।
यन्नारकाकारमनायि भूपः, तत्रैव जन्मन्यतिनिन्द्यवृत्त्या ॥१७॥

दग्धुं ददौ नैव स बान्धवानां, विष्णुश्रियं निष्फलफुल्लदाशः ।
क्रोष्टेव रक्षन् पृथुमांसपेशी-भ्रमेण शोणाश्मशिलामभोग्याम् ॥१८॥

अमङ्गलं कुत्स्यमनर्थकं च, स्थानं गृहेऽस्या इति संपरीक्ष्य ।
क्वचिन्नृपं बालमिव प्रलोभ्य, तां प्रापयन् मन्त्रिवराः श्मशानम् ॥१९॥

अवीक्षमाणः क्षितिपः क्षणेन, तां तत्र शोकातिशयात् पृथिव्याम् ।
मुख पिधायासितजीर्णपटया, साक्षादकीर्त्येव पपात सद्यः ॥२०॥

ददौ न वाचं न पयोऽपि सोऽपाच्चचाल नास्त्रैरिव कीलिताङ्गः ।
दिनत्रयं यावदलक्षि लोकैः, प्रियामनुप्रोषित एव नूनम् ॥२१॥

प्राणप्रहाणाभिमुखीं प्रवृत्ति, तथा विलोक्याऽस्य हितैरमात्यैः ।
आधाय तत्पादयुगं स्वमूर्द्धन्युच्चैःस्वरं विज्ञपितः सखेदैः ॥२२॥

देवेन किं विश्वविलोचनेन्दुना, राहूपरागप्रतिमः समाददे ।
पृथ्वीतलाकस्मिकदुःखवेपथु-प्रदः प्रियाशोकभरो विशृङ्खलः ॥२३॥

सङ्ख्याद्विषः सन्ति पुरेऽत्र वेश्या, वश्याः स्वसौन्दर्यजितेन्द्रयोषाः ।
त्रैलोक्यवर्ण्या अवरोधनार्यस्तत् किं विभुस्ताम्यति निस्वनीत्या ॥२४॥

विष्णुश्रियै चेद्विषमा दशेयं, पिशाचकान्तेव विबाधते त्वाम् ।
तदीक्ष्यतामीक्षितवस्तुतत्त्वं, सैवाऽधुना नाप्तशरीरदाहा ॥२५॥

प्रियाभिधानश्रवणे तदाऽसौ, सुधाभिषिक्तः किमुताऽऽप्तनाकः ।
आत्मानमेवं मनुते स्म यद्वा, प्रेयः श्रुतेः को धृतिहेतुरन्यः ॥२६॥
झगित्यथोत्थाय समीक्ष्यमाणो, दिदृक्षयाऽस्याः ककुभां कलापम् ।
करी करिण्या इव विप्रयुक्तः, प्रत्याबभाषे सचिवैः स विज्ञैः ॥२७॥
फलोपयोगोन्मदभूरिपक्षि - ध्वनिप्रतानैर्बधिरीकृताशे ।
पतत्पुरासत्तिचरे वनान्ते, सा वर्तते सम्प्रति देवकान्ता ॥२८॥
तत्तत्र देवेन तदीक्षणाय, प्रसद्यतां स्वस्य मनः-प्रसत्त्यै ।
न मत्तमातङ्गकपोलपाली-मनाप्य यद्भृङ्गयुवा सुखी स्यात् ॥२९॥
प्रियावपुःसङ्गिवनं परापन्नृपो व्रजन्नामिषलोलुपेन ।
निरातपं नूनमनुग्रहाय, तस्याः खगौघेन विधीयमानम् ॥३०॥
तत्र द्विकस्फोटितनेत्रयुग्मा-मपश्यदस्पृश्यतमावमाङ्गीम् ।
क्षतस्रवत्पूयरसप्लवार्द्रा, मूर्तामिवान्यायजपापपङ्क्तिम् ॥३१॥
व्रणावलोलत्कृमिजालवर्म-स्पृशं तनूं त्रातुमिवाण्डजेभ्यः ।
नाराचपूरेभ्य इव प्ररूढ - दुष्कर्मवैरिद्रुतपातितेभ्यः ॥३२॥
विलुप्तनासाश्रवणां शृगालैः, रामानुजाकाण्डविडम्बिताङ्गीम् ।
रौद्राकृतिं शूर्पणखामिवोच्चै-र्दंष्ट्रैरपि क्षोणिभृतामयोग्याम् ॥३३॥
श्रीखण्डकर्पूरविलेपकान्ते, प्रकाशयन्ती स्तनमण्डलेऽपि ।
श्मशानभस्मच्छुरितानि लक्ष्मीश्चलेति सम्बोधयितुं ध्रुवं नॄन् ॥३४॥
मृताहिकौलेयकमुख्यदेहि-प्रभूतदेहाक्रमसर्पिगन्धात् ।
अप्युत्कटं गन्धमरं किरन्तीं, दिक्चक्रवालं परिवासयन्तम् ॥३५॥
पञ्चभिः कुलकम् ।
तां वीक्ष्य बीभत्सपदार्थसीमा-मधःकृतप्रेतविलासिनीकाम् ।
वैराग्यमार्गापतितान्तरात्मा, सोऽचिन्तयत् कूणितनेत्रपत्रः ॥३६॥
निर्मुक्तनिर्मोकभुजङ्गराज-भोगश्रियं स्वस्य कुले दधाने ।
कलङ्कहीनेऽपि मया कलङ्कः, समर्प्यताऽज्ञानभृता यदर्थम् ॥३७॥
प्रजा अपत्यादपि तीव्ररागाः, पितामहादप्यनुकूलवृत्ताः ।
शत्रुप्रकारेण मयाऽभिभूता, हा ! हा !! ग्रहाक्रान्तिजुषेव सर्वाः ॥३८॥

वाचस्पतिं प्रह्वदिवस्पतिं ये, शश्वत्कुशाग्रीयधिया जयन्ति ।
तानप्यमात्याननतिमात्रनम्रानमंस्यहं जीर्णतृणाय कामी ॥३६॥

सप्ताङ्गमन्तःपुरचारुराज्यं, विडम्बिताऽखण्डलभूतिजोषम् ।
समीरणेनेव पयोदवृन्दं, निन्ये मयैतद्विशरारुतां द्राक् ॥४०॥

तस्या अवस्था समपद्यतेयं, दृष्टि-श्रुति-ध्यातिपथातिवृत्ता ।
यदा तदाऽन्यत्र मनोरमेऽर्थे, क्वाऽऽस्था निबध्येत विचक्षणेन ॥४१॥

पञ्चभिः कुलकम् ।

विभावयंस्तद्वदसौ सखेदं, समस्तमर्थं क्षणिकं भवस्थम् ।
कान्तानुरागादिव तत्प्रदेशा - न्नृपो न्यवर्तिष्ट विबुद्धतत्त्वः । ४२॥

सद्यःसमुद्भ्रान्तमदः करीन्द्रो, यथा समुत्सृष्टविदुष्टचेष्टः ।
प्रसन्नचेता नयनाम्बुजन्मा, प्रत्याजगाम क्षितिपः पदं स्वम् ॥४३॥

पौरैश्चकोरैरिव शारदेन्दोः, स चन्द्रिकास्तोम इवातिशुद्धः ।
नेत्रैः प्रफुल्लैः परिपीयमानः, पुरं विवेश क्षणदः प्रजानाम् ॥४४॥

तत्रापि वैराग्यविशेषशाली, धाम्नीव दीप्ते स रतिं न लेभे ।
सुधारसच्छिन्नतृषो हि पुंसः, सक्तिः कथं पल्वलवारिणि स्यात् ॥४५॥

प्रचण्डवातोद्धुतवारिबिन्दु-व्योमस्थितिस्पर्द्धि सुराज्यमिद्धम् ।
सान्तःपुरं तन्निखिलं विहाय, स्थास्ये विमुक्तौ विरजाः कदेति ॥४६॥

सद्धर्मधान्याधिगमोन्मुखस्य, कृषीबलस्येव नृपस्य तस्य ।
पयोदवद् ध्वस्तततान्तिकतापस्तत्राऽऽययौ सुव्रतसूरिराजः ॥४७॥

युग्मम् ।

सत्त्वानपायप्रणिधेर्विनम्रः, पथि व्रजन्निश्चललोचनोऽभात् ।
विडम्बितानेकपयानलीलो, महाव्रतप्राज्यभराद् ध्रुवं यः ॥४८॥

तपःश्रिया क्षामवपुर्विमुक्तो, निःशेषभूषा परिकर्मभेदैः ।
तथापि विक्षिप्तगभस्तिमाली, समुच्चरद्भास्वरधामलक्ष्म्या ॥४६॥

भङ्ग्युत्तरासङ्गितशुद्धवासा, यः श्यामकेशश्च बभार गौरः ।
सपाण्डुकोद्यानतुरीयभागाधःपाण्डुमेघावृतमेरुलीलाम् ॥५०॥

ऋज्वायतस्वच्छदशान्तदेश-मायामवद्दण्डमृषिध्वजं यः ।
नानार्थसम्पादकपुण्यराशि - व्याप्तोरुचारित्रमिवाऽऽदधार ॥५१॥

मुखेन्दुराजन्मुखवस्त्रिकश्च, कथासु लेभे विरजा द्विजौघैः ।
निषेवितः प्रान्तनिविष्टहंस-राजीव विभ्राजि सरःश्रियं यः ॥५२॥

अनन्यसाधारणवृत्तविद् यो, य एक एव प्रमदप्रदोऽभूत् ।
भव्यात्मनां स्यान्ननु विश्वकाम्यं, सर्वेन्द्रियाह्लादि सुपक्वमाम्रम् ॥५३॥

निधानमेकं महतां महिम्नां, माध्यस्थभाग् यो जगतां विबोधम् ।
जाड्यस्पृशामप्यतनोत् क्षणेन, पद्माकराणामिव चण्डरोचिः ॥५४॥

जगत्सु यः प्राप यशःपताकां, जिनप्रतिच्छायतयातिशुद्धाम् ।
किंवाऽद्भुतं येन न सुव्रताना-मगोचरः स्यादतुलोऽपि लाभः ॥५५॥

अष्टाभिः कुलकम् ॥

तस्थौ समागत्य स काननैक-देशे विविक्तेऽथ विविक्तचेताः ।
तदीयकीर्त्येव पुराज्जनेनाऽऽहूतेन विष्वग्निचिते तदानीम् ॥५६॥

श्रुत्वा तदीयागमनं नरेन्द्रो, ननन्द केकीव पयोदनादम् ।
को वा नितान्तार्थितकान्तवस्तु-प्राप्तौ भवेन्नाधिकहर्षपात्रम् ॥५७॥

ततश्च किं प्राप्तमहानिधानस्त्रैलोक्यनाथत्वमुपागतो वा ।
अद्याहमेवं स विकल्पयंस्तं, समाजगामोन्मुदितः प्रदेशम् ॥५८॥

ससैन्यलक्ष्मीर्नृपतिः प्रजाश्च, स्वस्वानुरूपर्द्धिविवृद्धशोभाः ।
तत्राऽऽययुर्भक्तिविशेषहर्ष-व्यक्त्यै यथा श्रीविधिचैत्य इभ्याः ॥५९॥

प्रदक्षिणास्तस्य विधाय तिस्रो, विशुद्धभूपृष्ठनिविष्टशीर्षाः ।
प्रणम्य चैनं विनिषेदुरुद्यल्ललाटबद्धाञ्जलयः प्रसन्नाः ॥६०॥

सद्धर्मलाभैरभिनन्द्य सर्वान्, प्रचक्रमे वक्तुमसौ गुणाढ्यः ।
बृहत्कथां सत्पुरुषार्थनिष्ठां, दूरीकृतावद्यपदप्रयोगाम् ॥६१॥

विवेकिभिः प्राप्यमनुष्यजन्मा, जन्मप्रसाध्यो विधिधर्ममार्गः ।
यच्छारदेन्दोरुदयस्य नान्यत्, फलं विहाय प्रमदं जगत्याः ॥६२॥

श्रीवीतरागो विधिनाऽर्चनीयः, त्रिसन्ध्यमत्यादरपूतभावैः ।
नानादृतानां परमोऽपि मन्त्रः, फलत्यवश्यं भुवि दुष्प्रयुक्तः ॥६३॥

सज्ज्ञानचारित्रनिधिस्तपस्वी, स्तोकोऽपि सेव्यः शिवमीहमानैः ।
यत्रैव चिन्तामणिसाध्यमर्थं, शिलाः सुबह्व्योऽपि हि साधयन्ति ॥६४॥

पापास्रवेभ्योऽपि पलायनीयं, सद्दृष्टिभिर्भोगभयङ्करेभ्यः ।
न दावसान्निध्ययुजो हि वृक्षाः, फलन्ति पुष्टा अपि मूलबन्धैः ॥६५॥

नानाजिनाभ्यर्चनदानदीक्षाः, शिवाय नैवेह विना जिनाज्ञाम् ।
नाथप्रमाथे युधि जातु जाते, किं कुर्युरुग्रा अपि शेषसैन्याः ॥६६॥

विषोपमाना विषया विहेया, आपातरम्या अपि दुःखदत्वात् ।
यत्रैव भोग्याः करवीरशाखाः, स्निग्धप्रसूना अपि सैन्धवानाम् ॥६७॥

उपेक्षणीयाः सुकृतोद्यतानां, दूरं विदग्धा अपि पक्ष्मलाक्ष्यः ।
किं क्वापि कौक्षेयकतीक्ष्णधाराः, सुव्यापृताश्छेदपराङ्मुखाः स्युः ॥६८॥

मूलं विरोधस्य कलेः प्ररोहाः, सुरञ्जिता अप्यपरानुरक्ताः ।
प्रियास्तथापि प्रमदाजनाना-महो दुरात्मा भुवने हि मोहः ॥६९॥

पापप्रपा नूनमिहाखिला स्त्री, यदत्र सक्ताः सुकृतामृतस्य ।
स्वादं जना नानुभवन्ति कञ्चिदुष्ट्रा इवाऽऽम्रद्रुमपल्लवस्य ॥७०॥

तदित्यवेत्यास्रवमुद्रणादौ, द्रुतं यतध्वं यदि कौतुकं वः ।
मुक्तिश्रियः कण्ठतटानुषङ्गे, नायत्नभाजां क्वचिदिष्टसिद्धिः ॥७१॥

इत्थं वचः शृण्वत एव सूरे-रालेख्य कर्मेव विशुद्धवर्णम् ।
सच्चित्तभित्तौ प्रतिबिम्बितं तन्नृपस्य कर्मावलिलाघवेन ॥७२॥

शेषप्रजानामपि तत्कथार्थः, प्रायः समुत्कीर्ण इवाप्रकम्पः ।
तस्थौ हृदि स्यान्न हि जातु वन्ध्यः, परोपकारोद्यमिनां प्रयासः ॥७३॥

विभावयन् सम्यगसौ गुरूणां, वचांसि भूयांसि सदर्थभाञ्जि ।
संवेगरङ्गावनिनृत्तचेताः, पराङ्मुखोऽभून्नृपतिश्रियोऽपि ॥७४॥

सान्तःपुरं तत्पुरमाढ्यलोकं, देशं च नानाद्भुतनाकदेश्यम् ।
जरत्तृणायापि नृपो न मेने, विनिस्पृहाणां किमु दुष्करं वा ॥७५॥

गुरोर्निवेद्य स्वमनोऽभिसन्धिं, प्रणम्य चांह्रिद्वितयं तदीयम् ।
ससैन्यपौरः स पुरं विवेश, स्वर्गं वृषे वाऽतुलदेवसेनः ॥७६॥

अष्टाह्निकास्तत्र चकार पूजा, जिनेन्द्रगेहेषु विधिप्रपूर्णाः ।
आशंसयेवाऽष्टसुपुष्टकर्म - द्विषज्जयस्य त्वरितं भविष्णोः ॥७७॥

सामन्तवृन्दैर्विविधर्द्धिशोभै - र्महाव्रतोत्साहधनैश्च पौरैः ।
सूतप्रघोषैर्बधिरीकृताश - मन्तःपुरैरप्यनुगम्यमानः ॥७८॥

ददन् महादानमपूर्वनादै - र्मन्ये सुतूर्यैः परिकीर्त्यमानः ।
समाददे सौगुरुमेत्य दीक्षां, कक्षां ध्रुवं मुक्तिवधूपयामे ॥७९॥
युग्मम् ।

धन्यः स विक्रमयशाः प्रतिपन्नदीक्षः,
सोत्कण्ठयेव रमणीयतपःश्रियाऽथ ।
प्राप्तश्चिरान् मदहितावनिपाललक्ष्मी,
वैराग्यवानिति मुदान्वितयाऽऽलिलिङ्गे ॥८०॥

रेमे तया सह तथार्थितलब्धयाऽसौ,
स प्रेमशैलसुतयेव नवेन्दुमौलिः ।
भाविप्रगल्भफलसन्ततिगर्भिता सा,
यज्ञे यथाऽतिविरजा अपि चित्रमाशु ॥८१॥

सकलकुकृतमिथ्यादुष्कृताविष्कृतेर्द्राक्,
परमशमसमृद्धध्यानविध्यापितैनाः ।
प्रचुरतरसमाभिः शोधितात्मा तपोभिः,
स्मृतजिनगुरुपादः प्राप नाकश्रियं सः ॥८२॥

दण्डानां त्रितयं विखण्डितमहो गुप्तं च गुप्तित्रयं,
शल्यं गौरवसङ्गतं त्रिविधमप्युत्त्रासितं दूरतः ।
रत्नानां त्रितयी व्यधीयत बतानाघ्योऽमुनेति ध्रुवं,
नाकेनाऽपि निवेशितः शुभनिजोत्सङ्गे तृतीयेन सः ॥८३॥

सनत्कुमारेति पदाश्रयोऽयं, भविष्यतीतीव विभावनाय ।
स्वर्गेण सोऽश्लिष्यत पूर्वमेव, सनत्कुमारेति पदाश्रयेण ॥८४॥

उत्पन्नमात्रस्य पुरः सुराङ्गना, मुहुर्मुहुर्जीव जयेति नन्द च ।
दत्ताशिषः पुष्पचयं निचिक्षिपु-स्तस्यैव मूर्त्तं दधतं यशःश्रियम् ॥८५॥

जगुर्विपञ्चीमधुरस्वरैः समं, सर्वैर्यथास्थाननिवेशिभिः स्वरैः ।
क्वचित्तु यत्तत्स्वनतोऽतितारता, तासां ध्वनौ तत्र मुदेव दुष्यति ॥८६॥

दृढांह्रिघातोद्धतमेव ताण्डवं, चक्रुः स्वजातिप्रतिपन्थि यद्यपि ।
ताः सम्मदात्तत्र यथाम्बुदध्वने-स्तिर्यग्विरोध्युन्नटनं कलापिनः ॥८७॥

ततो विमानाधिपतिं सहस्रशः, प्रणेमुरेनं विबुधा अपीतरे ।
समे मृगत्वे हि तदिन्द्रता हरे-र्जयन्ति पुण्यानि जनस्य सर्वथा ॥८८॥

ऐश्वर्यलाभेऽपि वमन्ति न स्थितिं, विवेकिनः स्वामिति शासितुं जनान् ।
नित्यार्हतार्चानिचयं समार्चयत्, स भक्तितः पुस्तकमप्यवाचयत् ॥८९॥

सुवेषरूपं मुदितं कृतादरं, भूयांसमालोक्य निजं परिच्छदम् ।
ननन्द सोऽन्तर्विबुधो हि मोदते, श्रिया परस्यापि किमु स्वकीयया ॥९०॥

दिव्यांशुकोल्लोचचितं समन्तत-स्तारावलिश्रीवरहारभूषितम् ।
कलोपगीतिध्वनिभृङ्गशाश्वतो-न्मेषप्रसूनप्रकराञ्चिताङ्गणम् ॥९१॥

पदे पदे धूपघटीसुगन्ध-घ्राणप्रसक्ता इव निश्चलाङ्ग्यः ।
पाञ्चालिका यत्र विभान्ति धातुः, शिल्पप्रकर्षा इव चारुरूपाः ॥९२॥

नानामणिस्यूततलं सिताश्मनां, भित्तिष्वमर्त्यप्रतिबिम्बनच्छलात् ।
विष्वक्सचित्रत्वमिवानिशं दधन्, मुदेऽभवत् तस्य विमानमुज्ज्वलम् ॥९३॥

त्रिभिर्विशेषकम् ।

तदप्यपास्याशु कदाचिदेष, द्वीपाऽद्रिवन्यावनिषु व्यहार्षीत् ।
क्षीरोपयोगादपि नित्यवृत्ता, कुतूहली ह्युद्विजते जनोऽत्र ॥९४॥

विशुद्धभावामृतसेकवृद्धाः, सर्वेंद्रियाणां फलिता विरामाः ।
शश्वन्मनोहारिनिरन्तराया-खिलेन्द्रियार्थानुभवैरिवास्य ॥९५॥

मुनेरपि श्रीभरतस्य पश्यन्नगोचरीभूतबहुप्रयोगाम् ।
प्रेक्षां न चिक्षेप कदापि चक्षुः, स स्निग्धकान्तास्वपि कामिनीषु ॥९६॥

कटाक्षलक्षैः सुरसुन्दरीणां, स स्नप्यमानोऽपि सुधासुहृद्भिः ।
रक्तत्वमाविश्चकृवान् प्रकामं, वामो हि कामः खलु नान्यथा स्यात् ॥९७॥

सुधारसानन्तगुणप्रमोदनं, दिव्याङ्गनाबाहुलतोपगूहनम् ।
तुष्टस्मराचार्यविनीतनूतन-स्वशिल्पजत्वादिव तत्र सोऽभजत् ॥९८॥

इति सुकृततरूत्थं स्वादुतौर्यत्रिकोद्य-
द्रसमतुलफलं स स्वादयंस्तत्र तस्थौ ।
विमलमणिविमानोत्सङ्गविश्रान्तकान्तो-
न्नतकुचतटमुक्ताहारलीला दधानः ॥९९॥

इति युगप्रवरागमश्रीमज्जिनपतिसूरिशिष्यलेशविरचिते
श्रीसनत्कुमारचक्रिचरिते नृपनाकलोकगमनो
नाम तृतीयः सर्गः समाप्तः । छ. । ३ ।

चतुर्थः सर्गः

कदाचिदस्य त्रिदशोत्तमस्य, प्रमोदलीलासदनस्य चक्षुः ।
मिमील तत्प्राग्जननीयधर्म-प्राग्भारवत्तस्थुष एव तत्र ॥१॥

तस्य ध्रुव सन्ततजृम्भितानि, प्रोद्दामगन्धान्वितषट्पदानि ।
माल्यानि मम्लुः मृदुलाङ्गभङ्गा-नुसारतः स्वस्य तमाकलय्य ॥२॥

कल्पद्रुमोप्यस्य तदा चकम्पे, पश्यन्निवाग्रे निधनं स्वभर्तुः ।
मन्दोदरीदक्षिणचक्षुरुच्चै-र्यथा पलादेश्वरपातदर्शि ॥३॥

सोत्कण्ठयेवातिचिराय वल्लभः, प्राप्तः परीतो रतिवामनेत्रया ।
तस्या निरासाय तदा प्रमीलया, बाढं समाश्लिष्यत सश्लथद्युतिः ॥४॥

निर्वास्यमानैरिव देहमन्दिरात्, कार्याक्षमैर्दुर्बलकिंकरैरिव ।
प्रदर्शितोद्दामविकारकोटिकैः, प्राणैश्चकम्पे द्रुतमस्य दुःखिनः ॥५॥

नासौ विमाने न गिरौ न कानने, रम्येऽपि नैवाप्सरसां मुखाम्बुजे ।
रतिं परापन्निशितासिधारया, पुमानिवाध्यासितकण्ठकन्दलः । ६॥

अथायुषो नीरनिधेरिवाऽऽप्य, क्रमेण पारं सुमहीयसोऽपि ।
अच्योष्ट स स्वर्गपदाद्विभूतेः, क्व स्फातिभाजोऽपि बत स्थिरत्वम् ॥७॥

निर्वाणदीपश्रियमाददाने, तस्मिंस्तदीयाऽप्सरसां मुखानि ।
तमोवृतात्युज्ज्वलदर्पणानां, दधुर्विलासं गलितच्छवीनि ॥८॥

निपत्य नाकी स तु नाकलोका-ल्ललामलावण्यमिलाबलायाः ।
शिरोमणि रत्नपुरं पुराणा-मलञ्चकार प्रभवेन सद्यः ॥९॥

महाधनानां भवनेषु नक्तं, क्रीडद्वधूनूपुरतारनादैः ।
दमं सतां चौरमिवावधुन्वन्, दधौ स्मरो यत्र सुयामिकत्वम् ॥१०॥

विलासिवेश्मागुरुसान्द्रधूम-व्याप्ते नभस्युन्मिषिताब्दशंकाः ।
कलापिनः स्मापितविज्ञलोक-मारेभिरे ताण्डवमाशु यत्र ॥११॥

निवासिनां प्रोज्ज्वलधर्मसेतु-प्रबन्धरुद्धैरिव सर्वतोऽपि ।
न यस्य सीमा समतीयते स्माऽपस्मारदौर्गत्यविरोधचौरैः ॥१२॥

यत्पश्यतां विश्वमपि प्रकाशते, प्रासादरूपं गृहदीर्घिकामयम् ।
उद्याननिर्वृत्तमथो शिरोगृह-प्रेङ्खद्गवाक्षस्थकुतूहलस्पृशाम् ॥१३॥

स एव नाकी निजकर्मवेषा-वेशान्मनुष्यत्वमवाप तत्र ।
पुरेऽथ शैलूष इव प्रगल्भो, रङ्गाङ्गणे राघवतामनिन्द्याम् ॥१४॥

तत्राऽप्यसौ भूपतिपौरलोक-नेत्रोत्सवोत्सर्पणपूर्णचन्द्रः ।
बभूव सम्यग्जिनधर्मवित्तो, नाम्नाऽपि वित्तो जिनधर्म एव ॥१५॥

सकण्टकं पद्मवनं विहाय, श्रिताम्बुधिं सोऽपि निदानभोगः ।
तद्दोषहीनं जिनधर्महर्म्यं, लब्ध्वा तु रेमे मुदितेव लक्ष्मीः ॥१६॥

सदक्षिणोऽप्यक्षतवामता[1]-निधिः, क्षमावदातोऽपि सुलोहितक्रमः ।
पद्मायताक्षोऽपि सुसूक्ष्मलोचन-श्चकार चित्रं नगराधिवासिनाम् ॥१७॥

मार्गानुसारित्वत एव ताव-न्निसर्गत शुद्धगुणप्रियोऽसौ ।
न वह्निरूर्ध्वज्वलने सहायं, समीहते ह्रीन्धनवृद्धहेतिः ॥१८॥

तस्य क्रमेणाऽथ सुसाधुसङ्गात्, स एव भावः सुतरां दिदीपे ।
चन्द्रोदयान्नीरनिधेरिवोद्यत् - कल्लोलमालाकुलितत्वमाशु ॥१९॥

१ रमणीयता ।

सम्यक्त्वगारुत्मतरत्नमादौ, समाददे सौगुरुपादमूले ।
तीव्रप्ररोहद्भवकालकूट-च्छटासमुच्चाटनपाटवश्रित् ॥२०॥

तन्मार्गगामी प्रशमादिधर्म-वर्गस्तदाऽजायत तस्य निघ्नः ।
वक्षःप्रतिष्ठे नहि कौस्तुभे स्युस्तत्कान्तयः कंसरिपोरवश्याः ॥२१॥

समूलकाषं न्यकषत् सुदृष्टया, सोऽन्तस्तमस्काण्डमयीं कुदृष्टिम् ।
वैधुन्तुदीं कण्ठतटीं कठोरा-मिवाऽसुरारिः शितचक्रवीथ्या ॥२२॥

ततोऽत्यजच्छ्राद्धविधानहोम-पिण्डप्रदानापरदेवनामान् ।
तीर्थान्तरीयप्रणतिप्रशंसा-विश्राणनान्यप्युपरोधवर्जम् ॥२३॥

महानवम्यादिषु देवतार्चा, संक्रान्तिसूर्याद्युपरागपूजाः ।
तीर्थान्तरे स्नानतपःप्रदानो-पयाचितानि त्रिविधं त्रिधैव ॥२४॥

इत्यादि मिथ्यात्वपदं हि लोके, यच्चाऽऽगमेप्युक्तमशुद्धिधाम ।
लोकोत्तरं तीर्थपबिम्बसाधु-रूपं जिनाज्ञाविमुखप्रवृत्ति ॥२५॥
त्रिभिर्विशेषकम् ।

अर्च्योपनर्च्यत्वमिहाश्रुवीत – मिथ्यादृशामुत्पथगामुकानाम् ।
अभोग्यतां चन्दनशाखिराजि-र्भुजङ्गमानामिव सङ्गमेन ॥२६॥

विलुप्तसंशुद्धचरित्रभूषः, क्व दृश्यतां यातु यतीश्वरोऽपि ।
हितैषिणां श्वित्रलवित्रलून-देहद्युतिः श्वित्रिजनो घनीव ॥२७॥

यदागमे सुन्दरमप्यसुन्दरा-नुषङ्गतोऽसुन्दरतां व्रजेदिति ।
सच्चम्पकस्रक्शकुनिप्रवेदक-द्विजादिदृष्टान्तशतैः प्रसाधितम् ॥२८॥

तत्सर्वथाऽनायतनं विहाय, श्रेयोमना आयतनं स भेजे ।
निषेवते को हि सुधां न विज्ञो, विषस्य हानादिह जीवितार्थी ॥२९॥

श्राद्धस्ततो दर्शनरत्नभागप्यधत्त स द्वादशसद्व्रतानि ।
न ह्रीक्षिताक्षाममृगेक्षणोऽपि, स्यान्निष्क्रियस्तद्व्रतसौख्यपात्रम् ॥३०॥

विशुद्धसिद्धान्तरहस्यबोधे, पाखण्डिनो जाड्यजुषः समस्तान् ।
तत्याज कालुष्यनिधीन् विरागात्, सरांसि वर्षास्विव राजहंसः ॥३१॥

स स्वातिवारीव रसद्घनौघः, पात्रे निचिक्षेप धनं विशुद्धम् ।
न कान्तमुक्ताफलकान्तिमुक्ति-श्रिये यदन्यत्र भवेन्न चान्यत् ॥३२॥

मुक्त्यङ्गसद्दर्शनशुद्धिहेतो-रसूत्रयत्तीर्थपमन्दिरं सः ।
नानिर्मलो यन्मुकुरोऽपि धत्ते, वधूमुखाब्जप्रतिमानकेलिम् ॥३३॥

भास्वद्रुचिस्फाटिकमुन्नताग्रं, विजित्य यच्छृङ्गवरं हिमाद्रेः ।
रेजे समारोढुमिवोद्यत द्यां, कर्त्तुर्यशो मूर्त्तमिव प्रवृद्धम् ॥३४॥

दानाम्बुसंसिक्तकपोलभित्तौ, सजीवलक्ष्ये गजपीठबन्धे ।
यत्रातिमुग्धा मधुपानलुब्धा, बभ्राम शश्वन्मधुपाङ्गनाली ॥३५॥

यत्राश्वपीठेऽपि बभुः प्रनृत्ता, गारुत्मताऽश्वागतिपञ्चकेन ।
उद्वेजिताः सन्ततमेकगत्या, दिवोऽवतीर्णा इव भानवीयाः ॥३६॥

नृपीठमुत्तप्तहिरण्यदीप्रं, स्त्रीपुंसयुग्माश्रितकल्पवृक्षम् ।
अदर्शयद् यत्र कुरुव्यवस्थां, साक्षादिवाहृष्टचरीं जनानाम् ॥३७॥

काश्चित्समुन्मीलदनङ्गरङ्गा, रेजुः स्तनाफालकृदङ्गभङ्गाः ।
मूर्त्ता इव स्व.सुदृशोऽवतीर्णाः, पाञ्चालिका यत्र विलासनृत्ताः ॥३८॥

अन्यास्तु निर्द्धौतशरासिकुन्त-व्यग्रोल्ललत्पाणियुगाः समन्तात् ।
नूनं विराजन्जिनबिम्बरत्न - महानिधिप्रस्तुतनित्यरक्षाः ॥३९॥

नानामणीभङ्गिसुवर्णभूमि - प्रभाबलक्षालननित्यकान्तम् ।
यत्र व्यपेक्षिष्ट वधूजनस्य, प्रयत्नमात्मप्रतिमण्डनाय ॥४०॥

यस्याग्रतः सूर्यशिलावबद्ध - भूमौ सहस्रांशुकरावपाते ।
निर्धूमधूमध्वजमङ्गलानि, प्रैक्षिष्ट सद्दृष्टिजनः सदापि ॥४१॥

रजोऽनुषङ्गादिव वित्रसन्ती दूरं दिवः प्राङ्गणमारुरोह ।
स्वःसन्निधानं दिशताऽऽश्रिताना - मारोहणश्रेणिरलं यदीया ॥४२॥

यत्रेन्दुकान्तामलजैनबिम्ब - द्युरत्नरोचिष्णुनिगर्भगेहे ।
अलक्ष्यसूर्यास्तमयोदये च, स्यान्मङ्गलायैव हि दीपदानम् ॥४३॥

यत्सिंहकस्थानसमीपगामी, बिभ्यन्मृगांदोलितबिम्बदुस्थः ।
निजं मृगाङ्कत्वमलं निनिंद, प्रतिक्षपं क्षिप्तकरो मृगाङ्कः ॥४४॥

यद्विश्वकर्माऽतुलशिल्पतल्पं, दृग्दोषमोषाय शिरस्युदग्रे ।
वैडूर्यवर्यामलसारकाक - व्याजेन नोलीतिलकं बभार ॥४५॥

यस्योर्द्ध्वमप्युज्ज्वलपद्मरागा - धारस्थचामीकरचारुकुम्भः ।
मुकुन्दनाभीरुहशोणपद्मो - पविष्टवेधःश्रियमाचकर्ष ॥४६॥

प्रांशुं दधत्काञ्चनकेतुदण्डं, यच्चोन्ननामेव कराङ्गुलिं स्वाम् ।
जगत्त्रयेऽप्येकमहं मनोज्ञ-मिति ध्वनत् सध्वनिकिङ्किणीभिः ॥४७॥

सितापताकापवनोद्धुतत्वाद्, द्राघीयसी चोर्द्ध्वमुखोच्छलन्ती ।
यस्योपरिष्टाद्दिवमारुरुक्षुः, कर्तुर्बभौ मूर्त्तिमतीव कीर्त्तिः ॥४८॥

यत्पश्यतां नाकनिवासिनाम - प्यभूद्विमानेषु निजेषु मन्दः ।
सौन्दर्यदर्पो नमयत्यनम्रा - नपि प्रतापो हि जगत्प्रतीतः ॥४६॥

सिद्धान्तसंसिद्धविधानपूर्वं - माचार्यहस्ताकलितप्रतिष्ठम् ।
तथा सपूर्णं निरमापयत् तद्, यथाऽभवत् सिद्धिपथो जनानाम् ॥५०॥

धर्मक्रियाकोविदकीर्त्तनीय - कल्याणमालाकमलाप्रदाऽपि ।
विधीयमाना विधिना विहीना, न भूपसेवेव फलावहा स्यात् ॥५१॥

तत्र त्रिसन्ध्य महनं मुमुक्षुश्चक्र स सर्वाक्रमदूरवृत्तिः ।
न ह्यीष्टभाक् स्यान्निधिमीहमानः, प्रतीपचारी तदुपायजाते ॥५२॥

गार्हस्थ्यससाधकमर्थजात - मनिन्द्यवृत्त्या समुपार्जयत् सः ।
न दैन्यमालम्ब्य कदापि सिंहः, प्रकल्पयेत् स्वस्य शरीरयात्राम् ॥५३॥

षट्खण्डपृथ्वीतलराज्यलक्ष्मीं, प्रेप्सुर्ध्रुवं सातिशयप्रयत्नः ।
आसीत् षडावश्यक उग्रभावात्, तथा यथाऽन्यत्र न कुत्रचित् सः ॥५४॥

श्राद्धोचितं कर्म विवेकसागरः, शस्तं समस्तं सततं चकार सः ।
न ताम्रपर्णीजलशुक्तिसम्भवं, केनाऽपि हीयेत गुणेन मौक्तिकम् ॥५५॥

इतश्च सुस्निग्धकलत्रनेत्र - ध्याता चिर तद्वियुतः स्मरार्त्तः ।
पद कृशत्वस्य स **नागदत्तः**, श्रियं दधौ भृङ्गिरिटेः समग्राम् ॥५६॥

तिर्यग्गतिः पद्मदलायताक्षी, नेदृक् तनुं मां स्पृहयिष्यतीति ।
जीर्णं स तूर्णं ध्रुवमङ्गमुज्झाञ्चकार नेपथ्यमिवाढ्यकामी ॥५७॥

आमुच्य चार्त्त हृदि लम्बहारं, ध्यान पुरस्कृत्य च स प्रदोषम् ।
तिर्यग्गतिं पत्रलताभिरामां, निर्विप्रलम्भ समुपालिलिङ्ग ॥५८॥

मुहुर्मुहुस्तामभजद् गतिं स, क्षीबो भुवं वा स्वकृतानुरूप्यात् ।
तत्राप्यनाहार्यदुरन्ततीव्र - व्यथासहस्राण्यसकृच्च लेभे ॥५९॥

ततः समुद्धृत्य कथञ्चिदेष, मानुष्यकं प्रापदघौघयोनिम् ।
यज्ञोच्छलद्धूमपिधीयमान-प्रभाकरे **सिंहपुरे** प्रसिद्धे ॥६०॥

वेदध्वनिध्वानितदिङ्मुखेऽपि, गीतं कलं वारविलासिनीनाम् ।
उषस्सु केली मृगशावकानां, जहार चेतांसि सदापि यत्र ॥६१॥

व्योमेव यच्चित्रशिखण्डिमण्डलं, पाखण्डिनां वृन्दममण्डयन् मुदा ।
वेदोक्तसम्पूर्णविधानसाधन - प्रवृत्तिपात्रत्वचिकीर्षया ध्रुवम् ॥६२॥

स नागदत्ताभिधसार्थवाह - स्तिर्यग्गतेर्दुष्कृतकर्मशेषात् ।
तत्राऽ**ग्निशर्मे**त्यभवद् द्विजन्मा, जन्मान्तरीयात् कुकृतात् कुरूपः ॥६३॥

निस्वाग्रणीर्लुप्तसमग्रपक्षः, पक्षीव नाना-परिभूतिपात्रम् ।
अत्युच्छ्रितक्रोधधनेन किन्तु, स तत्र शेषान् धनिनोऽत्यशेत ॥६४॥

पाखण्डिनं कञ्चन शिश्रिये स, स्वयं च धर्मश्रवणाय तत्र ।
द्विको हि निम्बेन बुभुक्षुरेतत्, संवर्ग्यते केन विगीतकर्मा ॥६५॥

श्रुतत्रिदण्डिव्रतसंविधान - स्तदेव जग्राह स तत्त्ववृत्त्या ।
मणीयते काचमपि प्रकाम - मुग्धस्य दृष्टौ विततार्थसृष्टौ ॥६६॥

मासद्वयादिक्षपणान्यकार्षीत्, तपांसि तीव्राणि स बालबुद्धिः ।
संरोहणानीव सशल्यगात्रः, फलेन रिक्तानि विदुष्टचेताः ॥६७॥

भ्राम्यन् मही संसृतिवत् स मूढः, समाययौ **रत्नपुरं** कदाचित् ।
तदेव यच्छ्री**जिनधर्म**संज्ञः, श्राद्धाधिवासेन सदा पवित्रम् ॥६८॥

तत्र त्रिदण्डिष्वनुरागशाली, नन्दीव शम्भुक्रमपङ्कजेषु ।
तेजस्विमुख्योऽपि सुसौम्यमूर्त्ति - र्बभूव भूपो **हरिवाहणाख्यः** ॥६९॥

श्रुत्वाऽग्निशर्मव्रतिनस्तपस्यां, देहानपेक्षां बहुशो जनेभ्यः ।
तस्यावलोके नृपतिः सतृष्णो, बभूव दीपस्य यथा पतङ्गः ॥७०॥

निमन्त्रयामास नृपस्त्रिदण्डिनं, स प्राज्यभोज्यैः स्वगृहेऽतिभक्तितः ।
वकोटवत्तं कुटिलाशयं दिने, द्विमासपर्यन्तभवे तपस्विनम् ॥७१॥

अन्तर्बहिश्चैष दधत् त्रिदण्डं, कषायवन्मानसमंशुकं च ।
शिखामिषादुच्छ्रितपापचूला - मथाऽऽजगाम क्षितिपस्य सौधम् ॥७२॥
भक्त्या नृपोऽप्यादिशदातिथेय-क्रियाविधौ सन्निहितं जनं स्वम् ।
तस्येश्वरस्येव नगाधिराजो, विराजमानः पुलकोत्करेण ॥७३॥
श्राद्धोऽपि दैवाज्जिनधर्म आयाच्चकोरवद्द्रष्टुममुं नृचन्द्रम् ।
तत्र स्फुरद्वामविलोचनाब्ज - ससूचितामङ्गलभङ्गिसङ्गः ॥७४॥
विधुन्तुदस्येव सुधामरीचा - वोतोरिवोन्मादभृतो मयूरे ।
श्येनस्य वा क्रूरतरा कपोते, त्रिदण्डिनस्तत्र पपात दृष्टिः ॥७५॥
जन्मांतरीयानुशयानुवेधात्, सद्योऽथ सा पाटलतां प्रपेदे ।
न शत्रुमित्रत्वगतौ हि लोके, विहाय चक्षुश्चतुरं पर स्यात् ॥७६॥
तथा विनिःस्पन्दतनुर्निदध्यौ, त धार्मिक धर्मदरिद्रचेताः ।
किं देवभूयं समुपागतोऽय-मिति प्रतीये स यथान्तिकस्थैः ॥७७॥
ततस्त्रिदण्डो दृढपापचण्डः, समापतिष्यद् भवपातदण्डः ।
उद्दिश्य तं श्राद्धवरं बभाषे, पृथ्वीपति कोपकदर्थ्यमानः ॥७८॥
मामस्य पृष्ठे यदि पायसान्नं, तं भोजयस्युष्णमनुष्णचेताः ।
तत्पारणां ते सदने करोमि, चिराय सम्पूर्णसमग्रकामः ॥७९॥
दम्भोलिपातानुकृतिं प्रपेदे, वाक्यं नृपश्रोत्रपथे तदीयम् ।
मनःकुटीरे तु सभासदानां, ज्वालाजटालानलसोदरत्वम् ॥८०॥
ततः स भूपः सविषादमूचे, क्षमिन् ! क्षमं किं तव वक्तुमीदृक् ।
नाङ्गारवृष्टिं विदधाति कान्त, कदापि यच्छीतमयूखबिम्बम् ॥८१।
यतोऽतिमुग्धोऽप्यनुवर्तते विभुं, राज्ञोऽनुवृत्तौ तु जनस्य का कथा ।
द्वय त्वतिक्रान्तमिदं त्वया महा - सरित्प्रवाहेण तटोभयं यथा ॥८२॥
तदादिशाश्वन्यनरोपयोगं, स्वभोजनायात्र[1] धृतौ प्रसद्य ।
अयं तु लोके जिनधर्मरूपो, कल्पद्रुमः कल्पितकल्पनेन ॥८३॥
प्रत्याहतं सानुशयस्त्रिदण्डो, का तस्य भक्तिर्ननु येन नाऽऽत्मा ।
सर्वप्रकारेण गुरौ नियुक्तः, कार्यं ह्यभक्तेरनियोजनं यत् ॥८४॥

१. पुस्तके तु 'स्वभोजनामत्र' इति पाठः ।

यथोपदेशं न गुरूनमंस्त यः, किं तस्य जीवेन नृपश्रियाऽथवा ।
तथा हि रामः प्रविहाय सम्पदं, पित्राऽऽज्ञया संश्रयति स्म दण्डकाम् ॥८५॥

प्रत्याहुरस्तङ्गतहृत्प्रमोदाः, सभ्या असभ्याधिकभाषिणं तम् ।
तपोनिधे नास्य मनः कदर्यं, स्वप्राणदानेऽपि धराधिपस्य ॥८६॥

गुरावभक्तिर्न च सर्वथाऽपि, सुरेश्वरस्येव समिद्धधाम्नः ।
किन्त्वासमञ्जस्यभिया जयन्त, इवान्तमस्मिन्न समेहताऽयम् ॥८७॥

चूडामणिः किं चरणे निबध्यते, निजाङ्गनागोमयसंवरेऽथवा ।
वश्यापि राज्ञा न हि जातु कोविदा, मुद्राभिदः स्युः प्रभवोऽपि कुत्रचित् ।८८।

त्वमेव तावत्परिचिन्तयेदं, किं पद्मकोषे विनिवेश्यतेऽग्निः ।
विशस्यते कामदुघा दुहाना, गृहागता कामशतानि किं वा ॥८९॥

तन्त्रेषु देवायतनेष्वविवेका, शस्या पताकेव क्षपैव कामम् ।
सा पातिता स्याद्ध्रुवतैव कोप - प्रचण्डवाताज्जिनधर्मघाते ॥९०॥

इत्युक्तो बहुधा धराधिपतिना सभ्यैश्च पापोऽधमो ,
दुष्टान्तःकरणात्तथाप्यकरुणो नाऽसौ व्यरंसीत्ततः ।
स्वादोयोमधुदुग्धपानविधिभिः स्वाराधितोप्यादरा-
दादत्ते शममुग्रघोरगरलः क्रोधोद्धतः किं फणी ॥९१॥

इति युगप्रवरागमश्रीमज्जिनपतिसूरिशिष्यलेशविरचिते
श्रीसनत्कुमारचक्रिचरिते पाखण्डिप्रतिभाषणो
नाम चतुर्थः सर्गः । छ. । ४ ।

पञ्चमः सर्गः

उत्सर्गतः केऽप्यपवादतः केऽप्यर्थाः कथञ्चिद् गदिताः सुशास्त्रे ।
न राजसूयादिकमप्यवद्यं, तत्राभ्यधायीत्यवदत् त्रिदण्डी ॥१॥
राजाऽपि रज्यन् जिनधर्ममूर्त्तौ, शास्त्र-व्यवस्थां महतीं च शृण्वन् ।
प्रोवाच किं तन्त्रमतन्त्रसाम्यं, प्रापि त्वया वाणिजकस्य हेतोः ॥२॥
तत्सर्वथा शास्त्रजनाविरुद्ध - माज्ञापय ज्ञानतपोनिधान ! ।
शत्रौ च मित्रे च समा हि सन्तः, सूर्यांशवो वारिणि तेजसीव ॥३॥
नृपादिवाक्यैः किरणैरिवेन्दोः, सिक्तोऽपि नोज्झत् प्रकृतिं यथाऽग्निः ।
स तापसो नैव हि सामपात्रं, भवन्ति वालेयसमा[1] अभव्याः ॥४॥
प्रत्याबभाषे च धराधिनाथं, निस्त्रिंशचेताः स पुनस्त्रिदण्डी ।
पलालकल्पेन किमत्र भूयो - ऽभिभाषितेनेदमवेहि तत्त्वम् ॥५॥
यद्यस्य पृष्ठेन नराधमस्य, त्वं प्राशयस्यद्य तपोधन माम् ।
आजन्म किञ्चिन्न तदाशितव्यं, चित्रार्पितेनेव मयेति सर्गः[2] ॥६॥
निशम्य रौद्रीमिति तत्प्रतिज्ञां, हृदि क्षतो मित्रसुवत्सलोऽपि ।
स पार्थिवः कान्तिमुपाददे द्राक्, सम्पूर्णचन्द्रस्य तमोवृतस्य ॥७॥
घातो मुनेस्तावदिहैकतोऽय-मितोऽप्यपायः पुरमण्डनस्य ।
सेयं वरत्रा ह्युभयत्र पाशा, धात्रोपनीता सममेति दध्यौ ॥८॥
समुद्यमे धर्मकृतेऽकृतेऽस्मिन्नधर्म आयात् कथमेष भूयान् ।
अहो ! सुधायै मथिते पयोधा-वुदैतमेतत् किल कालकूटम् ॥९॥
यद्येन लभ्यं लभते तदेव, स माननीयोऽपि किमत्र दैन्यैः ।
विलोडितेऽप्यम्बुनिधौ सुरत्ने, पराप हालाहलमेव शम्भुः ॥१०॥
मन्दा हि मे भाग्यपरम्परेति, समर्पयत्येव यथा तथाऽघम् ।
तच्छ्राद्धघातेऽपि मुनेर्विघातो, माऽभून् महाहा इति तं प्रपेदे ॥११॥

---

१. रासभः । २. निश्चयः ।

ततो हिमानीहतपङ्कजास्यच्छाया निरीयुः सदसः सभार्हाः ।
महेन्द्रमृत्युव्यथिता अमर्त्या, यथा सुधर्माङ्गणतः सशोकाः ॥१२॥
निदेशतः श्राद्धवरोऽपि राज्ञः, संज्ञानतो दैन्यविमुक्तचेताः ।
अङ्गीचकाराऽपि निजाङ्गभङ्गं, विपद्यनुद्वेगधना हि धीराः ॥१३॥
क्वायं क्व चाहं क्व च भूभृदाज्ञा, तत्सर्वथा भाग्यविपर्ययो मे ।
रामाब्धिसेतूदयवानरेन्द्र - योगो यथा पुण्यजनेश्वरस्य ॥१४॥
स चिन्तयन्नित्यतिनिश्चलाङ्गो, धरातलन्यस्तसदक्षिवक्षाः ।
पुरोऽवतस्थे व्रतिनोऽस्य दृष्टया, दिशन्नधोयानमिवाशु तस्मै ॥१५॥
संप्रेक्ष्य तं तादृशसन्निवेशं, राजा स्थितिं स्वस्य तनोर्निनिन्द ।
पाखण्डिपाशस्त्वधिकं ननन्द, प्रिया हि गृध्रस्य परेतभूमिः ॥१६॥
यदा स धाम्नो जिनधर्मभानो - रीदृग्दशा दैववशात् समागात् ।
खद्योतविद्योतिषु शेषजन्तुष्वारौवकासंततभासनायाम्(?) ॥१७॥
पृष्ठे ज्वलत्पायसपूर्णपात्रो-ऽप्यसौ सुधर्मा विजहौ न धैर्यम् ।
मेरुर्न सर्गान्तिनिरर्गलोद्यद्वाताभिघातेऽपि सवेपथुः स्यात् ॥१८॥
सन्तप्तपात्रं बहिरस्य गात्र-मन्तःशुभध्यानमुवोष रोषम् ।
वियोगिनश्चन्दनविप्रयोगा-दिव द्वयं सन्ततमक्रमेण ॥१९॥
ध्रुवं मयैवैष विराद्धपूर्वो, दुःशासनेनेव समीरसूनुः ।
शेषानशेषानपहाय दूरा-ददुद्रुवन् मां कथमन्यथाऽनु ॥२०॥
न चान्यदोषेण ममैष दाहो, यदन्यथावृत्ति न जातु कर्म ।
बृहस्पतिं न ग्रसते कदाचिद्विधुन्तुदश्चन्द्रमसा विराद्धः ॥ २१ ॥
ददाति दुष्कर्मफलं पुराऽपि, तत्सम्यगेतर्हि न सह्यते किम् ।
न शल्यमन्तःकुथितं विनाऽऽप, मृत्युं हि विश्राम्यति कालपाके ॥२२॥
अत्यल्पमेतन्मदनातुराणा - मस्मादृशामुज्ज्वलदोषभाजाम् ।
विराद्धदर्वीकरतः[1] किलाऽऽखो-र्लूमा[2]-ऽवलोपात् कुशलं कियद्वा ॥२३॥

---

१. सर्पात् । २ पुच्छः ।

न संयमं येऽभ्युपयन्ति तेषा-मीदृग् भविष्यत्यसकृद्विपत्तिः ।
किं दुर्विनीतास्तुरगाः सकृत्स्युः, कशाप्रहारप्रचयस्य पात्रम् ॥२४॥
इत्यादिसद्ध्यानपरो विषेहे, सतां व्यथामव्यथितान्तरात्मा ।
यावत् कुलिङ्गी निजगाल सर्वं, तदन्नसंज्ञान्तरितं कुकर्म ॥२५॥
उपायनं प्रेषितमात्मरुच्यं, तूर्णं समेष्यत् कुगतिश्रियेति ।
तत्त्वग्विदाहाशुभगन्धमिद्धं, रागात् कुलिङ्गी ध्रुवमभ्यनन्दत् ॥२६॥
तथा स लिङ्गीकृतपारणाविधिः, स्वं नाकनाथादपि बह्वमन्यत ।
को वा भवेन्नाधिकतोषभाजनं, महामनोराज्यसमृद्धिसिद्धितः ॥२७॥
अमङ्गले मूर्त्तिमतीव मन्दिरा-न्नृपस्य चेतोऽसुखसन्ततावित्र ।
अनर्थशाणाश्मनि लिङ्गजीविनि, क्रान्ते निजाचारमलीमसं वनम् ॥२८॥
उत्पाटयामास ससम्भ्रमं जनै-र्यावन् महीशः करुणार्द्रमानसः ।
स्थालं तदीयान्मृदुपृष्ठदेशतः, कुलिङ्गिसङ्गादिव शौचवर्जितम् ॥२९॥
त्वङ्मांसरक्तोल्वणनाडिभेदैस्तावत् समं तत् करगर्भमागात् ।
आकृष्यमाणं हि दिगङ्गनाभि-र्नोदेत्यनुस्रं विषमाश्वबिम्बम् ॥३०॥
त्रिभिर्विशेषकम् ॥

अथाऽवनम्य क्षितिपालमौलिं, सलज्ज-सप्रेमदृशा च तेन ।
अन्तःपरिस्तम्भितभाषितेन, निरीक्ष्यमाणो निरगात्ततोऽसौ ॥३१॥
चक्षुःसुधावृष्टिमपि प्रकामं, तं तादृशं वीक्ष्य शुशोच लोकः ।
विधुन्तुदात्यन्तकदर्थितश्रि, सौधाकरं बिम्बमिव प्रसन्नम् ॥३२॥
न तस्य तादृग्व्यसने प्रमोदः, कस्याप्यभूत् तत्र पुरेऽखिलेऽपि ।
कल्पद्रुमस्कन्धकुठारपातः, किं कस्यचित्तोषविशेषकृत् स्यात् ॥३३॥
बाष्पप्लुतस्निग्धविलोचनाम्बुजैश्चकार पीतैरिव बान्धवैरसौ ।
संवीक्ष्यमाणः क्षणतो निजान् गृहानायाद्विशुद्धो जिनधर्मचन्द्रमाः ॥३४॥
समाललाप स्वयमेव बन्धून्, स सूनृताभाषणकोविदः स्वान् ।
कर्णामृतस्यन्दिवचःप्रदानं, पुंस्कोकिलं शिक्षयतीह को वा ॥३५॥
भूपप्रसादा विपुलाः श्रियो वा, त्राणं न दैवस्य विपर्यये स्युः ।
आलम्बनं नैव कराः सहस्रं, सहस्रभानोः पततः प्रदोषे ॥३६॥

शरीरमप्येतदसारमुख्यं, विख्यातमेवाशुचिजालमूलम् ।
आपातमात्रे च मनोहरं सद्दधाति लीलां विकचाम्बुजस्य ॥३७॥
विशेषतश्चाद्य मदीयमङ्गं, निवृत्तनैसर्गिकसर्ग[1]-रूपम् ।
विहाय कान्तास्पृहणीयभावं, वृकद्विकप्रीतिकरं बभूव ॥३८॥
तदस्य लाभः परिगत्वरस्य, पोतस्य सिन्धाविव पातुकस्य ।
युक्तः समादातुममूढबुद्धि-विपद्यपि स्याद्धि विवेकिलोकः ॥३९॥
तद्बान्धवा अस्मदनुग्रहोद्यता, दद्ध्वमत्रानुमतिं ममाधुना ।
आमुष्मिकं कार्यमलंचिकीर्षतः, शिशोरिवैकान्तनिजार्थचेतसः ॥४०॥
अभ्यर्थिता एवमशेषबान्धवाः, सप्रश्रयाः प्राहुरमुं विवेकिनः ।
गतिः खरांशोरिव शुद्धमार्गतो, मतिर्विपर्येति किमेकदाऽपि ते ॥४१॥
प्रसादवत् सत्यहितं मनोहरं, कस्त्वामृते वक्तुमपीदृश क्षमः ।
विना विधुं को हि नभोविभूषण-क्रियाविनिर्माणकलाविचक्षणः ॥४२॥
कार्यं यदामुष्मिकमीहितं ते, तत्सर्वसाधारणमेव किन्तु ।
वयं न हि त्वादृशसत्वभाजो, मृगाः कथं सिंहपराक्रमाः स्युः ॥४३॥
स नूनमुर्व्यां सुकृतो कृती त्वं, नेदृग्दशादायिनि यस्य कोपः ।
किमग्निरिद्धेन्धनसन्ततिः क्वाऽप्यास्ते ह्यनुद्दीपित एव वाते ॥४४॥
गेहं च देहं च समं तृणेना-ऽऽकलय्य तित्यक्षुरुदारमौलिः ।
वित्तादिविश्राणनमात्रवित्तान्, कर्णादिवीरान् जयसि त्वमेव ॥४५॥
ततो वयं चेन्न विधातुमीश्वरा, धर्म्या क्रियां सात्त्विकसाधनोचिताम् ।
तवाऽपि कुर्मोऽत्र किमन्तरायक, प्रवर्त्तमानस्य परेपरा[2] इव ॥४६॥
तदस्तु ते वाञ्छितकार्यसिद्धि - रव्याहतश्रीजिनधर्मधर्मिन् ।
अस्माकमप्यादिश कृत्यजातं, परोपकारप्रवणा हि सन्तः ॥४७॥
प्रत्याबभाषे जिनधर्म एतान्, वस्त्राशनालङ्कृतिदानपूर्वम् ।
कुर्वन्ति किं कृत्यविदः कदाचिदौचित्यभङ्गं व्यसनेऽपि धीराः ॥४८॥

---

१. उत्पाद । २. शत्रवः ।

पुत्रः स तत्त्वेन त एव सोदरा, जायाऽपि साऽन्येऽपि त एव बान्धवाः ।
ये मां विनाप्यार्हतमार्ग उज्ज्वले, चिरं भविष्यन्ति निलीनमानसाः ॥४६॥

युष्मासु केनाऽपि समं मयाऽपि, प्रमादतः प्रान्तजनायितं यत् ।
तन्मर्षणीयं न हि जातु भव्या, द्विष्टेऽपि विद्वेषयुजो भवन्ति ॥५०॥

भूपालमापृच्छ्य समर्च्य चार्चा, यथाविधिश्रीविधिचैत्यसस्थाः ।
सुसंघमादृत्य विशेषमानैः, समर्थ्य चार्थिप्रणयप्रबन्धान् ॥५१॥

सत्त्वैकनिष्ठः क्रमबद्धकक्षः, प्रौढोपसर्गद्विरदावमानी ।
गुहान्तरात् सिंह इव स्वगेहात्, स निर्ययौ सन्निहितार्थसिद्धिः ॥५२॥
युग्मम् ।

क्रमेण चाभ्युन्नतवंशमाप, प्राप्तप्रतिष्ठं नृपवत् पृथिव्याम् ।
आकाशवल्लुब्धकसिंहघोरं, पातालवद्व्यालकुलाकुलं च ॥५३॥

समस्तसत्वानिव योगपद्या, दत्तुं सदा व्यात्तदरीशतास्यम् ।
दिनेऽपि नीलद्रुमदीर्घपङ्क्ति - र्व्याजादनिर्मुक्तमहान्धकारम् ॥५४॥

गृध्रद्विकादिध्वननाट्टहासै - रुत्त्रासयन्तं ध्रुवमाशु पान्थान् ।
नदच्छिवास्याग्निशिखावलीढं, शङ्के सदावं निशि दृश्यमानम् ॥५५॥

कलिञ्जरं नाम महानगेन्द्र, समारुरोहाऽथ निधिः स धाम्नाम् ।
प्रातर्विवस्वानिव रक्तमूर्त्तिः, पूर्वाचलं भासितशुद्धमार्गः ॥५६॥
चक्कलक चतुर्भिः ।

अष्टादशप्राणिवधादिपाप - स्थानेभ्य आत्मानमभिग्रहेण ।
न्यवर्त्तयत् सत्वरमाभव स, त्रिधा त्रिधा प्रौढमुनीन्द्रनीत्या ॥५७॥

गतीश्चतस्रोऽपि निरोद्धुमेक - वारं वरो नूनमनूनभाग्यैः ।
प्रत्याचचक्षे च विचक्षणोऽसौ, चतुर्विधं भोजनमप्यतृष्णः ॥५८॥

स्थैर्यं बहिर्व्यञ्जयति स्म लोके, देहोपमानेन ह्रदः स मन्ये ।
भुक्त्युज्झितस्तम्भसुरूपदेह - स्थितिक्रियारूपदशापदेशात् ॥५६॥

ऊर्ध्वाङ्गयष्टिर्जिनमुद्रयाऽस्थात्, स तत्र निस्पन्दतरप्रतीकः ।
उच्चैः पदं तूर्णमिवारुरुक्षु - र्निष्प्रग्रह[1]-स्तार्क्ष्य इव ध्वजाग्रम् ॥६०॥

---

१. निष्प्रतिबन्धः ।

नासानिविष्टस्तिमिताक्षिपङ्कजो, ध्यायन् परं ब्रह्म समाधिसङ्गतेः ।
तथाऽवतस्थे प्रतिमागतो यथा, व्यभाव्यताश्मप्रतिमेत्यसौ जनैः ॥६१॥

घोरे घनव्यालकुले गिरीन्द्रे, सहस्रशोऽर्हनिशमापतन्तः ।
तत् क्षुद्रसत्वा इव तस्य लोके, केनोपसर्गाः शकिताः प्रमातुम् ॥६२॥

गृध्रैः पलाशैरिव मांसगृद्धैः शिवाभिरुद्दीपितवाशिताभिः ।
विदार्यमाणोऽपि स पृष्ठदेशे, चचाल नैवाचलराजधैर्यः ॥६३॥

महाऽहिना कण्ठविलम्बिनाऽसावुमापते रूपमधश्चकार ।
विषेण नीलाङ्गरुचिः प्रकामं, श्रियं च तद्दशशतैर्मुरारेः ॥६४॥

अलम्भयत् काकवृकौघमेष, स्वास्थ्यं सरक्तैस्तनुमांसपिण्डैः ।
किं चन्दनः स्वाङ्गपरिव्ययेन, प्रमोददायी न भवेज्जनस्य ॥६५॥

गृध्रादितो बाधनमादिनान्तं, शिवादितश्चामृगलाञ्छनास्तम् ।
नक्तं दिवं तूग्रभुजङ्गमादे, क्षाम्यन् क्षणं तद्विकलः स नासीत् ॥६६॥

दुर्योधकर्मारिरणे प्रवृत्तः, सहायबुद्धया तदमंस्त सर्वम् ।
स धीरधुर्यो दशवक्त्रसङ्ख्ये, यथैव रामः कपिराजसैन्यम् ॥६७॥

पक्षं स तस्थाविति माघवत्यां, याम्यादिदिक्क्रुप्यति मात्रमेवम् ।
सर्वा दिशः सत्त्ववतां समाना, लाभेऽदिशन्नूनमिद जनानाम् ॥६८॥

तं कञ्चन प्राप समाधिभेदं, स तत्र तत्त्वैकनिमग्नचेताः ।
येनाऽभवं सद्गतिपक्ष्मलाक्ष्याः, कटाक्षपात्रं भविता ध्रुवं सः ॥६९॥

स्वशिल्पकोटीरुपसर्गनाम्ना, छन्नाः प्रदर्श्येव चतुर्थगत्या ।
स नीरसस्तत्र विभाव्य नून, दूर विरागान् मुमुचे सदाऽपि ॥७०॥

पञ्चातियत्नात् परमेष्ठिपादा - नाराधयन्तं कुपिता इवाऽत्र ।
स्ववृत्तिरोधेन समानसङ्ख्याः, खाख्यारयो नूनमपीडयस्तम् ॥७१॥

मासद्वयेनाऽथ विहाय देहं, गेहं गदानां सुभग भविष्णुः ।
दिव्याङ्गनार्थीव समुत्पपात, नभः प्रति द्राक् जिनधर्मजीवः ॥७२॥

साम्राज्यमीदृग् न जगत्त्रयेऽपि, ध्रुवं विचिन्त्येति तदीयपुण्यैः ।
आराधितस्वामिसमर्पवितीर्णं, सौधर्मनाकाधिपतित्वमस्य ॥७३॥

यत्र द्युतिद्योतितदिग्विभागा, विभाकरोल्लासिविभासगोत्रा ।
गात्रस्य या सान्द्रतमाऽपि धत्ते, समीपगा मर्त्यगणस्य कान्तीः ॥७४॥

वसन्तपुष्पेषु मृगाङ्कपद्म-श्रियं गृहीत्वा ध्रुवमङ्गलक्ष्मीः ।
विनिर्ममे यत्र स यत्नधात्रा, यतः समस्तैतदनुत्तरा सा ॥७५॥

असङ्ख्यसंवत्सरकोटिरूप - द्विसागरोन्मानमहीनमायुः ।
यत्राऽभव भूरिसुखावमग्नैः, प्रपूर्यते कालकलेव पूर्णम् ॥७६॥

सौख्योपभोगा अपि कामसिद्धा, अनन्यसाधारणहेतुजत्वम् ।
आख्यान्ति सद्वर्णभिदो हि केकि-पिच्छच्छटाया इव यत्र शश्वत् ॥७७॥

यस्मिन्नशीतिर्चुसदां सहस्राः, सामानिकानामधिका सहस्रैः ।
चतुर्भिरेवाप्सरसोऽपि कान्ता, अष्टौ जिताऽष्टापदकान्तिका याः ॥७८॥

सामानिकेभ्योऽपि चतुर्गुणाः स्युर्यत्राङ्गरक्षाः शुचिलोकपालाः ।
सभाविमानव्रजशान्तिकर्म - प्रवेदिनस्तु प्रचुराः सुरुच्याः ॥७९॥

नान्यत्र नाकेऽपि समृद्धिरीदृग्, विमानपत्यप्सरसां शुचीनाम् ।
इतीव यत्रार्हतमज्जनेऽपि, मुख्याधिकारित्वमजायतोच्चैः ॥८०॥

विचित्रसद्रत्नकरम्बिताङ्का - लङ्कारकान्तिच्छुरिताङ्गयष्टिः ।
यस्मिन्कदाचिन्न महेन्द्रचापा - चितान्तरिक्षश्रियमुद्ववाम ॥८१॥

विमानमप्यच्छतरार्कभित्ति - गर्भमरालोपतिबिम्बचित्रम् ।
नालेख्यकर्मप्रतिसाधनाभि - मुख्यं भजत्यद्भुतकान्ति यत्र ॥८२॥

आजन्म यत्रेन्द्रियसन्निधानं, भजन्त्यहृद्याः खलु नेन्द्रियार्थाः ।
समुत्कटप्रस्फुटगीतमुख्यौ - रुत्त्रासिता नूनमरिप्रकाण्डैः ॥८३॥

न यत्र निद्रान्ति कदापि पुष्पाण्यस्वप्नसम्पर्कवशेन नूनम् ।
किं चम्पकाचञ्चलगन्धपात्रं, तत्सङ्गतः स्वादुतिला नहि स्युः ॥८४॥

यत्रानिमेषा अपि कामकेलौ, कान्ताकुचस्पर्शनिमीलिताक्ष्याः ।
मुहूर्त्तवद्वर्षशतं नयन्ति, निष्ठा प्रमोदामृतसिन्धुमग्नाः ॥८५॥

शैलेषु वापीषु विलासिनीषु, कदाचिदुद्यानलतागृहेषु ।
विलासिचेतोभिरिव प्रकामं, यत्र प्रसर्पद्रति दीव्यते च ॥८६॥

यस्याधिपत्यान्यखिलानि शेषाण्यधुः श्रिया दास्यविलासमेव ।
तदाप्य रेजे जिनधर्मसत्त्वः, कलाकलापं हि यथा कलावान् ॥८७॥

तस्यामरश्रेणिविनम्रमूर्ध्व - रत्नप्रभानित्यकरम्बिताग्रा ।
व्यक्ताऽपि भाभा रचिता न सम्यग्, व्यभाव्यतांह्रिद्वितया सभार्हैः ॥८८॥

न शासनं शस्त्रमिवास्य कश्चित्, तीव्रप्रतापं क्रमितुं शशाक ।
को वा हितार्थी कुपिताऽहितुण्डं, चण्ड परिस्प्रष्टुमिहाद्रियेत ॥८९॥

न्यरूपयन्नाटकमग्र्यरूपकं, दशाङ्कमेकान्तमनोहरं सताम् ।
डिमन्तु नैवैष शुभाऽशुभान्तरज्ञा एव हि स्युर्विबुधाधिनायकाः ॥९०॥

भवोद्भवानन्दविभुत्वसार - सर्वस्वलोलानिलयस्य तस्य ।
जग्मुः प्ररूढं जन्मान्तरीय - श्रेय फलं स्वादयतः समौघाः ॥९१॥

त्रिजगतिरमणीया नैव सम्भोगभङ्ग्यः,
क्वचिदपि हि ततोऽपि प्राप यास्तत्र शक्रः ।
किमु किमपि महीयो द्रव्यमस्त्यम्बराद -
प्यमरगिरिपतेरप्युन्नतो वा गिरीन्द्रः ॥९२॥

इति युगप्रवरागमश्रीमज्जिनपतिसूरिशिष्यलेशविरचिते
श्रीसनत्कुमारचक्रिचरिते शक्राभ्युदयवर्णनो
नाम पञ्चमः सर्गः । छ. । ५ ।

षष्ठः सर्गः

त्रिदण्डिनोऽप्येवमपुष्यदुग्रा - भियोगिकं कर्म महाभटाभम् ।
यथा तमाकृष्य हि नारकारेः, स्ववश्यतामानयदेतदाशु ॥१॥

ततः स तेनैव सुदुष्टकर्मणा, विडम्ब्यतश्चैत्र रतेन पापिना ।
इन्द्रस्य तस्य प्रथितोरुवाहन - द्विपत्वमासूत्रयतातिदुस्सहम् ॥२॥

अहो ! दुराचारमयं कुकर्म, त्रिदण्डिनः सत्वरमेव पक्वम् ।
यदारसन्दूरविलज्जमानः, स वाह्यते स्मात्र निरन्तरार्त्तिः ॥३॥

संस्मार्य संस्मार्य पुरा कृतानि, शत्रानुयातैरतितुन्द्यमानः ।
सोऽन्तस्ततापाफलमेव हस्ती, यथा चिरं सेचनको व्रतस्थे ॥४॥

विवेकशून्यैर्मुदितैः परेषु, वितीर्यते यद्व्यसनं फलेत् तत् ।
अन्तर्दहद्दुष्टविपाकमारात्, कुतोऽन्यथाऽमुष्य तथेभभावः ॥५॥

तत्रान्तरैर्दुःखशतैर्वितप्तः, स कायिकैर्नारकबाधजैत्रैः ।
अदृष्टशत्रुप्रकृतापमानान्, शशंस शश्वत् स हि दुर्गतिस्थान् ॥६॥

न तानि दुःखानि न तस्य यानि, स्वर्गेऽपि भाग्यात्ययनिर्मितानि ।
सदाऽभवन् वाक्पथदूरगाणि, शक्रस्य सौख्यानि यथा सुभाग्योः ॥७॥

सोऽमोचयत्तं न दयापरोऽपि, दस्युं यथा प्रौढकदर्थकेभ्यः ।
अवद्यतत्कर्मनिरुद्धवृत्ति, त्वतो ध्रुवं दारुणदुःखदग्धम् ॥८॥

शक्रोऽपि तत्रैव समारुरोह, प्रायो विमुच्येतरवाहनानि ।
अवश्यसवेद्यफलं हि कर्म, न कारयेत् किं किमिहाङ्गभाजाम् ॥९॥

तं हस्तिमल्लं दधिदुग्धमुग्ध-मारूढ इन्द्रोऽपि विभूषिताङ्गः ।
कैलाशशृङ्गोद्गतकल्पवृक्ष - श्रियं दधौ धौतविभूषणौघैः ॥१०॥

ऐरावतस्यापि सिताङ्गकान्त्या, विनिह्नुता दैत्यजनस्य दन्ताः ।
दत्त्वा मुदं मन्युमदुः क्षणेन, प्रौढप्रहारैः समरेषु शश्वत् ॥११॥

पराजयस्सयतिना सुरेभ्यः, शक्रस्य सम्मूर्छदतुच्छशस्त्रे ।
सहस्ररश्मेरिव तारकेभ्यो, बभूव धामोदयदुर्द्धरेभ्यः ॥१२॥

सैन्यान्यपि त्रातदिवः स्वधामभि-र्विभूषणान्येव सुराज्यसम्पदः ।
तस्याऽभवन् बोधितकैरवाकर-स्येन्दोः करैरेव हि तारका इव ॥१३॥

न खण्डिता कापि कदाचिदासीद्, देवी महान्तःपुरसंयुजोऽपि ।
तस्याऽथवा मन्युकृतो वधूनां, किं दक्षिणाः क्वापि च नायकाः स्युः ॥१४॥

सम्भोगभङ्गिष्वपि तत्प्रहारा, न निर्दया अप्यभवन् वधूनाम् ।
दुःखाय किं चण्डरुचेर्भवन्ति, त्विषो नलिन्याः परितापदात्र्यः ॥१५॥

सर्वाजितस्यापि च तस्य जेता, ह्येकः परं पुष्पधनुर्बभूव ।
तद्भृत्यलेशा अपि येन देव्यो, ददुर्भयं कोपविकम्पितोष्ठ्यः ॥१६॥

जिनेन्द्रकल्याणकपञ्चकेऽपि, स्नानादि सर्वर्द्धिवृषा चकार ।
सम्यग्दृशां स्फातिभृतः समृद्धेः, सुपात्रनिक्षेपमृते फलं किम् ॥१७॥

न चक्षमे शासनलाघवं स, साक्षाज्जिनेन्द्राच्छ्रुततद्विपाकः ।
को वा बले स्फूर्जति भर्तुराज्ञा-, विलङ्घनं भृत्यवरः सहेत ॥१८॥

स भूयसा कामपरोऽपि धर्म-मपि प्रयत्नेन चकार जातु ।
रुच्यं न यत् स्यादशनं कदापि, स्वाद्वप्यहो सल्लवणं विनेह ॥१९॥

नानारतक्रीडितहर्षभाजः, सङ्ख्यापरिद्वेषिणि तस्य काले ।
क्षीणेऽथ रज्जाविव मृत्युकूप-प्रपातसाम्मुख्यमसौ प्रपेदे ॥२०॥

कल्पद्रुकम्पप्रचलायितादि-लिङ्गैः समासन्नमवेत्य मृत्युम् ।
षण्मासशेषायुरसौ विशेषा-देकान्तपुण्यार्जनतत्परोऽभूत् ॥२१॥

विषादमार्गं न तदापि चेतो, जगाम तस्यातिविवेकभाजः ।
कालुष्यपात्रत्वमुपैति वर्षास्वपि प्रसन्नं किमु मानसं वा ॥२२॥

प्रदीपवन्नीरदखण्डबद्धा, क्षणेन स स्वर्गपतिर्विलिल्ये ।
आयुःक्षये वायुविधूतवृन्त-बन्धं स्थिरं किं कुसुमं भवेद्वा ॥२३॥

ततोऽमरश्रेणितदङ्गनानां, प्रस्फोटयन्नम्बरमुच्चचार ।
आक्रन्दनादस्त्रिदिवे निनादा-द्वैतं वदन्नूनमतीवतारः ॥२४॥

उद्यानमुद्भ्रान्तसमस्तसूनं, व्योमस्थलं मेघविलुप्तचन्द्रम् ।
ततः सरो लूनसहस्रपत्रं, यथा तथाऽभूत् त्रिदिवं गतश्रि ॥२५॥

शोकातुराणाममराङ्गनानां, हस्ताग्रविन्यस्तकपोलभाजाम् ।
अधोमुखानां दधति स्म हार-स्रजः स्रवद्बाष्पकणालिलोलाम् ॥२६॥

निवृत्तसङ्गीतकलास्यलीला - सभा निदद्राविव नर्त्तकीव ।
सुस्तम्भशालिन्यपि चाऽऽचकम्पे, प्रभौ तदामीलितनेत्रपद्मे ॥२७॥

प्रागेव शक्राद् विजहौ किलासा-वैरावतो वाहनताविभीतेः ।
कुकर्मसाहाय्यमवाप्य तीव्रं, प्राणान् निजान्नूनमुदीर्णशोकः ॥२८॥

तदाभियोग्यं गुरुकर्म तिर्यग्गत्याह्वयेनास्य ततः प्रसह्य ।
कर्मान्तरेणोपचितेन मल्लो, मल्लान्तरेणेव बताऽऽबबाधे ॥२९॥

चेद् दुर्गतेस्तुल्यमहं न देयं, दातुं क्षमाऽस्मै निजवल्लभाय ।
तत्कि मयेतीव विपक्षमन्योस्तिर्यग्गतिर्मक्षु तमाजुहाव ॥३०॥

स्वाभ्यासग तं नरकाधिकैः सा, काष्ठागतैर्दुःखशतैः प्रदेयैः ।
आत्मानुरूपैः समयोजयद् द्राक्, स्पर्द्धा हि किं किं न विधापयेद्धा ॥३१॥

गत्यन्तरारक्तमवेक्ष्य तं प्राक्, तया नवाभिर्बहुभिर्दशाभिः ।
तथा ददत्यापचितिं स जह्ने, ध्रुवं यथा तां न जहौ चिराय ॥३२॥

तैरश्च्यदुःखानि निरन्तराणि, स्निग्धाशनानीव निषेवमाणः ।
तीक्ष्णोपदशानिव मर्त्यकृच्छ्र - भेदानसावाश्रयदन्तरन्तः ॥३३॥

जरा सशोका सरुजा दरिद्रता, बाधिर्यसान्निध्यवती महान्धता ।
भयादिवैकैकमशिश्रियन्त त, मानुष्यके दुःखमलघ्वपि क्षणम् ॥३४॥

मलीमसच्छिद्रितजीर्णवासाः, सर्वं सितस्तत्र कदन्नभोजी ।
दुष्कर्मणा सङ्गमिहैव मा स्म, कार्षीदितीवोद्वहताभिसन्धिम् ॥३५॥

पुनः स तिर्यक्षु पुनर्मनुष्येष्वेवं परावृत्य भवेति भूम्ना ।
कालेन केनाऽपि सुकर्मणासौ, खद्योतकद्योतचलेन जज्ञे ॥३६॥

प्रकोपनो व्यन्तरसञ्ज्ञितेषु, देवेषु तेजोजितभानुमत्सु ।
पराक्रमाक्रान्तविपक्षलक्षः, श्यामावदातो ह्यसिताक्षयक्षः ॥३७॥
युग्मम् ।

चिक्रीड च क्रीडितकामकेलि - सक्तामरद्वन्द्वमनोहरेषु ।
निजप्रियाश्लिष्टभुजान्तरालः, स नन्दने कल्पलतागृहेषु ॥३८॥

शैलेष्वपि प्रोषितभर्तृकाणां, वितीर्णदृष्टिर्ज्वलनेषु शृङ्गैः ।
फुल्लत्तमालासनचम्पकाढ्यैः, प्रियासखो निर्झरभूषु रेमे ॥३९॥
कौसुम्भवस्त्रास्विव सुन्दरीषु, चक्राह्वयद्वन्द्वशतैश्चकार ।
विलासवापोष्वपि मज्जनेषु, कान्ताकुचास्फालनदर्शनानि ॥४०॥
अन्येष्वपि स्वर्गसनाभिदेशेष्वसौ चरन् मानसमाससाद ।
सरः कदाचिन्मृदुशीतवायु - प्रनर्तिताम्भोरुहराजिराजि ॥४१॥
यदुच्छलद्भिर्जलशीकरौघैः, प्रसृत्वरैर्व्योमनि शुद्धवृत्तैः ।
नभश्चरान् कौतुकिनस्ततान्, मुक्तोत्करादानविहस्तहस्तान् ॥४२॥
शनैश्चलद्वीचिपरम्पराभिः, कटाक्षमालाभिरिवोपरुद्धम् ।
द्रष्टुं यदासन्नतमां तरूणां, कान्तां तति दृष्टिसुखां सलीलम् ॥४३॥
समुद्रविस्तारविडम्बिदीर्घो - पान्तद्रमालोप्रतिबिम्बनीलम् ।
रेजे ध्रुवं यच्च समीपवर्ति-वन्योपभोगाय नभोवतीर्णम् ॥४४॥
अत्यन्तशीताम्बु यदुष्णकाले-ऽप्यकम्पयत् स्नानकृतो मृगाक्षीः ।
कि वाऽद्भुतं याति न जातु जात्य, स्वर्णं विदाहेऽपि यदन्यथात्वम् ॥४५॥
अनाप्तकालुष्यमहो यदच्छा-द्वैतस्वरूपं जलदागमेऽपि ।
अशुद्धसङ्गेऽपि विशुद्धता स्याद्, या सा शुचित्वस्य परा हि काष्ठा ॥४६॥
स्वच्छाम्बु दूरादपि राजहंसाः, समेत्य वर्षास्वपि यद्भजन्ते ।
साधारणान्नैव हि हेतुमात्राद्, भवेदसाधारणकार्यसिद्धिः ॥४७॥
जलेन सम्पृक्तमपीह दुग्धं, ततो विविच्यैव पिबन्ति हंसाः ।
ये तेऽपि यद्वारिसुधारसेन, समं पिबन्तस्ततृपुर्न जातु ॥४८॥
कर्पूरकक्कोललवङ्गपुष्प - परागसङ्गान्निचितान् द्विरेफैः ।
यत्राभिसस्रुर्नवराजहंसान्, प्रियभ्रमान्धाः परदुष्टकान्ताः ॥४९॥
एलालताकेलिगृहोपगीत - सत्किन्नरद्वन्द्वकलस्वनेन ।
ध्रुवं समीरो हृतवाहनत्वाच्छनैः शनैर्यत्र वहत्यजस्रम् ॥५०॥
बिसोपयोगेऽपि मृणालिनीनां, हंसेषु नो यत्र पराङ्मुखत्वम् ।
माता ह्यपत्येषु कदापि दृष्टा, नावत्सला स्तन्यरसं पिबत्सु ॥५१॥

यच्चक्रवाकैः करुणं रुवद्भि - विलासिनो बोधयतीव नक्तम् ।
माऽकार्ष्ट कोपाकुलिता अपि क्वाऽप्ययोगबुद्धिं दयितास्वितीह ॥५२॥
बबन्ध निर्वृत्ततृतीयमानं, पार्श्वद्वये मिश्रितचक्रहंसम् ।
यस्याद्भुतां मौक्तिकपद्मराग-स्रजं सुखावासपणाय नूनम् ॥५३॥
सर्वर्तुपुष्पोन्मदसिद्धसङ्ग, यत्तीरसंरूढवनं श्रितानाम् ।
सञ्जायते किं नरसुन्दरीणां, ननन्द नोत्कण्ठि कदापि चेतः ॥५४॥
विशालमप्युन्नतशालकान्तं, पुष्टार्जुनं क्रीडितधार्तराष्ट्रम् ।
विषस्य धामाप्यमरोपभोग्यं, यत्कन्दलभ्राजि सराजहंसम् ॥५५॥
सदामरप्रार्थ्यमहोपभोगे, सरोवतंसे विनिविष्टरागः ।
स प्रस्मृतस्वीयनिवाससौख्यस्तत्रैव नित्यं स्थितिमाबबन्ध ॥५६॥
रतान्तमन्दायितमीनकेतु - प्रबोधकृत् कोकिलनादरम्ये ।
उवास सोऽखण्डितकान्तकान्ता-ऽऽश्लिष्टाङ्गयष्टिः किल तत्र भूम्ना ॥५७॥
सौधर्मनाथोऽपि सुधर्मयोगाद्, दिवः प्रपत्याऽपि पराप लक्ष्मीम ।
कार्मकसम्पादकशाक्रसम्पज्जित चतुर्वर्गदशक्तिमत्वात् ॥५८॥
मर्त्येन्दिराभ्यः सकलाभ्य ऊर्ध्वं, शक्रश्रियोऽप्यद्भुतलब्धिमत्वात् ।
इतीव पुण्याधिपतिः प्रसन्नस्तस्योत्तम चक्रिपद विलेभे ॥५९॥
समस्तपुष्यत्पुरुषार्थमौलि - निःश्रेयसश्रीपरिरम्भदाक्ष्यम् ।
यत्राविरस्ति स्मरसायकौघैर्यथा पटुत्वं प्रशमापनोदे ॥६०॥
निःशेषसूक्ष्मादिशरीरिमाता, क्षमादिरत्नाङ्कुररोहणाद्रिः ।
धर्मोऽपि यत्रामृतसौख्यलक्ष्मी-विलासहेतुर्भवतीव वश्यः ॥६१॥
अर्थोऽपि विश्वार्थवतां यदि स्युः, समुच्चिताः क्वापि च कोशकोट्यः ।
मीयेत ताभिः परमो यदोयो, यक्षादिनानामरसाध्यवृद्धिः ॥६२॥
स्वीया इवार्था भुवनैः प्रकृष्टास्तावद्भिरेवातिभयाद्वितीर्णाः ।
स्वरक्षणार्थं बत चक्रभाजो, रत्नानि यत्रेति चतुर्दश स्युः ॥६३॥

नूनं सर्वार्थसम्पद्भिरचनचतुराश्चण्डरोचिःप्रवेका,
वश्यत्वं यान्ति यस्मिन्नवनिधिमिषतस्तद्ग्रहास्ते नवाऽपि ।

निष्प्रत्यूहावदानाऽनुदितगदलवा सार्वभौमत्वहेतु-
स्तत्राशु स्याद्गरीयस्यपि कथममिता ह्यन्यथा कार्यसिद्धिः ॥६४॥
यक्षेभ्यो धामवद्भ्योऽप्यधिकगुणभृतो यद्वयं दृश्यसेवा-
स्तत्काकोड्डीनतुल्यात् स्वरुचिगमनतो मा स्म भूद्गर्व एषाम् ।
इत्यङ्गीकृत्य नूनं परमशुचिपदं राजहंसस्वरूप,
द्वैगुण्यं यत्र तेभ्यो मुकुटधरनृपाः सन्तत धारयन्ति ॥६५॥
ग्रामारामाभिरामाऽऽननननलिनललल्लोललावण्यलक्ष्मी-
पानव्याबद्धतृष्णाभरतरलतरत्तारनेत्राध्वनीनाः ।
पादांत[1] वोरतोद्यं सममपि नियत सख्ययाऽल विजेतुं,
नूनं शृङ्गारसारा इति रुचिरतमा यत्र सर्वे भवन्ति ॥६६॥
सेनाङ्गान्यङ्गभावं समरभुवि जयस्याशु तुल्य भजन्ते,
तुल्यान्येवैकचित्ता इव सुभटघटाः स्फूर्त्तिभाजोऽपि लोके ।
इत्यालोच्येव शश्वत् करितुरगरथ शिश्रिये यत्र साम्यं,
किं वा सम्पद्यते नोपचितसुकृततः कल्पवृक्षादिवाग्र्यात् ॥६७॥
अस्माभिः साम्प्रत किं निरुपमसुखकृत् सङ्गम सङ्गतानां,
संदोहैः कामिनीनामिव सकलजगत्सारधातुप्रतीतैः ।
बन्ध्यैः संगुप्तभावादकृतपरिचयैश्चक्रिणा चारुधाम्ना,
नूनं प्राकाश्यवश्या इति निखिलभुवोऽप्याकरा यत्र च स्युः ॥६८॥
यत्र स्युस्तुङ्गसौधावलिशिखरलसद्दिव्यगीतप्रबन्ध-
प्रेक्षाक्षिप्तेक्षणानां विरमितगतयः सर्वतः खेचराणाम् ।
नून तद्गेयमन्त्रैः प्रतिनिहतनभोगामिविद्याक्षराणां,
नक्तं शृङ्गारयोनेर्वरपुरनिकराः केलिलीलानिवासाः ॥६९॥
यत्र द्रोणिमुखानि[2] सत्कविमुखानीवोभयोर्मार्गयो-
र्गद्योन्मीलितपद्ययोरिव सदा पाथःस्थलासङ्गिनोः ।
भूयांस्याकलितप्रसिद्धिसुभगान्याविर्भवन्त्युच्चक-
र्येष्वेकैकमपि प्रलुम्पतितरां वित्तशपुर्याः श्रियम् ॥७०॥

१. पुस्तके तु 'पाद्यानं' इति पाठः। २. ६६००० ।

एवं संबाधखेटाद्यनुपममितं वर्ण्यते तत्र कीदृग्,
बाह्यं सम्पत्स्वरूपं तदुपचयकृतः सन्तत यत्र यक्षाः ।
भूयांसः सन्ति दूरे नयनयुगपथात् किङ्करत्वं प्रपन्नाः,
किं वा पुण्योच्चयस्य क्षतरिपुनरपस्येव वश्यं न लोके ॥७१॥
कामादाजन्मनानाकरणविधिरणन्मञ्जुमञ्जीरसिञ्जा-
सहूतानङ्गनृत्यन्मृगशिशुनयनासङ्गते रङ्गभूमौ ।
शैलूषैरब्धिसंख्याभिनयनयनहृन्नाटक नाटितं यत्,
तत्रासक्ता वितृष्णा अमृत इव सदा चक्रिणो यत्र न स्युः ॥७२॥
द्वात्रिंशत्पात्रबद्धाभिनयसुखकरनाटकानां सहस्रै-
र्यत्राक्षिप्तैरजस्रं बहुरपि समयो लक्ष्यते सोमुहूर्त्तम् ।
कान्ताकण्ठोपकण्ठप्रहितभुजलतैश्चक्रिभिः पुष्पमाला-
माद्यद्भृङ्गाङ्गनौघाविरतकलरवव्याजमङ्गीतरूपैः ॥७३॥
कामास्त्राणां समेषां वयमुपरिसमस्तेन्द्रियार्थाश्रयत्वा-
दाधिक्यं चेन्न तेभ्यो भुवि भवति परं नाटकेभ्यः परेभ्यः ।
तत्काऽस्माकं महत्तेत्यवजितविबुधस्त्रैणलावण्यलक्ष्म्य-
स्तद्द्वैगुण्यं भजन्ते ध्रुवमसमसुखाः केकराक्ष्योऽपि यत्र ॥७४॥
अप्यन्यासां यदि स्याल्लवणिमजलधिः पिण्डितः सुन्दरीणां,
सर्वासां रूपदासीकृतरतिवपुषां तेन साम्यं लभेत ।
यत्रैकस्यापि चन्द्रद्रुतरसरचितस्येव सौख्याकरस्य,
स्त्रीरत्नस्याङ्गलक्ष्मीर्ललितरतिनिधिस्तत्र किं वर्ण्यतेऽन्यत् ॥७५॥
इत्थं सौधर्मनेतुः सुकृतविभुरसाधारणोपास्तिभेदा,
राद्धस्तस्मै कृतार्थः समभवदसमश्रीचतुर्वर्गदानात् ।
किं वन्ध्यत्वं भजेतामृतरस उचितत्वेन पीतः कदाचित्
किं वा स्यात् कल्पवृक्षः क्वचिदपि विफलः सेवितः सन्नजस्रम् ॥७६॥

इति युगप्रवरागमश्रीमज्जिनपतिसूरिशिष्यलेशविरचिते
श्रीसनत्कुमारचक्रिचरिते शक्रप्रच्यवनो
नाम षष्ठः सर्गः । छ. । ६ ।

सप्तमः सर्गः

देशो दिशामण्डनमेकमीषद् - विशेषहेतोर्विहितो विधात्रा ।
अव धरित्रीपतिनीतिपूतः, क्षितौ कुरुभ्यः कुरुजाङ्गलोऽस्ति ॥१॥

एतत्कृतास्माकमिय समृद्धि - रिति स्थवीयः फलभारभाजः ।
यस्मिन्नमस्कर्तुमिवाभिनेमुः, स्तम्बान् शरद्युन्नतशालिशाखाः ॥२॥

तटाश्रितासङ्ख्यसुरालयानि, बभुर्महीयांसि सरांसि यत्र ।
अब्धिभ्रमारब्धविलोडनानि, ध्रुवं सुरै रत्नगणाप्तिलोलैः ॥३॥

वृषाश्रितत्वाज्जनता सुरूपा, प्रमोदभाक् भूरिसमृद्धिपात्रम् ।
सुरावलीव श्रयते न यत्र, भयं कदाचिद् द्विषतो बलेभ्यः ॥४॥

प्रायः सदा तीर्थपचक्रिमुख्य-प्रभाववद्भूपतिसम्भवेन ।
दुर्भिक्षरोगव्यसनेति डिम्बास्त्रासादिबाध्यासिषतैव यो नो ॥५॥

यत्र प्रतिग्राममर्त्यविश्मनां, ततिश्चकाशे महतां सितद्युतिः ।
तत्कर्तृकीर्त्तिस्त्रिदिवारुरुक्षया, विकासिताङ्गेव निरन्तरं दिवि ॥६॥

यत्रेक्षुकाण्डाः शुकचण्डतुण्ड - प्रहारनिर्यद्रससान्द्रधाराः ।
सुधाप्रपाकौतुकमध्वगानां, शालां विनापि प्रतिपूरयन्ति ॥७॥

सौरभ्यलुभ्यन्मधुपालिनाद-व्याजेन पुष्पोत्कटकाननानि ।
अधिक्षिपन्तीव वनं सुराणां, प्रत्यब्दमुद्यत् कुसुमानि यत्र ॥८॥

पुराणि योषाकुलसंकुलानि, योषाकुलान्यद्भुतरूपभाञ्जि ।
रूपाणि यूनां मनसां हि चौराश्चौराः परिम्लानमुखाश्च यत्र ॥९॥

भूम्ना बभुर्यत्र जिनास्पदानि, प्रेक्षादिदृक्षाऽचलदृष्टिलोकैः ।
कीर्णान्यमर्त्यैरिव सङ्गतानि, दिवो विमानानि समागतानि ॥१०॥

यत्र क्विपामेव हि सर्वलोपः, कलावसादोऽपि शशाङ्कमूर्त्तेः ।
वृषावमुक्तिः पितृकार्य एव, स्मार्त्तस्य नान्यस्य जनस्य दृष्टः ॥११॥

न दन्तिनो दानविहीनगण्डा, न दानमप्युज्झितगन्धवासम् ।
गन्धोऽपि नैवासुरभिर्व्यधत्त, कलत्वणा यत्र मधुव्रतालीम् ॥१२॥

यो मर्त्यलोकेऽपि विचित्रकेलि - प्रवृत्तनित्योत्सवमोदवद्भिः ।
मर्त्यैरमर्त्यैरिव सन्ततश्रीः, स्वर्गश्रियं दर्शयतीव नृभ्यः ॥१३॥

रत्नत्रयी यत्र जिनेन्द्रसंज्ञा, द्विधाऽपि चक्रं बत धारयिष्णुः ।
अज्ञे नवः कश्चन रोहणाद्रिः, केनोपमीयेत स देशराजः ॥१४॥

तत्रेन्दुरुक्शालविशालताचित-क्ष्मापीठमासीत् किल **हस्तिनापुरम्** ।
यत्कुण्डलीभूतभुजङ्गमाधिप-श्रियं दधौ चारुविशेषकं भुवः ॥१५॥

हर्म्याणि रम्यस्फटिकोपलद्युति-च्छटाजलक्षालितदिङ्मुखान्यलम् ।
क्षपास्वखण्डक्षणदापतिप्रभा - चितानि यत्राऽऽपुरलक्ष्यमूर्त्तिताम् ॥१६॥

तुषारसंस्पर्शपयोधरानिशं, सौगन्धिकाम्भोजकृतावतंसका ।
विश्वस्य चक्षुःशततुष्टिपुष्टिदा, बभूव कान्ता परिखाऽपि यत्र च ॥१७॥

यत्रोन्नतं शालपतिं भजन्ती, भग्नान्यसङ्गं परिखा सदापि ।
मूर्द्धाभिषिक्ता परकामुकीणा - मासीदशश्वत् परिरम्भभाजाम् ॥१८॥

कीर्णानि कर्णामृतकेकिकेका - पिकस्वनैः केलिवनानि यत्र ।
भङ्गायमानस्य मनःस्वनीना - मल समाधेश्च समाधिभाजाम् ॥१९॥

सत्सारसोदीरितमध्यमस्वर - व्यामिश्रबर्हिस्फुटषड्जगीतिभिः ।
सरांसि पान्थाय वनैः समं सदा, प्रातर्गतौ यत्र दिशन्ति मङ्गलम् ॥२०॥

सुरालयाग्रप्रचलत्पताका, पटाञ्चलोत्क्षेपशतैर्यदारात् ।
दूरागतिश्रान्तविवस्वदश्व - श्रमाम्बु नूनं व्यनयद् दिनान्तः ॥२१॥

रामाजनस्याद्भुतरूपसृष्टौ, स्रष्टुर्ध्रुवं यद्वरसृष्टिशाला ।
यत्तादृगन्यत्र न रूपसम्पद्, दृष्टा क्वचिद् भूवलयेऽखिलेऽपि ॥२२॥

गारुत्मताच्छामलसारकाणा-मन्तर्निविष्टा नवहेमकुम्भाः ।
दधुः स्मितेन्दीवरगर्भखेलच्चक्रश्रियं यत्र जिनालयेषु ॥२३॥

मूर्त्तिस्पृशो गोष्पतयोऽपि चित्रं, सङ्ख्याविदः सत्कवयः प्रतीताः ।
प्रमोहविष्टा अपि तर्कशास्त्रा-ऽवमर्शका यत्र जनाश्च भूम्ना ॥२४॥

यत्रेन्द्रनीलस्फटिकाश्महट्टा, एकान्तरा प्रोच्छलितांशुजालैः ।
चक्रुस्तमश्चन्द्रिकयोश्चिराग्रैकत्रस्थितेश्चित्रयुजो विदग्धान् ॥२५॥

यस्मिन् मणीनामवलोक्य राशीन्, सङ्ख्यातिगान्पण्यपथे प्रतीयुः ।
जनाः पयोधिं हृतसर्वसारं, नाम्नैव रत्नाकरकीर्त्तिभाजम् ।।२६।।

कर्णामृतस्यन्दिविलासिनीजन - प्रगीतनिष्पन्दकुरङ्गशावकः ।
अखिद्यत द्यामतिगन्तुमुत्सुको, यच्चन्द्रशालानिकषाचरः शशी ।।२७।।

मत्ताङ्गनाविह्वलनृत्तभङ्गि-ष्वपूर्वपादक्रमशिक्षणाय ।
जहुर्न वर्षास्वपि सौधगर्भान्नूनं यदीयान् शिशुकेलिहंसाः ।।२८।।

श्राद्धाः श्रुतेस्तत्त्वसुधां धयन्तः, सुस्थाः स्थिराः साधुमुखाम्बुजेभ्यः ।
साक्षादिवाऽऽनन्दरसावमग्ना, मुक्तेर्व्यभाव्यन्त तदापि यत्र ।।२९।।

द्विपालयः कज्जलपुञ्जसोदरा, यत्राह्नयभू[1] राजपथे चरिष्णवः ।
विवस्वतास्तास्तमुपासितुं भिया, तत्पादलग्ना इव कालरात्रयः ।।३०।।

द्विजिह्वलक्षैर्विलसत्तमोभरैः, कौटिल्यमालिन्यगृहैरुपासिता ।
श्रीनागराजस्य पुरी निरातपा, तुलां न येनाऽधिरुरोह सर्वथा ।।३१।।

द्विकुण्डलालङ्कृतमेककुण्डल - श्रितां सपुष्पव्रजमेकपुष्पकाम् ।
सुरालयोद्यद्दशनांशुमण्डलै - र्यदुज्जहासेव सदाऽलकां पुरीम् ।।३२।।

ससारसाराखिलवस्तुपात्रं, यद्भूरिभिः सद्गुरुभिः कवीन्द्रैः ।
प्रसाधितं वीक्ष्य सहस्रनेत्रो, न बह्वमंस्ताऽऽत्मपुरीं गुणज्ञः ।।३३।।

तत्रोद्भटैर्नृपतिभिर्नतमौलिकोटी -
कोषोच्छलदविमलशोणमणिच्छलेन ।
दत्तप्रतापनिजवैभवसार आसीत् ,
पृथ्वीपतिः पृथुयशोनिधिरश्वसेनः ।।३४।।

कलालयो यो बत तेजसां निधि-र्भूनन्दनोऽप्यद्भुतकाव्यपद्धतिः ।
बुधोऽपि शत्री गुरुसिंहिकासुतः, केतुः स्ववशस्य शनैश्चरः पथि ।।३५।।

यस्मिन्प्रजाः शासति चण्डशासने, नैवान्वभूवन्प्रतिपक्षजव्यथाः ।
स्युः स्फूर्तिमन्मान्त्रिकरक्षितेषु किं, भयानि भोगिप्रभवानि कर्हिचित् ।।३६।।

कुर्वन् कृतार्थानखिलार्थिचातका - नेकाह एवेप्सितदानकोटिभिः ।
किमप्ययच्छन्नितरेषु वासरेष्वखिद्यतोदारमनाः सदाऽपि यः ।।३७।।

---

१. गुर्गुभरे

कुम्भीन्द्रकुम्भस्थलदारणोच्छलन्-मुक्ताफलैर्दन्तुरितं नभस्तलम् ।
दिवाऽप्यभूत्तारकितं रणोत्सवे, यस्य प्रनृत्तासिकराग्रशालिनः ॥३८॥

स्मराकुलं स्मेरविलोचनाम्बुजं-निपीयमानोऽपि पिपासयाऽनिशम् ।
पौराङ्गनाभिः समवर्द्धताऽधिकं, यस्याऽस्य सौन्दर्यपयोधिरद्भुतः ॥३९॥

दत्त्वा द्विषद्ध्रुघो निशितासिधारास्तदङ्गनानां नयनाम्बुधारा ।
क्लृप्ताः परीवर्त्तपरेण येन, स्वकीर्त्तिवल्लेः परिवृद्धिधात्र्यः ॥४०॥

नीत्यङ्गनालिङ्गनलोलमूर्त्ति-र्नाऽकीर्त्तिलक्ष्म्याऽपि कटाक्षितो यः ।
किं भद्रजातीयमतं गजेन्द्रं, वशास्वजं चुम्बति कोलकान्ता ॥४१॥

विदारिताऽरातिकरीन्द्रकुम्भ - मुक्तावली व्योम्नि तता चकाशे ।
संसूत्रिता यस्य रणोत्सवेषु, जयश्रिया स्राग्वरमालिकेव ॥४२॥

तुष्टामरक्षिप्तसुगन्धिपुष्प - गन्धावलुभ्यन्मधुपाङ्गनानाम् ।
मृधेषु यस्य श्रमवारिबिन्दून्, नुनोद पक्षव्यजनानिलः स्राक् ॥४३॥

केशेषु बन्धस्तरलत्वमक्ष्णोः, काठिन्यलक्ष्मीः कुचमण्डलेषु ।
संभोगभङ्गिष्वदयाभिघाता, मृगीदृशामेव यदीयराज्ये ॥४४॥

प्रवादिजल्पे छलजातियोगः, सकण्टकत्वं वनकेतकेषु ।
विष्कम्भशूले खलु योगजाते, न जातु लोकस्य तु यस्य राज्ये ॥४५॥

समर्थतासारमभूत् क्षमित्वं, तारुण्यरूपोदयशालिशीलम् ।
विकत्थना वाङ्मुखमेव दानं, विवेकसङ्केतगृहस्य यस्य ॥४६॥

तस्य प्रियाऽऽसीत् सहदेव्यभिख्या, या गीतविद्येव विशुद्धजातिः ।
आन्वीक्षिकीव प्रथितप्रमाणा, त्रयीव सुव्यञ्जितवर्णसंस्था ॥४७॥

लावण्यकिञ्जल्कचिते यदास्य - पद्मे विलास्यक्षिमधुव्रताली ।
रसावमग्ना न ततः शशाकोन्मंक्तुं घनाज्जीर्णगवीव पङ्कात् ॥४८॥

लक्ष्मीरिवोन्मीलितकान्तकामा, शचीव सौभाग्ययशोनिधानम् ।
ज्योत्स्नेव विश्वेक्षणसौधधारा, बभूव सीतेव पतिव्रता या ॥४९॥

यस्याः कटाक्षोद्भटपक्ष्मलाक्ष्याः, कक्षां जगाहे न कदापि रम्भाः ।
निस्पन्दनेत्राम्बुरुहा वराकी, शिलातलोत्कुट्टितपुत्रिकेव ॥५०॥

निजप्रभास्तोमपरीतमूर्त्ति-र्या दुग्धसिन्धून्मथनोल्लसन्त्याः ।
क्षीरच्छटाव्यास्ततनोर्हि लक्ष्म्याः, कीर्त्ति समग्रां परिलुम्पति स्म ॥५१॥

शशी यदि स्यान्मधुपालियुक्तः, शिखण्डभारोद्धुरमम्बुजं वा ।
तेनोपमीयेत यदास्यचन्द्रः, स्निग्धायतश्यामलवेणिदण्डः ॥५२॥

नृरत्नसूः सूनृतवाग्विलासा, योषित्स्वनन्यप्रतिमैव यासीत् ।
काऽन्याऽथवा सिन्धुषु साधुमुक्ता, भुवा हि संहृष्यति[1] ताम्रपर्ण्या ॥५३॥

सुसौम्यमूर्त्तिर्द्विषणाभिरामा - प्यनङ्गसङ्गिन्यपि राजकान्ता ।
या स्वर्णवर्णा महिषीति वित्ता - प्यासीदमन्दाप्यलसप्रयाता ॥५४॥

अनन्यसाधारणयौवनायां, तस्यां महौजाः समजायताऽसौ ।
स पुत्रभावेन सुराधिनाथः, पुण्योदयात् पुण्यसुधासरस्याम् ॥५५॥

चतुर्दशस्वप्नविलोकनेन, सा निश्चितानुत्तमपुत्रलाभा ।
लेभे प्रमोद नरनाथकान्ता, मृणालिनीवोद्भवदम्बुजन्मा ॥५६॥

महेभमिन्दुद्युतिमुच्चकुम्भं, कपोलगुञ्जन्मधुपोपगीतम ।
साक्षादिवैरावतमास्यपद्मं, निजं विशन्तं शयिताऽऽलुलोके ॥५७॥

एवं महोक्षं शरदीव पुष्टं, विषाणकोट्युल्लिखिताम्बुवाहम् ।
भस्मच्छटावासुकिसङ्गभीतं, माहेश्वरं यानमिवेयिवांसम् ॥५८॥

स्वविक्रमं दातुमिवोदरस्थे, सलीलमायां तमुदारगात्रम् ।
पात्रं सहस्रांशुमिवेद्धधाम्नां, शिरोललल्लूमलतं मृगेन्द्रम् ॥५९॥

लक्ष्मीं सुधौघैरभिषिच्यमानां, हस्तीन्द्रहस्तोद्धृतकुम्भमुक्तैः ।
पार्श्वद्वयेऽपि स्वयश प्रवाहै - रिव प्लुतानुत्तमकान्तिमूर्त्तिम् ॥६०॥

सम्पद्यतामस्मदुपास्ति पूतं, श्रोत्रेन्द्रियस्यापि नितान्तकान्तम् ।
इतीव भृङ्गैरनुगम्यमानं, पुष्पस्रजोर्युग्ममतीव दृश्यम् ॥६१॥

एकान्ततेजस्वितयोपतापी, माऽभूदय बाल इतीव चन्द्रम् ।
शीतप्रकृत्याश्रयिणं विधातुं, तमुद्यत स्व वदनं विशन्तम् ॥६२॥

विना प्रतापेन न कार्यसिद्धिस्तमोपह रूपमितीव तस्मै ।
बालाय संदर्शयितुं स्वकीयं, सहस्रभानुं विततोग्रभानुम् ।६३॥

---
१. स्पर्द्धते

विचित्रसद्रत्नमयं पताका - सहस्रहंसावलिचुम्बिताङ्गम् ।
ध्वजं स्वतुल्यध्वजलाभमुच्चै - र्बालस्य नूनं लघु सूचयन्तम् ॥६४॥
नीलोत्पलाध्यासितचारुवक्त्रं, रसौघसम्पूरितमध्यभागम् ।
हैमं कुटं लोचनपूर्णचन्द्रं, श्यामास्ययोषित्कुचकुम्भकान्तम् ॥६५॥
कश्मीरजालिप्तवधूमुखाभैः, बालातपालङ्कृतफुल्लपद्मैः ।
तरङ्गभङ्गैश्च धनुर्लतायाः, लक्ष्मी हसच्चारुमहासरश्च ॥६६॥
रत्नाकरत्वेन विजित्य विश्वं, हर्षप्रकर्षादिव गर्जिताढ्यम् ।
दूरं समुल्लासितवीचिबाहुं, पाथोधिनाथं परितः प्रनृत्तम् ॥६७॥
विमानमत्यद्भुतमप्यपूर्वा, मर्त्यश्रियं पश्यदिवाक्षिजालैः ।
अदत्तदृष्टिः सविधे मृगाक्ष्यां, कान्तोऽपि कान्तोऽत्र भवेत् कृतार्थः ॥६८॥
रत्नाकरस्यार्पितरिक्तभावं, रत्नोत्करं निर्मलमद्रिकल्पम् ।
साक्षादिवोन्मीलितमर्भकस्य, पुण्योच्चय चक्रिसमृद्धिहेतुम् ॥६९॥
निर्धूमधूमध्वजमुल्लसन्त, निवातदीप्तं नयनाभिरामम् ।
तेजस्विषु ज्येष्ठमशेषलोक - ससेव्यमादित्यमिवोदयस्थम् ॥७०॥
आदिकुलक चतुर्दशभिः ।

स्वप्नानिति प्रेक्ष्य निजाऽऽस्यपद्मं, शेषे निशाया विशतो विचित्रान् ।
सा कौतुकाङ्कूरितचित्तभूमिः, प्रमोदफुल्लन्नयना प्रबुद्धा ॥७१॥
तेषां निशम्याऽथ नरेन्द्रवक्त्रात्, रत्नोत्तमानामिव चक्रनेतुः ।
चतुर्दशानां फलमेष्यदाशु, विश्वाद्भुत सा मुमुदे नितान्तम् ॥७२॥
स्वप्नागमाध्येतृवचोऽनुसारा - द्विनिश्चितानुत्तमचक्रिपुत्रा ।
स्वं बह्वमंस्ताऽन्यनृपाङ्गनाभ्यः, को वाऽऽप्तसम्पन्न भवेत् सदर्पः ॥७३॥
समुद्गमिष्यत्तपनेव पूर्वा, साय नभःश्रीरिव चन्द्रगर्भा ।
तदान्तरौर्वेव पयोधिवेला, रराज सा भास्वरकायकान्तिः ॥७४॥
समुच्छ्वसत्सर्वमनोहराङ्गी, गर्भानुभावेन बभूव राज्ञी ।
सुधावसिक्तेव लता भविष्यन् - महाफलाङ्गीकृतपोषलक्ष्मीः ॥७५॥
क्रमेण च क्षीरविपाण्डुगण्डा, सुनिर्मलश्वेतमयूखभूषा ।
आकाशलक्ष्मीरिव सा विरेजे, मन्द यती वेश्मनि दन्तिनीव ॥७६॥

कट्वम्लरूक्षैर्नितरां न तीक्ष्णैः, सर्वेन्द्रियाऽऽनन्दकरैश्च भोज्यैः ।
पुपोष सा गर्भमनुष्णशीत - शय्याशया कोमलभाषिणी च ।।७७।।

यथा यथाऽदृश्यत बन्धुभिः सा, श्रमालसोत्थाननिवेशनेषु ।
तथा तथाऽप्रीयत पूर्णसर्व - कामैरिवोन्मीलितनेत्रपत्रैः ।।७८।।

नृपेण सम्पादितदोहदौघा, शुभग्रहेषूच्चपदस्थितेषु ।
बालस्य भाग्येष्विव भद्रकार्योन्मुखेषु धामातिशयान्वितेषु ।।७९।।

ज्योत्स्ना निशीथेऽखिलदेहभाजां, स्वापाऽपदेशेन वितीर्णयोगे ।
शत्रूद्भवोत्तापभृतां हि बाला, तूर्णं ध्रुवं निर्वृतिसाधनाय ।।८०।।

द्वात्रिंशदुद्बुद्धसदङ्गलक्षणं, चतुर्थमुद्यद्रुचिचक्रवर्तिनम् ।
अरिष्टवेश्मागतसूतिसुन्दरी - मुखाहितद्योतनमंशुजालकैः ।।८१।।

सुखेन साऽसूत सुतं निजाङ्ग - प्रभापराभूतसमीपदीपम् ।
रत्नाङ्कुरं रोहणशैलराज-क्षितिर्यथा क्षुण्णमहान्धकारम् ।।८२।।
चक्कलकम् ।

दिक्षु प्रसन्नासु तदीयचित्त - वृत्तिष्विवादर्शितविक्रियासु ।
समीरणेष्वप्यभितो वहत्सु, तद्वाक्प्रयोगेष्विव शीतलेषु ।।८३।।

तस्मिन्निव प्रोज्ज्वलधोरनादे, नदत्यमन्द जयशङ्खयुग्मे ।
मुखेषु पद्मेष्वलिनादगीति - ष्वम्भोजिनीनामिव सुन्दरीणाम् ।।८४।।

समुच्छलन्त्या स्तनपीठ उच्चै, रंहोगतौ व्यायतहारयष्टया ।
निरुध्यमानाऽपि बलाज्जगाम, काचिन्नृपं वर्द्धयितुं कुमारी ।।८५।।

विवर्ध्यसे देवसुतोद्भवेन, वेलोदयेनेव पयोधिनाथः ।
प्राच्या इव श्रीसहदेविनाम्न्यास्तेजस्विसोम्याः प्रवरप्रियायाः ।।८६।।

आकर्ण्य कर्णामृतमेतदीयं, वाक्यं नृपेन्द्रः प्रबभूव नाऽङ्गे ।
तोषैस्तनूजप्रसरत्प्रभावैः, प्राज्यैरिवैत्योपचिताऽन्तरात्मा ।।८७।।

ददौ च तस्यै मणिभूषणावलीं, प्रसन्नदृग्दानपुरस्सरं नृपः ।
वाचं च तां काञ्चन सा यथा तया, तुतोष नैवेतरया तथा तदा ।।८८।।

अमोचयच्छाश्वतवैरिणोऽपि, कारागृहाच्छेषजनान्निवाऽसौ ।
स नाऽऽददे प्राज्यमपीह शुल्कं, देवस्ववत्तत्र दिने नृपेन्द्र ।।८९।।

नृपौकसो द्वारि सतोरणाभि - र्भ्राजेतरां बन्दनमालिकाभिः ।
स्वपद्मपत्रैरिव निर्मिताभिः, श्रिया समाराधयितुं शिशुं प्राक् ॥९०॥

संशोधिताः शुद्धिकरैश्च रथ्या, रजोविहीनाः सहसा बभूवुः ।
योगीश्वराणामिव मानसस्य, प्रवृत्तयो ध्यानविशेषलाभैः ॥९१॥

मार्गा असिच्यन्त च कुङ्कुमाम्बुभिः, सान्द्रैः सधूपैर्घनसारमिश्रितैः ।
तथा यथोच्छृङ्खलनर्त्तनेष्वपि, स्त्रीणां बभूवुर्न लसद्रजःकणाः ॥९२॥

सिन्दूररक्ताः प्रतिवेश्म रेजु-र्वातोद्धुता मङ्गलवैजयन्त्यः ।
अदृश्यतत्पत्तनदेवताना - माच्छादनायेव धृताः सुपद्यः ॥९३॥

कस्तूरिकास्थासकरोचितालिकैः, प्रलम्बहारैर्युवभिर्नवांशुकैः ।
तूर्याणि तुल्यं प्रहतानि तौर्यिकैः, राज्ञो गृहे पौरगृहेषु चाध्वनन् ॥९४॥

तथा समारभ्यत मङ्गलावलि-र्गृहे गृहे तत्र पुरे मुदा तदा ।
यथा न पुत्रप्रसवः स्म लक्ष्यते, कस्येति मुग्धप्रमदाभिरञ्जसा ॥९५॥

रथ्यासु पुष्पप्रकरे रणद्भिस्तारं द्विरेफैः सहसाऽव्रियन्त ।
कलाः प्रभूता अपि किन्नराणां, सवेणुवीणाध्वनयोऽपि नादाः ॥९६॥

पट्टांशुकोल्लोचचितान्तराला, नरेन्द्रमार्गाः सुतजन्ममोदे ।
नूनं व्यराजन् परिधापिताः स्राक्, राज्ञा प्रसादीकृतचित्रवस्त्रैः ॥९७॥

मुक्ताकलापा विपणिष्वसङ्कुचकाः, स्वच्छा व्यभाव्यन्त विलम्बिराजयः ।
नक्षत्रमालामहमेनमीक्षितुं, द्वीपान्तरेभ्यः समुपागता इव ॥९८॥

सिन्दूररेणुप्रकरैः प्रबद्धैः, पिष्टातकैश्चोच्छलितं समन्तात् ।
तस्य प्रतापैरिव शैशवेऽपि, प्रजानुरागैरिव वोत्सवेऽत्र ॥९९॥

समुद्धताङ्घ्रिक्रमबाहुदण्डैस्तत्ताण्डवं चक्रुरलं युवानः ।
व्यडम्बयच्चण्डतरं मृडानी - पतेः प्रनृत्तं यदकाण्डवृत्तम् ॥१००॥

विलासिनीनां ललितानि लास्यान्यपाङ्गविप्रेक्षितसुन्दराणि ।
जज्ञुः कुचाऽऽस्फालनदत्तहार - च्छेदक्रियाहासितकामुकानि ॥१०१॥

ताम्बूलदानं वसनैर्न हीनं, हासेन शून्यं न विलेपनञ्च ।
तत्राऽभवत् प्रीतनरेन्द्रवर्ग - प्रकल्पितं नागरसत्तमानाम् ॥१०२॥

श्रियं महैस्तैरदधाद्दिवोऽपि, ताम्बूललाभैरधिकां पुरं तत् ।
किं वा न पद्माद्वदनं मृगाक्ष्या, धत्ते रुचं सातिशयां सुचित्रैः ॥१०३॥

दिने दिने चन्द्रकलेव मोदैः, प्रवर्द्धमाना किल मासमेकम् ।
महोत्सवश्रीरभवज्जनानां, तुष्टिप्रदा मानसलोचनानाम् ॥१०४॥

अपि सकलधरायाश्चारुसङ्गीतलक्ष्म्यः,
क्वचिदपि यदि दैवादेकतः सङ्घटेरन् ।
तदपि तनुजजन्मोत्सर्पिणो नोत्सवस्य,
प्रतिकृतिमसमानस्यास्य दध्युः समग्राम् ॥१०५॥

इति युगप्रवरागमश्रीमज्जिनपतिसूरिशिष्यलेशविरचिते
श्रीसनत्कुमारचक्रिचरिते कुमारोदयवर्णनो
नाम सप्तमः सर्गः । छ. । ७ ।

अष्टमः सर्गः

शुभे दिनेऽथ स्वजनाय काञ्चने, विश्राणिते बन्दिगणाय कोटिशः ।
सनत्कुमारेति पदाभिधेयतां, लेभे शिशुर्वृद्धकुलाङ्गनाजनात् ॥१॥

पुत्रस्य सर्वाङ्गमनोरमस्य, तस्याऽऽननाम्भोरुहमीक्षमाणः ।
योगीन्द्रगम्यां समवाप काञ्चिन्-मुदं निजोत्सङ्गगतस्य भूपः ॥२॥

कूर्चे कचाकर्षणमादधानः, सोऽनन्दयत् स्मेरमुखं नरेन्द्रम् ।
प्रियाहितं सौख्यदमेव वा स्यात्, कान्तापदाघात इवाऽपि वामम् ॥३॥

तदास्यपद्मं परिचुम्बतोऽस्य, मधुव्रतस्येव बभूव तत्र ।
तृष्णातिरेकोऽभिमतान्निवृत्तिः, क्व सेव्यमानादपि वा सदा स्यात् ॥४॥

वचोऽपि तस्याऽस्फुटवर्णभेदं, सुधाममंस्त क्षितिपः स्वकर्णे ।
स्वाधीनकान्तेव रुतं पिकस्य, किं किं न मोदाय हि बालकानाम् ॥५॥

स्खलत्पदं क्रामति मन्दमन्दं, शिशाववष्टब्धकराङ्गुलीके ।
धात्र्या धरित्रीपतिराबबन्ध, दृष्टिं नवे चन्द्र इवोदयस्थे ॥६॥

काकाद् ध्रुवं पञ्चगुणाञ्जिघृक्षुः, स काकपक्ष दधदुत्तमोऽपि ।
मूर्ध्नाऽधमेष्वप्यनुवृत्तिरिष्टा, गुणार्थिनो नूनमिति स्म वक्ति ॥७॥

प्रवर्द्धमानश्च शशीव कान्तः, क्रमेण जग्राह कलाः समग्राः ।
द्विसप्ततिं सूचिततत्प्रमाण - सहस्रपूर्भेदसमोपलाभाम् ॥८॥

जिताऽनिरुद्धोऽपि कुमारभावे, वपुःश्रिया पुष्पशरं जिगीषुः ।
शिश्राय नूनं नवयौवनं स, नासाधना कापि यदिष्टसिद्धिः ॥९॥

पूर्णेन्दुभास्यप्यतिनिष्कलङ्कं, सच्छायमल्लचप्यथ तस्य रेजे ।
कायोच्छलत्कान्तिजलोपरिष्टा - दुन्नालपद्मश्रिमुखं सुकण्ठ ॥१०॥

विरेजतुस्तस्य विशालनेत्रे, शितयन्तरे ताम्रविपाण्डुरान्ते ।
कर्णान्तविश्रान्तिपरे इवेषू, जगज्जयायाऽङ्गभुवा प्रयुक्ते ॥११॥

श्यामः सपुष्पस्ततवेणिदण्डस्तस्याऽऽबभौ लोचनचित्तहारी ।
गोपीजनस्येव वधूगणस्य, स राजहंसो यमुनाप्रवाहः ॥१२॥

यद्यष्टमीयः क्षणदाधिनाथः, कान्तो भवेदञ्जनबिन्दुनान्तः ।
तेनोपमीयेत ललाटमस्य, कस्तूरिकास्थासकचित्रगर्भम् ॥१३॥

कान्तिच्छटाऽऽच्छादितचार्वपाङ्गा - वपि प्रदत्ताधिकनेत्रशोभौ ।
गण्डौ तदीयौ न हि चन्द्रपार्श्वे, चकोरयोर्जातु न चोयते श्रीः ॥१४॥

नासा तदीया सरलोन्नता च, विस्तीर्णनेत्रोपगता सदाऽधात् ।
जगज्जयप्रस्थितमन्मथस्थो - ल्लसत्पताकध्वजयष्टिलक्ष्मीम् ॥१५॥

ओष्ठोऽप्यभाच्छोणमणिप्रकाशः, श्मश्रुश्रिया प्रापितकान्तकान्तिः ।
प्रवालविच्छेद इवेन्द्रनील - स्थलीनिवेशेन विशेषदीप्तः ॥१६॥

तस्याऽऽबभौ श्मश्रुविनीलपङ्क्तिः, सौरभ्यपात्रं परितो मुखाब्जम् ।
भृङ्गावली नूनमपूर्वगन्ध - लुब्धोपविष्टा प्रविहाय पद्मम् ॥१७॥

अंसस्पृशौ तस्य सुसन्निवेशे, रराजतुः कर्णविलोलदोले ।
मृगेक्षणादृष्टिविलासिनीना-मन्दोलनायेव कृते विधात्रा ॥१८॥

शक्तित्रयं चारुगुणत्रयं च, राज्ये व्रते चाऽऽत्मनि सन्निधास्ये ।
इतीव रेखात्रितयं स कण्ठे, बभार संसूचयितुं महात्मा ॥१९॥

वक्षःस्थले हेमकपाटकान्तौ, श्रीवत्सराट् तस्य विनीलरोमा ।
सुमेरुविस्तीर्णशिलोपविष्ट - सत्कृष्णसारश्रियमाचकर्ष ॥२०॥

तस्यांसकुम्भौ रुचिरौ सुपीनौ, भातः स्म सौन्दर्यसुधारसेन ।
पूर्णौ वधूदृष्टिचकोरिकाणां, तृप्त्यै धृतौ चित्तभुवेव नूनम् ॥२१॥

गजेन्द्रहस्ताविव बाहुदण्डौ, मानस्य दत्तः स्म तरोरिवान्तम् ।
मनस्विनीनां हृदि विद्विषां च, हेलाविलासोल्ललितौ तदीयौ ॥२२॥

पञ्चाननस्येव तनूदरं सद्वृत्तं महाशौर्यनिधे रराज ।
वक्षःस्थलीशैलशिलाभरेण, नितान्तमाक्रान्तमिवाऽस्य यूनः ॥२३॥

ऊरू तरुस्कन्धदृढौ तदीयौ, रराजतुः कुङ्कुमकान्तिचौरौ ।
यावस्य दिक्चक्रजये प्रशस्ति - स्तम्भश्रियं धारयतः स्म कान्तौ ॥२४॥

अपूर्वपङ्केरुहकान्ति तस्य, पदद्वयं यत्र हि नाललक्ष्मीम् ।
जङ्घे विपर्यस्तचये तदूर्ध्वं, सरोमिके चंक्रमणेष्वधत्ताम् ॥२५॥

किं वर्णितैस्तस्य परैः प्रतीकै - र्यदेकमप्यास्यमनर्घ्यमस्य ।
पयोनिधेश्चन्द्र इवाऽद्वितीयो, मणिर्मणीनामनणुप्रकाशः ॥२६॥

विडम्बितव्योममणिप्रकाश - श्चूडामणिर्मूर्द्धनि तस्य चाऽभात् ।
प्रभाप्रदेशात् प्रचुरप्रतापै - राच्छादयन्नूनमिलाभृतोऽग्रे ॥२७॥

रत्नोच्चरच्चारुमरीचिबद्ध - शक्रायुधद्वन्द्वमरोचताऽस्य ।
कर्णावतंसद्वयमास्यचन्द्र - मैत्र्यागतं युग्ममिवान्यदिन्द्वोः ॥२८॥

मुक्ताकलापोऽपि तदीयकण्ठे, लुठन्नरोचिष्ट विभक्तमूर्त्तिः ।
वक्त्राब्जसौन्दर्यपयोधिनिर्यत् - सुधाप्रवाहद्वितयानुकारी ॥२९॥

तस्याऽद्युतत् व्यायतबाहुशाखी, वैडूर्यकेयूरमयूरशाली ।
यत्र ध्रुवं ज्ञातिविशेषयोगाद - नर्त्ति रामेक्षणनीलकण्ठैः ॥३०॥

इत्थं महाश्चर्यकृदङ्गभाजः, कक्षां कथङ्कारमसावनङ्गः ।
विगाहते स्म क्वचिदीक्षितः किं, नग्नं सुवेषेण तुलां दधानः ॥३१॥

हेलासदर्पारिसहस्रकण्ठ - च्छेदैकवीरेण कुमारराजा ।
स्पर्द्धाप्यनङ्गस्य तपस्विनः का, कपालिनाप्याशु पराजितस्य ॥३२॥

संवीक्ष्य तं चन्द्रमिवाऽभिरामं, रामाः क्षणात् स्वेदमुचो बभूवुः ।
शशाङ्ककान्तप्रतिमा इवाक्षि - प्रस्पन्दवैमुख्ययुजः समन्तात् ॥३३॥

अपूर्ववीर्याश्रयिणश्च तस्य, श्रुत्याऽपि विख्यातपराद्धर्यसौर्याः ।
चकम्पिरे वैरिनृपाः सभासु, ग्रीष्मे निवातास्वपि लोलनेत्राः ॥३४॥

जरद्गवी कामदुघा दृषच्च, चिन्तामणिर्दारु च कल्पशाखी ।
बभूव चिन्तातिगदत्तदानैस्तस्मिन् कृतार्थीकृतविश्वविश्वे ॥३५॥

विदग्धगोष्ठीष्वपि वाग्विलासः, सर्वातिशायी विससार तस्य ।
प्रसन्नगीर्दत्तनिजानवद्य - विद्यौघसम्पूर्णतयेति मन्ये ॥३६॥

दाक्ष्य-क्षमा-न्याय-वशित्वमुख्यास्त शिश्रियुर्धामगुणा अधृष्यम् ।
सर्वे समं स्वीयपदेषु नूनं, प्रत्येकमुत्त्रस्ततयेव युक्ताः ॥३७॥

राज्ञः प्रजानां च मुदेकहेतु - रैधिष्ट कल्पद्रुमवत् स तत्र ।
कस्यैव किं स्यात् सहकारपाकः, प्रमोदपोषाय निसर्गकान्तः ॥३८॥

स्वीकारितानेककुटुम्बिनीकः, कुलव्यवस्थावशतः पितृभ्याम् ।
तथाऽप्यसौ तासु न सक्तचेता, अभूत् कलाभ्यासनिबद्धरागः ॥३९॥

तस्याऽभवन्मित्रममित्रमत्त - द्विपेन्द्रसिंहोऽथ महेन्द्रसिंहः ।
सौजन्यशौर्याविनिरुत्तमानां, निधिर्गुणानां भुवि राजबीजी ॥४०॥

यः सूरसूतोऽपि न पङ्गुरासीत्, कालिन्दिकाजोऽपि न यो भुजङ्गः ।
समं कुमारेण विनीतशस्त्रो - ऽप्यधत्त रौद्रं परशुं न जातु ॥४१॥

यस्याऽनुरागः स सनत्कुमारे - ऽत्यशेत यो लक्ष्मणरागमुग्रम् ।
रामे न सीमास्त्यथवा प्ररूढ-प्रेम्णो मृगाक्षीष्विव मन्मथस्य ॥४२॥

यः संयुगे शश्वददृष्टपृष्ठः, परैर्नरैश्चन्द्र इवोपसर्पन् ।
सौम्योऽपि तेजःसदनत्वतः को-ऽथवेदृशः स्यात् परिभूतिपात्रम् ॥४३॥

वैदग्ध्यबन्धुः सदनं कलानां, कौलीन्यसिन्धुः पदमिन्दिरायाः ।
एकोऽपि योऽसङ्ख्यगुणाश्रयोऽभूत्, पटो यथाऽऽच्छादितविश्वगुह्यः ॥४४॥

पद्माकरेणेव सरो वसन्ते, यः पुष्पबाणेन यथा वसन्तः ।
लीलाचयेनेव च पुष्पबाणो, व्ययुज्यत प्रेमभरान्न तेन ॥४५॥
प्रेक्षासु गोष्ठीषु गृहे बहिर्वान्वियाय यः स्वप्रतिबिम्बवत्तम् ।
प्रेम्णा वियुज्येत हि चक्रयुग्मं, किं कर्हिचित् स्वात्मवशं दिवाऽपि ॥४६॥
सङ्ख्याद्विषः सन्त्यपरे वयस्या, अस्याधिकं किन्तु महेन्द्रसिंहे ।
प्रेमान्यपुष्टस्य वनप्रियत्वे-ऽप्याऽऽम्रे परः कोऽपि हि पक्षपातः ॥४७॥
कदाचिदुन्मत्तगजेन्द्रयुग्म - मन्योन्यदन्तप्रहृतिप्रचण्डम् ।
सोऽयोधयत् मध्यधृतोरुरोधं, सक्रोधमूर्ध्वीकृतचण्डशुण्डम् ॥४८॥
अश्वीयमुटचं गतिपञ्चकेन[1], स्वेदच्छलोच्छ्रालितमध्यतेजः ।
सोऽवाहयद् वायुजवं महौजा, वेगेन गाढासनबन्धधीरः ॥४९॥
विव्याध राधां दृढमुष्टिदृष्टि-र्धनुर्धरः क्वापि सहेलयैव ।
मृगाधिराजस्य हि कुम्भिकुम्भ-भेदेन्यदुःखेऽपि कियान् प्रयासः ॥५०॥
सलीलनृत्यत्पणयोषिदङ्ग - हारप्रभेदप्रथितोरुकामा ।
प्रेक्षा· कटाक्षेक्षणरङ्गशाला, प्रैक्षिष्ट सोऽव्यग्रमना विलासी ॥५१॥
कदाचिदुद्यानगतः सहासं, खेलन्नधात् पुष्पशरस्य लक्ष्मीम् ।
पुष्पेषुभिस्ताडितहास्यवल्गद् - विदग्धकान्ताहृदयः स कामी ॥५२॥
अङ्गावनामोन्नतिबन्धमोक्ष - निष्णाततेजस्वितरस्विमल्लैः ।
सार्द्धं कलालङ्कृतवज्रकाय - श्चक्रे नियुद्धश्रममेकदाऽसौ ॥५३॥
धर्मश्रुतौ यौवतसङ्गमे च, द्रव्यार्जने च क्रमते स्म धीमान् ।
त्रिवर्गसिद्धौ न हि राजबीजो, योग्यो भवेत् क्वापि निरुद्यमः सन् ॥५४॥
प्रवर्त्तमानः करियोधनादा-वप्येष सौम्यः परिदृष्टमात्रः ।
ददौ वधूना नयनप्रसादं, नानाफला यत् कृतिनां प्रवृत्तिः ॥५५॥
तस्याऽनुरक्तस्य च नीतिवध्वां, कीर्त्यङ्गनाऽत्यन्तविमानितेव ।
अशिश्रियद् दूरदिगन्तराणि, सुदुस्सहो हि प्रतिपक्षमानः ॥५६॥

---

१. आस्कन्दितं, धौरितकं, रेचितं, वल्गितं, प्लुतं गतयोऽमूः पञ्चधाराः ।

प्रजानुरागं गुणसङ्क्रमं चावेक्ष्य क्षितीशोप्युपमानबाह्यम् ।
तस्याऽवदत् मन्त्रिवरानिदानीं, युक्ताऽत्र पुत्रे युवराजलक्ष्मीः ॥५७॥

सर्वेऽप्यमात्या अपि तस्य वाक्यं, तथेति सम्यक् प्रति शुश्रुवांसः ।
चक्रुः प्रमोद नृपमानसस्य, छन्दोनुवृत्तिर्हि मुदे न कस्य ॥५८॥

प्रोचुश्च ते देव किमन्यथा स्याद्, दृष्टिः कदाचित् सुविवेकभाजाम् ।
भवादृशां नैव विपर्ययो यद्, गङ्गाप्रवाहस्य गतौ कदाऽपि ॥५९॥

नीतिः क्वचित्तत्र भवेन्न शौर्य, धैर्य क्वचित्तत्र भवेन्न रूपम् ।
विशुद्धनिश्शेषगुणाधिवासः, कुमारवत् कोऽपि न दृश्यतेऽत्र ॥६०॥

सत्स्वप्यसाधारणसद्गुणेषु, पुण्योदय कार्यगतौ गरीयान् ।
अत्रैव सुस्वप्नविलोकनाद्यै - लिङ्गैः परैः स प्रथित पुराऽपि ॥६१॥

तद्यौवराज्ये विनिवेश्यतां स्राक्, सूनुः समर्थश्च जनप्रियश्च ।
न लभ्यते स्वर्णमहो सुगन्धि, सन्नद्धमूर्त्तिर्मृगनायको वा ॥६२॥

ततः समाहूय कुमारराज, राजाऽऽदिदेश प्रणयप्रगल्भम् ।
वत्स ! प्रजापालनमेव धर्म, क्षोणीश्वराणां प्रथमः प्रतीतः ॥६३॥

कुलक्रमादेव विधीयतेऽसा - वस्माभिरुत्त्रासितशत्रुपक्षैः ।
तथापि शक्तेरनतिक्रमेण, त्वयाऽपि तत्र क्रियतां प्रयत्नः ॥६४॥

प्राज्ञोऽपि नाभ्यासमृतेऽपि राधा-वेधं विधत्ते वशितां हृदो वा ।
तन्मन्त्रसिद्धेरिव पूर्वसेवा, राज्यस्य सन्धेहि कुमारभावम् ॥६५॥

दुष्टाऽक्षमित्वं नयशालिता च, द्वयं तदङ्गं सहजं च तत्ते ।
सर्पाशन प्रावृषि नर्त्तनं चानुशिष्यते केन नव शिखण्डी ॥६६॥

किन्त्वङ्ग ! तारुण्यमरण्यवह्नि - विवेकतृष्णाप्रसरस्य दीप्तः ।
सदेन्द्रियार्थास्तु शुभप्रवृत्ते - र्विबाधका राहुकरा इवेन्दोः ॥६७॥

दुष्टद्विपोच्छृङ्खलचेष्टितानि, समर्पितापदि वतेन्द्रियाणि ।
मनोवनौका अपि पक्ष्मलाक्षी, लताविलासोत्सुक एव लोलः ॥६८॥

स्त्रियोऽपि साक्षान्नरपक्षिपाशा, द्यूतानि कूटानि धनैणकानाम् ।
खलाः खलीकारपदानि नीतेः, शचीपतेरप्यवशैव लक्ष्मीः ॥६९॥

कामोऽपि दुर्वारतरः पिशाचः, क्रोधोऽपि योधः समदो बलीयान् ।
हर्षश्च दारिद्र्यमिवाऽतितुच्छ - भावप्रदः स्यादनिशं प्रवृत्तः ॥७०॥

दुष्पूरगर्त्तप्रतिमोऽत्र लोभो, मानो गुरुष्वप्यपमानदर्शी ।
इति प्रभूतारिवशः कथं स्यात्, सुखी सुविद्वानपि जीवलोके ॥७१॥

तद्वत्स ! निष्पङ्कयशःप्रियेण, षड्वर्ग एष प्रथमं विजेयः ।
नाध्वंसिते संतमसे प्रकाशः, प्रवर्द्धते यद्भुवि भानुनाऽपि ॥७२॥

यदेष सर्वव्यसनप्ररोहः, प्रोन्मूलिते चाऽत्र न सङ्कटन्ते ।
दोषा हि तारुण्यवशित्वमुख्या, न कार्यसिद्धिर्यदकारणा स्यात् ॥७३॥

ज्ञानाङ्कुशेनाऽऽत्मवशो विधेयः कुमार्गगो यौवनमत्तदन्ती ।
न जातु लब्धप्रसरो भुजङ्गः, क्षेमाय कस्याऽपि महाविषः स्यात् ॥७४॥

विदग्धमप्यात्तसमस्तवित्तं, निष्ठ्यूतलीलामधिरोपयन्ति ।
यास्तासु रम्यास्वपि पण्ययोषित्स्वासज्यते केन विचक्षणेन ॥७५॥

विषाक्तबाणप्रतिमः परं यः, समूलकाषं कषति क्षणेन ।
संसर्गतोऽसौ व्यथको मुखेन, कर्णेजपः कैः श्रियते सकर्णैः ॥७६॥

यासु प्रमोदेन विसारिताक्षः, सद्दृष्टिरप्यन्धतुलां भजेत ।
कामेन नूनं हृतलोचनत्वात्, तास्वायताक्षीष्वनुरज्यते कः ॥७७॥

विमृश्यतां वत्स ! कथंव तस्य, शूरेषु का यः सुभटः सदङ्गः ।
नग्नाटभग्नक्षतपौरुषेण - ऽनङ्गेन जीयेत जगद्विनिन्द्यः ॥७८॥

अपि प्रवृत्तिं कुरुते न धन्यो, द्यूतेऽपि नासादि विनाशशूरे ।
इहैव सन्दर्शितनारकोरु - दुःखे क्षुदम्बुप्रतिषेधनाग्र्यैः (ग्र्यैः) ॥७९॥

उत्त्रस्तनश्यद्घनजन्तुघात - प्रदत्तपापर्द्धिमपास्तकीर्त्तिम् ।
प्रदीक्षितो हन्तुमरीन् रणार्हान्, पापर्द्धिमप्युत्सृजति प्रवीरः ॥८०॥

उच्छृङ्खलं वाजिवदिन्द्रियं भवे - देकैकमप्याशु विपन्निबन्धनम् ।
पञ्चापि तादृंशि तु तानि पावकाद्, दाहं ध्रुवं कोटिगुणं ददत्यहो ॥८१॥

अनारतं नीचगतिप्रसक्तया, गाम्भीर्यराशेः सुतयाऽपि पापया ।
वाच्यत्वमानायि पिता यया श्रिया,तयाऽपि माद्यन्ति कथं विवेकिनः ।।८२।।

अश्वादयो ह्यल्पधियाऽपि दम्या-स्ततो न तेषां दमनेऽपि कीर्त्तिः ।
इतीव धन्या दमयन्ति चेतः, सुदुर्दमं शेषजनैः सदा यत् ।।८३।।

मनोरथेनाऽपि पराङ्गनाया, निपातयत्याशु स विक्रमोऽपि ।
लङ्केशवत्स्वं नरकेऽतिघोरे, तेनाऽन्ययोषां सुधियस्त्यजन्ति ।।८४।।

तत्पुत्रपुत्रीयितविश्वविश्वः, सौजन्यपण्यापणतां भजेथाः ।
दौर्जन्यपर्जन्यभिया सुदूरं, नश्यन्ति यन्मानवराजहंसाः ।।८५।।

प्रजानुरागः परिवर्धनीयस्त्वया सरिन्नाथ इवोडुपेन ।
न हि श्रियस्तद्विकलस्य राज्ञो, भवन्ति भोगा इव दुर्गतस्य ।।८६।।

सन्न्यायनिष्ठः सदयो भव त्वं, प्रजानुरागाय यथैव रामः ।
यदेतदूनः स्वयशःकुलादेः, सम्पद्यते रावणवत् क्षयाय ।।८७।।

पराक्रमः सर्वगुणेषु राज्ञां, शस्यो विहङ्गेष्विव वैनतेयः ।
प्रकृष्टभावाद् विकला हि तेन, तृणादपि स्युर्लघवो नरेन्द्राः ।।८८।।

धैर्यक्षमावैनयिकाऽऽर्यचर्या-मुख्यान् गुणान् स्वात्मनि सन्निदध्याः ।
उच्चैःपदाय स्तनपीठशय्यां, हारोऽपि नाऽऽप्नोति गुणापवृक्तः ।।८९।।

किं भूयसा वत्स ! तवोदितेन, नैसर्गिकासङ्गचगुणस्य मूलात् ।
किं चन्द्रमाः केनचिदद्य पाण्डु-र्विधीयतेऽन्येन सदाऽवदातः ।।९०।।

तत्कार्यमार्याचरितेन कार्यं, त्वयाऽधुना सद्गुणवल्लभेन ।
ब्रह्माण्डभाण्डं पयसेव पूर्णं, येनाऽऽदधासि स्वयशोऽमृतेन ।।९१।।

इत्यादि सप्रेमसमग्रमन्त्रि - प्रजासमक्षं क्षितिपोऽभिधाय ।
विनम्रवक्त्रं विनयात् त्रपायाश्चारोप्य भद्रासनभूधरेन्द्रे ।।९२।।

ध्वनद्भिरत्युद्भटनादतूर्यैः, स्फूर्जद्यशःश्रीपटहैरिवाऽस्य ।
तं सर्वमङ्गल्यविधानपूर्वं, निवेशयामास स यौवराज्ये ।।९३।।
युग्मम्

शीतांशुः शरदेव पद्ममलिनेवेन्दुद्युतेवाम्बरं,
हारेणेव कुचस्थलं पिकरुतेनेवाऽखिलं काननम् ।
हंसेनेव सरः स्मरस्मितविलासेनेव मुग्धानना,
रेजे राजसुतः प्रजाप्रमदनोऽसौ यौवराज्यश्रिया ॥६४॥

इति युगप्रवरागमश्रीमज्जिनपतिसूरिशिष्यलेशविरचिते
श्रीसनत्कुमारचक्रिचरिते यौवराज्याभिषेको
नामाष्टमः सर्गः । छ. । ८ ।

नवमः सर्गः

प्राप्य श्रियं तामधिकं व्यराजद्, राकामिवाऽखण्डतनुः शशाङ्कः ।
ऐधिष्ट हर्षेण सह प्रजानां, महोऽपि सर्वत्र पुरेऽथ तत्र ॥१॥

भूपोऽपि तत्रार्पितराज्यभारः, सुखी मनाक् संववृते चिराय ।
क्षोणीसमुत्क्षेपसहेऽहिराजे, धरानिघृष्टांस इवादिकोलः ॥२॥

ततो महाराजकुमारकाभ्यां, समञ्जसं जात्यतुरङ्गमाभ्याम् ।
समं वहद्भ्यामिव कल्पितार्थ-प्रसाधको राज्यरथो व्यधायि ॥३॥

उज्जम्भिताम्भोरुहचारुवक्त्रो, नानासुगन्धिप्रसवाभिरामः ।
वनप्रियाकूजितकान्तगीति - रथागमत् कामुकवद्वसन्तः ॥४॥

पुष्पेषु सर्वेष्वपि दत्तहासः, कामिष्विवाधीननिजप्रियेषु ।
मरुत्प्रणुन्नासु लतासु लास्यं, यच्छन्नशेषाष्विव कामिनीषु ॥५॥

स निर्मलेन्दूद्भटमीनकेतु - प्रगल्भमित्रो जगदप्यजैषीत् ।
सविष्णुभीमः सकलं किरीटी, यथा कुरूणां बलमुग्रधामा ॥६॥

युग्मम् ।

समुन्मिमील स्वत एव तत्र, शृङ्गारयोनिर्जनमानसेषु ।
सरस्सु पद्मौघ इव स्वभावो, नाऽपेक्ष्यते कारणमङ्गबाह्यम् ॥७॥

सनत्कुमारोऽपि महेन्द्रसिंह - मुख्यैर्वयस्यैरुडुभिर्यथेन्दुः ।
विराजमानस्तुरगाधिरूढैः, सहस्रशः पौरजनैर्विदग्धैः ॥८॥

उच्चैःश्रवाः किं भुवमागतोऽयं, शक्रेण भक्त्या प्रहितः कुमारे ।
सूर्यस्य रथ्यः किमु वाङ्गरोक्ष्य-लोभेन नेत्रक्षणदोऽवतीर्णः ॥९॥

इति तर्क्यमाणमनिलोल्लासिगतिं प्रवरलक्षणनिवासम् ।
समुपारुरोह तुङ्गं, तुरङ्गम जलधिकल्लोलम् ॥१०॥

त्रिभिर्विशेषकम् ।

अन्तःपुरेणाऽप्यनुगम्यमानः, पुराद् विनिर्गत्य स सैन्यराजिः ।
उद्यानमापाह्वयदेनमारान्नूनं रवैरुन्मदकोकिलानाम् ॥११॥

विलासिनीनामिव पुष्पभाजां, वासन्तिकानामुपगूहनानि ।
दृढानि पुन्नागविटाः परापुर्यत्राऽनिशं तन्मकरन्दकाख्यम् ॥१२॥

युग्मम् ।

सा श्रीर्या स्वैर्वयस्यैः सह समुपनता भुज्यते ताम्रचूड -
न्यायेनाऽन्तःप्रसर्पद्बहलमदभरैः स्वैरसंवल्गिताढ्यैः ।
पौरैरन्त पुरैरित्यभजत सवयोभिश्च तत्कानन स,
श्रीमान् कामी कुमारः सुरपतिरिव सन्नन्दनं नन्दनं स्राक् ॥१३॥

रन्तुं प्रवृत्ते रभसात् कुमारे, सम वयस्यैर्वनितागणैश्च ।
तत्राऽवदन्मागधमौलिरेको, वसन्तमुद्दिश्य सनत्कुमारम् ॥१४॥

देवेदानीं वहन्ति त्वदरिमृगदृशां चम्पकान्यास्यलक्ष्मीं,
सन्नद्धानि द्विरेफैस्तदशुभचरिताकीर्तिशोभैः समन्तात् ।
मञ्जीरभ्राजिकान्ताचरणहतिमृतेऽप्यात्तहासातिरेकैः,
रक्ताशोकैः प्रतापैरिव तव बहलैर्भूतलं भाति कीर्णैः ॥१५॥

प्रतिवनमलिनादापूर्वगीतिप्रसक्तेः ,
स्थिरतरपदगत्या वाहनैणस्य नूनम् ।
मलयजतरुसङ्गोद्गन्धयो मन्दमन्दं,
मलयगिरिवयस्या वायवोऽमी वहन्ति ॥१६॥

श्रीखण्डाश्लेषमाद्यद्विषधरगरलोद्गारगाढानुषङ्गान् ,
मन्ये मूर्च्छातिरेकं ददति विरहिणां हारिणोऽमी समीराः ।
आनन्दं निर्झराम्भःकवलनकलनान्निघ्नकान्ताकुचानां ,
देव ! त्वद्दृष्टिपाता इव रिपुवपुषां भक्तिभाजां च तुल्यम् ॥१७॥

पापान्यस्मिन्निरोधे प्रहसितवदनान्याविरासन् प्रसक्ता -
न्यस्मन्मित्राम्बुजन्मद्विषति च शिशिरे चन्दनौघासहिष्णौ ।
कुन्दानीति प्रहन्तुं ददिव परमास्कन्दमाबद्धरोषो ,
धावत्याक्रान्तविश्वस्त्वमिव रिपुनृपान् मारुतो दाक्षिणात्य. ॥१८॥

पुनरपि मधुमासो दुर्लभः कामकेली ,
वसतिरिति निरस्तद्वन्द्वमालिङ्गनेभ्यः ।
क्षणमपि न विरेमुः कामिनः कामिनीनां ,
रिपव इव तवान्तस्तापसंश्लेषणेभ्यः ॥१९॥

मधोः स्वमित्रस्य विधुर्विलोक्य, लक्ष्मीमिवोन्निद्ररुचिर्बभूव ।
तवेव विस्फारितकैरवाक्षः, पद्माभिरामस्य महेन्द्रसिहः ॥२०॥

नानाप्रसूनोच्छलितैः परागैरुद्धूलितं काननमद्य भाति ।
जगज्जयायोद्यमिनः स्मरस्य, नृपस्य नूनं बलरेणुपूरैः ॥२१॥

कान्तावक्त्राब्जवान्ताद्भुतमधुरमधूद्गन्धिगण्डूषसेके -
नेवोज्जृम्भप्रसूना किरति विरहिणां मानसं केसराली ।
रक्तश्यामातिपाण्डुप्रसवकवचितः संदधातीश ! भास्व -
न्नानारत्नोज्ज्वलस्य स्फुटितकुरबकस्त्वत् किरीटस्य कान्तिम् ॥२२॥

विदधति सहकाराः कोकिलाकूजितानां ,
द्विगुणतरकलत्वं स्वप्रवालप्रदानैः ।
श्रितजनविषयः स्यादुन्नतानां तवेव ,
प्रवरतरसमृद्धिस्फातये पक्षपातः ॥२३॥

किं कामेन प्रयुक्ताः शितिदलगुलिका वश्यतायै जनानां ,
किं वा कालेन दंष्ट्राः कवलयितुमिमा व्यञ्जिता विप्रयुक्तान् ।

किं वा बीजानि वृक्षैस्तमस उपहितान्येवमाशङ्क्यमाना ,
मन्येऽकीर्त्तिप्रतानाः प्रतिवनमलयस्त्वद्द्विषां सञ्चरन्ति ॥२४॥

विष्वक्सञ्चारिमत्तस्मरविजयगजस्फारदानाम्बुगन्ध -
च्छायामेलाफलानि स्फुटनपरिमलोद्गारतः संवहन्ति ।
देव ! त्वत्कीर्त्तिपुष्पस्रगुदितमधुरामोदलीलां परां वा,
को वा नानेकलक्ष्मीक्षितिरिह भवति प्रौढपुष्यद्गुणाढ्यः ॥२५॥

स मदनवनिताङ्गश्लिष्टवत्पुष्पपूर्णः ,
कुरबकतरुरुच्चैर्नीचकोऽप्यद्य जातः ।
कुसुमसमयधाम्नाम्नातमप्यन्ययोगात् ,
त्यजति हि निजवृत्त सत्वर प्रायशोऽल्पः ॥२६॥

विभाति नवचम्पकस्रगुपविष्टभृङ्गावलि ,
प्रियाकरसमर्पिता तव विशालवक्षःस्थले ।
वसन्तवनसम्पदा त्वदवलोकनाय ध्रुवं ,
समीपतरवर्तिनी दृगुपसर्पिता कौतुकात् ॥२७॥

प्रियाशिरसि शेखरो व्यरचि सादरं यस्त्वया ,
मुदा वहति साऽथ तं त्रिजगतो महामानिनी ,
न हि प्रियतमाजनो निजपतिप्रसादाद्वरा -
ममर्त्यपतितामपि स्वहृदि मन्यते सम्मदात् ॥२८॥

आंदोलिता यद्भवतैव दोलारूढप्रियागाढतरानुरागात् ।
तत्तत्सपत्नीवदनानि जज्ञुः, श्यामानि मानो हि सुदुस्सहोऽरौ ॥२९॥

रामा हि दोलासु समुच्छलन्त्यः, समीपगा आम्रगकोकिलानाम् ।
गायन्ति यत्तेन तदङ्गनानां, विपक्षकालुष्यमुपानयन्ति ॥३०॥

ईषद्गलत्पीनकुचावृतीनां, दोलासु लोलासु पुराङ्गनानाम् ।
विलोकनं लोलदधोंशुकानां, क्षणोऽभवत् स्वर्गसमो विटानाम् ॥३१॥

अभ्यासभाजं सहकारमेषा, वासन्तिका पुष्पवती श्रयन्ती ।
उत्कण्ठयत्याशु सभर्तृकाणां, तथैव संश्लेषविधौ मनांसि ॥३२॥

वसन्तराजस्य वनश्रिया सा, समागमे सम्प्रति वर्त्तमाने ।
पलाशराजिः कुसुमावृतत्वात्, कौसुम्भवस्त्रेव विभाति नूत्ना ॥३३॥

इति प्रियालापिनि मागधेशे, प्रसन्नमालोक्य कुमारमेका ।
प्रियासखी मागधिकाऽर्द्धवृद्धा, पपाठ माधुर्यवदेवमुच्चैः ॥३४॥

शरीरिणां ह्लादकरः शशीव, केलेरनङ्गस्य विलासगेहम् ।
अनन्यसाधारणकार्यकर्त्त - त्याश्चर्यचर्यानिधिरेष कालः ॥३५॥

अलिनिनदकलानि स्रस्तशीतार्दनानि ,
त्रिदशनिलयलीलामृञ्जि नित्यं धरायाः ।
सरसिरुहविकासाधानदक्षाण्यहानि ,
क्षतशिशिरकलान्येतानि ते तर्जयन्ति ॥३६॥

हृष्टोऽपि चास्या वचनेन हास्यान्, न्ययुङ्क्त चेटीं पठितुं कुमारः ।
साप्यप्रगल्भाप्यपठन्निदेशात्, तस्या विलङ्घ्या स्वविभोर्यदाज्ञा ॥३७॥

हेमन्तविच्छायितबन्धुशोका - दिवाप्यमालिन्यमिहाम्बुजानि ।
सतेजसं तं हि विलोक्य नूनं, शोभां भजन्ते वनिताननानाम् ॥३८॥

गीतैः सपानैः कुसुमौघहासैः, काव्यैः कथाभिः सुविलासिभोगैः ।
दोलाविलासैश्च वनं मनोज्ञैः, कान्ति जयत्येतदहो ! दिवोऽपि ॥३९॥

उत्तेजयत्यश्वकदम्बकं नो, भास्वान् वसन्तोत्सवकेलिलोलः ।
एतद्वनं नूनमयं ह्यहास्यन्, महान्ति तेनाद्य दिनानि नाथ ! ॥४०॥

श्रुत्वैवमस्या वचनानि मागधो, सहस्ततालं युवराजमब्रवीत् ।
मूर्ध्ना विहीना तव पण्डिता ध्रुवं, मूर्द्धन्यहीनं कथमन्यथा वचः ॥४१॥

ततः सहासे सकलेऽपि लोके, विचक्षणा मागधिकेऽतितुष्टे ।
चेटी विलक्षाप्यवदत् सकर्णा, भद्रं किलास्या अपि वीक्ष्यते नो ॥४२॥

अनोष्ठवक्त्रा यदियं वराकी, सभास्वयोग्या विदुषां नृपाणाम् ।
ओष्ठ्यस्य वर्ण्यस्य न जातु गन्धो-ऽप्यस्या वचस्यस्ति बृहद्रदायाः ॥४३॥

सर्वेषु तत्र प्रतिभावतीय - मिति स्तुवत्सु प्रमनाङ्कुमारः ।
विद्वत्सु तस्यै व्यतरत् समग्रं, लग्नं निजाङ्गे शुकभूषणौघम् ॥४४॥

रंत्वा नानाविनोदैरिति दिनमखिलं प्रेमवैदग्ध्यसारैः,
प्रस्थास्नौ स्वं पुरं प्रत्यभिनवमदने साङ्गलीले कुमारे।
जात्येष्वारोपितोद्यत्कनकपरिकरेष्वश्ववृन्दारकेषु,
स्वस्वामिभ्यो नियुक्तैः सपदि च समुपस्थापितेष्वस्थिरेषु ॥४५॥

अश्वं जलधिकल्लोलं, वायुलोलं समुन्नतम्।
लघुकर्णं विशालोरः, पीठं वक्रितकन्धरम् ॥४६॥

कोमलं रोमसु स्थूलकं पिण्डयोः,पाण्डिमाडम्बरैः क्षीरधेः सादरम्।
पृष्ठदेशासन श्यामरत्नांशुभि-र्भूषयन्तं घनैश्चक्रवालं दिशाम् ॥४७॥

काञ्चनालङ्कृतिभ्राजितग्रीवक, शारदं वारिद विद्युतेवाङ्कितम्।
वल्गिकानेकरत्नांशुसम्पादित - व्योमचित्रांशुकोल्लोचकौतूहलम् ॥४८॥

भिद्यवच्छोभनावर्त्तसंवर्गितं, कीर्त्तिपुञ्जानुकारिस्फुरच्चामरम्।
आन्तरेणेव चाध्यासितं तेजसा, सर्वतः फालविस्फोटितक्ष्मातलम् ॥४९॥

आरुरोहामलस्थूलमुक्तास्रज - च्छायया धौतदिग्वामनेत्रामुखः।
यौवराज्याभिषिक्तः स्वमित्रैरसौ, राजपुत्रैः समं भूरिभिर्भोगिभिः ॥५०॥

षड्भिः कुलकम्।

अथ चपलतया तैर्वायुवेगेन गन्तुं,
निजनिजवरवाहाः प्रेरिताः कौतुकेन।
रणशिरसि सरोषैर्धन्विभिः पत्रिपूगा,
इव सममतिजग्मुर्भूयसा रंहसा ते ॥५१॥

तुरगखरखुराग्रक्षुण्ण आसीद् भुवेणु -
प्रकर इनकरौघस्यापि धाताशु नूनम्।
युवनृपवनितानां स्पर्शनं मा स्म कार्षीत्,
स इति झगिति सान्द्रः कञ्चुकीवातिभक्तः ॥५२॥

फणिपतिफणराजिभ्रश्यदुद्रश्मिरत्ना -
स्तृततबलिसद्मप्राङ्गणं तत्र तूर्णम्।
धरणिरपि चकम्पे सूचयन्तीव शोकं,
स नृपनगरलोकस्याशु सम्पत्स्यमानम् ॥५३॥

गगनमपि निनादे बन्दिनां तूर्यकाणा -
मिव कवचयति द्राक् सैनिकानां च तारे।
युवनृपतितुरङ्गः सिन्धुकल्लोललोलः,
सपदि दिवमभाक्षीत् तार्क्ष्यवत् स्वामिवाही ॥५४॥

समभवदथ तत्र क्षोणिपालाङ्गजानां,
तुमुल उरसि दाहः श्रीकुमाराङ्गनानाम्।
नरपतिरपि शोकश्वासशङ्कुद्वयेनो -
द्दलितहृदयभूमिस्तूर्णमागात् ससैन्यः ॥५५॥

किं नीतो वायुनाऽसौ किमुरगरिपुणा श्रीपतिभ्रान्तिभाजा,
किं वा विद्याधरेण स्वसुतविरहिणा तादृशस्तद्भ्रमेण।
किं दुष्टव्यन्तरेण त्रिदशपरिवृढेनेर्ष्यया वाऽतिकान्तः,
कान्ते कोपात् कयाचिद् विबुधललनया लोलया वा रतेषु ॥५६॥

इत्याद्यनल्पकुविकल्पविसारिजल्प -
गर्भानने निखिलपौरजने सशोके।
स्रस्तालकालिककलङ्कितवक्त्रचन्द्रे,
चान्तःपुरेऽश्रुततिपातितपत्रलेखे ॥५७॥

महेन्द्रसिंहेऽपि विवृद्धमन्यु - ज्वलच्छिखिस्फोटितचित्तवेणौ।
नृपो बभाषे धुरि धैर्यसीम्नां, स्थितः समक्षं वचनं जनानाम् ॥५८॥

त्रिभिर्विशेषकम्।

नासौ केनाऽपि नीतः क्वचिदपि न गतः किन्तु मद्भाग्यशाखी,
विच्छिन्नो मूलतोऽद्य ध्रुवमिति पतितं तत्फलं श्रीकुमारः।
सत्स्वेवाऽन्येषु सर्वेष्ववनिपतिसुतेषूद्भटेष्वप्यदृश्यः,
कस्माज्जज्ञेऽन्यथाऽयं परिकुपित इवोन्मुक्तमित्रादिवर्गः ॥५९॥

तत्सम्प्रत्याकुलैरप्यपगतसुकृतैर्मादृशैराप्यते　　किं,
यामिन्यां　सोऽन्तरुद्यद्विरहहुतवहैश्चक्रवाकैरिवार्कः ।
अप्युद्गच्छेत् खरांशुर्निशि न तु कुशलं कर्म केनाऽपि शक्यं,
सन्धातुं जातु सद्यस्त्रुटितमिह सुरेणेव कान्तं निजायुः ॥६०॥

इति युगप्रवरागमश्रीमज्जिनपतिसूरिशिष्यलेशविरचिते
श्रीसनत्कुमारचक्रिचरिते कुमारापहरणो
नाम नवमः सर्गः । छ. । ६ ।

दशमः सर्गः

हिमोपप्लुतपद्मौघश्रीविडम्बिभिराननैः　　।
पुरं प्रविविशुः पौरास्तदुदन्तं विना कृताः ॥१॥
सप्रेमाणोऽपि ते तत्र, कर्त्तुं किञ्चिन्न चक्षमुः ।
विधाविवोपरक्ताङ्गे नक्षत्राणीव साहसम् ॥२॥
सिंहा इव क्रमभ्रष्टा धन्विनो वाऽच्युतेषवः ।
लक्ष्याद्यथा तथा तस्थुर्विलक्षा राजबीजिनः ॥३॥
अवरोधोऽपि रुद्धान्तमन्युरासीद् विनिश्चलः ।
चित्रार्पित　इवोन्मीलनेत्रानुमितजीवितः ॥४॥
वाचोऽपि　नोपससृपुस्तत्र　तस्याऽतिदुःखिनः ।
तीव्राशनिविनिर्घातघातितस्येव　　सर्वथा ॥५॥
उद्योगं　तु　तदन्वेषे　प्रारेभे　नरपुङ्गवः ।
मृगेन्द्रा इव कृच्छ्रेऽपि सत्त्वसारा हि सत्तमाः ॥६॥

सैनिकानादिदेशाऽसौ तस्य लाभे पटीयसः ।
जानक्या राघवाधीशस्तारापतिभटानिव ॥७॥
प्रवर्द्धमानधामासावुदीचीं प्रति चात्मना ।
भास्वानिव मधौ शश्वन्मुक्तजाड्यसमागमः ॥८॥
वृतः पत्तिसमूहेन तेजोराशिविराजिना ।
ग्रहराजिश्रिया भूपः प्रतस्थे धैर्यशेवधिः ॥९॥

युग्मम्

महेन्द्रसिंहस्तं तत्र व्यजिज्ञपदनाकुलः ।
गमनाय प्रभो भक्ताः कृच्छ्रे ह्यात्मनिवेदिनः ॥१०॥
मयि सत्ययमायासः साम्प्रतं न तव प्रभो ! ।
किमस्यति तमोनूरौ यतेत स्वयमंशुमान् ॥११॥
न देव ! तव नष्टोऽयं किन्तु सर्वस्य बाधते ।
किमस्तान्तरितः सूर्यः कस्यचित्तमसे भवेत् ॥१२॥
तं विना देव ! न प्राणा मम स्थातुमपीश्वराः ।
कियत्तिष्ठन्ति पद्मानि प्रफुल्लानि दिनात्यये ॥१३॥
तद्वयस्येन स मयाऽन्वेष्यस्त्वं तिष्ठ निर्वृतः ।
अब्जानन्वेषणे का हि भास्करस्यापि मित्रता ॥१४॥
प्रोचे सचिवमुख्यैरप्यसौ भूपालपुङ्गवः ।
हनूमानिव दक्षोऽयमीदृक्कार्ये नियुज्यताम् ॥१५॥
भवतं साहसिकं शूरं विना भृत्यं न सिद्धयः ।
भूपतीनां न हि द्योताः क्वापि भानुमृते स्फुटाः ॥१६॥
न लभेय प्रवृत्तिं चेत् स्वमनोनेत्रनन्दिनः ।
तच्चितामधिरोहामि वीरपत्नीव निर्धवा ॥१७॥
इत्याधाय महासन्धां नृपादिष्टश्चचाल सः ।
परिच्छदेन स्वल्पेन तेजसा जितकेसरी ॥१८॥

युग्मम् ।

पुरग्रामाकराकीर्णां महीमालोकयन् मुहुः ।
तदर्थं भीषणां प्राप राक्षसीमिव सोऽटवीम् ॥१९॥

विभीतक[1]द्रुमा यत्र कायत्काककुलाकुलाः ।
भूतानेवाऽऽह्वयन्तीव शाखादोर्भिः प्रसारितैः ॥२०॥

भुजङ्गशीर्षरत्नांशुद्योतिच्छिद्रशताकुला ।
या वर्षा द्यौरिवाऽऽभाति खद्योतोद्योतिता निशि ॥२१॥

पलाशा. पुष्पसंवीता यत्र वातप्रकम्पिताः ।
पलाशा इव नृत्यन्तो रक्ताक्तवपुषो बभु· ॥२२॥

तालो हिंतालतालाली कोटिशो यत्र दृश्यते ।
रूक्षा पत्रदरिद्रा च किं राज्ञा सन्ततिर्यथा ॥२३॥

पदे पदे महादावप्लुष्यमाणमृगध्वनीन् ।
या तुष्टस्यान्तकस्येव धत्ते किलकिला-रवान् ॥२४॥

मृगाधिपतयः क्रूरा यत्रोच्छृङ्खलवृत्तयः ।
मृगानभिद्रवन्त्याशु कर्माशा इव देहिनः ॥२५॥

उद्दण्डकोदण्डकराः सर्वसत्वान्तकारिण. ।
किराता यत्र दृश्यन्ते कृतान्तस्येव किङ्कराः ॥२६॥

पुण्डरीकद्युति[2] सिंह ज्योत्स्ना यत्र पतिभ्रमात् ।
पुण्डरीकवधूर्भेजे छायया चित्रित तरोः ॥२७॥

वृक्षस्थबर्हिणां बर्हाश्चित्रवर्णास्तता घनाः ।
आबिभ्रत्युपसंव्यानलक्ष्मी यत्र वनश्रियः ॥२८॥

शिवाफलोपयोगेन गाढातीसारबाधितम् ।
शिवाकुटुम्बकं यत्र मांसायाऽपि न धावति ॥२९॥

शृङ्गारहास्यरसयो - र्दूरे या डिमरूपवत् ।
रौद्रस्येव पद नृत्तप्रेतपात्रव्रजा बभौ ॥३०॥

---

१. भूतवासा । २. श्वेतवर्णं ।

[1]कौशिकद्रुमसंलीनं काकवच्छ्वापदव्रजम् ।
कौशिकस्त्रासयत्युच्चैर्यत्र घूघारवैर्घनैः ॥३१॥

कृष्णसर्पावलिर्यत्र मूषिकौघमनुद्रुता ।
कालिन्दीवीचिमालेव लक्ष्यते कालतोषिणी ॥३२॥

खगाः करिकरङ्केषु पतन्तः क्रूरनिस्वनैः ।
खगामिनामपि त्रासं यत्र यच्छन्ति दारुणाः ॥३३॥

यत्रामिषरसोन्मत्ताः स्फारफेत्कारफेरवाः ।
जयन्त्यट्टध्वनिप्रौढान्नक्तं नक्तंचरानपि ॥३४॥

वराहघातनोद्युक्ता यत्र तैरेव सैरिभाः ।
वराहवे भटा यद्वद् दंष्ट्रास्त्रैः पङ्गवः कृताः ॥३५॥

निस्त्रिंशसर्वलुण्टाक - भिल्लभल्लीहता ध्रुवम् ।
तत्प्रहारान् प्रशंसन्ति कणन्तो यत्र सार्थिकाः ॥३६॥

मृगशीर्षहस्तचित्रोद्धतलुब्धकयुजि नभःश्रियां यस्याम् ।
मृग्यति करिकुलमनिशं, शरणं करुणं चकितनयनम् ॥३७॥

वसतिः कालकेलीनां रौद्रतायाः परं पदम् ।
दुःखानामाकरो धात्रा चक्रे या कौतुकादिव ॥३८॥

तामपि प्रविवेशाऽसौ स्निग्धो मित्राय दारुणाम् ।
विशेत् को वा न तिलवत् सङ्कटं स्नेहनिर्भरः ॥३९॥

अहो स्नेहः पदं सर्वमहाव्यसनसन्ततेः ।
यन्मित्रायाऽविशदयं यमस्यास्यं महाटवीम् ॥४०॥

तत्राऽप्येष निकुञ्जेषु मार्गयंस्तं निरन्तरम् ।
नोपलेभे स यत्नोऽपि तमःस्विव रवेः करम् ॥४१॥

गुञ्जन्मृगेन्द्ररौद्राणि गह्वराणि महीभृताम् ।
आलोकिष्ट स मित्राय प्रेम्णः किं वाऽस्ति दुष्करम् ॥४२॥

---

१. गुग्गुल ।

वानरं नरबुद्धयाऽसौ दध्यौ कोटरगं तरोः ।
तदेकाग्रमनाः स्याद्वा प्रेमणि क्वाविपर्ययः ॥४३॥

दत्तत्रासासु दुर्नादभिल्लपल्लीषु पर्यटन् ।
वयस्यंनाऽऽससादाऽसौ दुर्लभा हि मनःप्रियाः ॥४४॥

दृष्टः शबरसेनासु नासौ तेन क्वचित् सुहृत् ।
दरिद्रस्य गृहे चिन्तारत्नं दृश्येत केन वा ॥४५॥

किरातानपि सोऽपृच्छत् तमव्यक्ताभिभाषिणः ।
अर्थिनो हि मनोऽभीष्टे युक्तायुक्तविवेचकाः ॥४६॥

यथा यथा च तद्वार्त्ता लेभे नाऽसौ प्रियामिव ।
रामवत् ससहायोऽपि प्राखिद्यत तथा तथा ॥४७॥

माऽभूद् वियोगः कस्यापि केनचिच्चित्तहारिणा ।
यदेषोऽन्वभवद् दुःखं तदानीमतिनारकम् ॥४८॥

अनाप्ततत्कथोऽप्येष नोज्झदन्वेषणोद्यमम् ।
दुर्दिने किमदृष्टाब्जस्तेजसो हीयते रविः ॥४९॥

वने न स प्रदेशोऽस्ति यस्तेन न तदर्थिना ।
आक्रान्तः स्नेहबद्धेन प्राणिनेव भवेऽटता ॥५०॥

अन्वेषयत एवास्य तं निदाघः समाययौ ।
तापिताशेषलोकोऽपि कौपं यो न तपत्ययः ॥५१॥

यश्चातितापकृद्भूमेर्भूमिभूतजलाशयः ।
जलाशयोन्मुखकरी करीरपरिपाकदः ॥५२॥

प्रियालमञ्जरीकान्तः कान्ताकण्ठश्लथग्रहः ।
ग्रहाविष्ट इवोद्धूत - धूतच्छदशमीशिराः ॥५३॥

दावज्वालायते स्फूर्जन् यत्रोष्णांशुकरोत्करः ।
प्रगेपि स्वाश्रयस्योच्चैर्नाम सत्यापयन्निव ॥५४॥

समन्तादवनिर्यत्र नखंपचरजःकणा ।
सोपानत्कानपि प्रायो व्यथयत्यध्वगान् पथि ॥५५॥

यत्र चैणा इवाध्वन्या मृगतृष्णा सुतृष्णजः ।
जलाशया हि[1] धावन्तो विपद्यन्ते मरौ घनाः ॥५६॥

गाढाश्लेषस्पृहा स्त्रीणां न सरागेऽपि कुङ्कुमे ।
प्रेयसीवाऽभवद् यत्र क्षणे सर्वो हि वल्लभः ॥५७॥

विदग्धानामभूद् यत्र प्रियाधारा गृहस्थितिः ।
चन्दनद्रवचर्चेव समयज्ञा हि सद्धियः ॥५८॥

उन्मूलयन्ति सच्छायानपि वान्तो महीरुहान् ।
उत्ताला वायवो यत्र क्व वा चण्डेषु मार्दवम् ॥५९॥

[2]मुर्मुराकारसिकताकणाः पवनपातिताः ।
दहन्ति चौरिका नेत्राण्यपि छायासु यत्र च ॥६०॥

अन्धत्वमिव यच्छन्ति यत्र ग्रामेषु योषिताम् ।
रेणूत्करा भृशं सान्द्रा वात्योत्क्षिप्ता दिने दिने ॥६१॥

मण्डलीपवना उच्चैरावर्तितरजोदलाः ।
नृत्यन्मूर्त्तमहाभूतलीलां दधति यत्र च ॥६२॥

मरुतो यत्र सध्वाना भ्रमन्तोऽन्योन्यसंहिताः ।
भूतेन्द्रा इव लक्ष्यन्ते रासकक्रीडितस्पृशः ॥६३॥

मध्याह्ने घर्मसंत्रस्ता वने चित्रगता इव ।
निसर्गचापलं हित्वा यत्र तिष्ठन्ति वानराः ॥६४॥

जगन्तीव सरांसीह यत्र नोज्झन्ति सैरिभाः ।
मलिना दुर्यशःपुञ्जाः कुकवीनामिव क्षणम् ॥६५॥

लोलज्जिह्वागलद्वारिसिक्तसंतप्तभूमयः ।
यत्र छायास्वपि स्वास्थ्यं लभन्ते न मृगारयः ॥६६॥

दन्तिनोऽन्तःसमाकृष्टवारिशीकरवर्षिणः ।
स्वदेहे दाहमानिन्युरन्तं यत्रातिखेदिनः ॥६७॥

यत्र जीर्णतरुस्कन्धोत्कीर्णच्छिद्रशताश्रयाः ।
अपि तापेन दह्यन्ते कीटकाश्चटका इव ॥६८॥

१. 'पि' इति पुस्तके पाठः । २. शिखरविकलवह्निः ।

वराहा अपि पङ्कानि न त्यजन्ति मृगा इव ।
यत्र छाया वनानीव घर्मदाहातिभीरवः ॥६९॥

पक्षिणस्तप्तभूपातपत्कस्वाङ्गैः सहस्रशः ।
यत्रापूर्वाशनातिथ्य कल्पयन्तीव रक्षसाम् ॥७०॥

गवाक्षाः सूक्ष्मवासांसि चन्दनं चन्द्रशालिकाः ।
यत्र सेव्यत्वमायान्ति विरोधादिव शैशिरात् ॥७१॥

तटरुहतरुपत्रश्रीविलोपापमाना -
दिव लघुतनिमानं सिंधवः संश्रयन्ते ।
दवदहनविदीर्यद्वेणुनादैर्गिरीन्द्रा ,
वनविभवविनाशं यत्र शोचन्ति नूनम् ॥७२॥

मलिनमुखविगन्धैः किंशुकादिप्रसूनै -
र्बहुभिरपि वसन्तस्याशुभैः कि प्रफुल्लैः ।
ध्रुवमिति तदवज्ञां शसितुं यो दधाति ,
स्मितसुरभिसुवर्ण मल्लिकापुष्पमेकम् ॥७३॥

रभसदयितपीतप्रौढलाटाङ्गनोद्य -
द्विशददशनवासःपाटला पाटलाऽपि ।
शुकहरितशिरीषस्पर्द्धयाकान्तगन्धा ,
विकसितवदनाऽभूत् यत्र कान्ते प्रियेव ॥७४॥

अविरतजलकेलिस्निग्धकाया दिनान्त -
र्मलयजरससिक्ताः कायमाने विशन्तः ।
शिशिरतरसमीरस्पर्शसम्मीलिताक्षा ,
हिमसमयसमं यं पुण्यभाजो नयन्ति ॥७५॥

दलत्कनककेतकीवदनचुम्बने लालसः ,
कठोरघनविस्फुरत्कुटिलकण्टकैराकुलम् ।
विशत्यलियुवा वनं तिमिरभीषणं यत्र च ,
श्रयन्ति किमु सङ्कटं न नवरागिणः कामिनः ॥७६॥

खरपवनखरांशूच्चण्डदण्डाधिराजा -
द्यसमघनसहायो दारुणस्तापलक्ष्म्या ।
सुरभिनृपसमृद्धिध्वंसने बद्धकक्षः ,
प्रतिनरपतिलीलां यः परां सदधाति ॥७७॥

तत्रापि खिन्नधीर्मित्र स तथैवाऽगवेषयत् ।
अत्यर्थिनो हि नाकालः कोऽपि स्वार्थप्रवर्त्तने ॥७८॥

स्वापापदेशतोऽनङ्गमूर्च्छावत्पान्थशालिषु ।
प्रपामण्डपदेशेषु शीताम्बुकणवर्षिषु ॥७९॥

द्राक्षालतागृहेष्वम्भःकुल्याशीतलवायुषु ।
उद्गीतकिन्नरद्वन्द्वोत्कर्णितैणौघराजिषु ॥८०॥

दुरितच्छेदनायव चिरवृद्धकथापरे ।
ग्रामग्राम्यसमाजेऽपि गोष्ठीबन्धसदादरे ॥८१॥

पत्तनेषु पठच्छात्रध्वानैर्वृत्तजनश्रुतौ ।
स्तोमे मठानां त्रिलुठच्छब्दब्रह्मलवे ध्रुवम् ॥८२॥

आपानेषु च सैन्येषु पद्यासु परिषत्सु च ।
नृपाणां न च लेभेऽसौ तममर्त्यमिव क्वचित् ॥८३॥

आदिकुलकं षड्भिः ।

तथापि न न्यवर्तिष्ट स ततो व्यवसायतः ।
धीरा हि न विषीदन्ति सादहेतौ महत्यपि ॥८४॥

पर्वतेष्वप्यसौ दृष्टि पातयामास तन्मनाः ।
नष्टाऽनर्घ्यमहारत्नाः शङ्कयन्ति गुरूनपि ॥८५॥

अकस्मादन्तरिक्षेऽपि श्रुतपत्रिपटुध्वनिः ।
क्षिप्रं चक्षुः स चिक्षेप नार्थिनां कोप्यगोचरः ॥८६॥

निखिलनगरग्रामारामानसाववलोकय
न्नपि न परिशश्राम प्रेम्णा स्वमित्रदिदृक्षया।
ननु कियदिदं सीताहेतोः स्फुरत्प्रभुभक्तिना,
पवनतनयेनाम्भोनाथोऽप्यतारि सुदुस्तरः ॥८७॥

इति युगप्रवरागमश्रीमज्जिनपतिसूरिशिष्यलेशविरचिते
श्रीसनत्कुमारचक्रिचरिते मित्रान्वेषणो
नाम दशमः सर्गः । छ. । १० ।

एकादशः सर्गः

तथैव तस्याऽटत एव विष्वक्, वसुन्धरां भूमिधराभिरामाम् ।
अदृष्टमित्रः स इवाश्रुवर्षी, पयोदकालोऽपि समुल्ललास ॥१॥

यत्राऽम्भोभृन्नरेन्द्रो रचयितुमिव साम्राज्यमेकातपत्रं,
युक्तः सैन्यैर्बकानां प्रतिनृपतिमिव ग्रीष्ममुच्छिद्य मूलात् ।
तृष्णां तस्यैव कान्तां हननसमुचितां तापिकां विष्टपस्या-
न्वेष्टुं विद्युत्कटाक्षैः कटु रटति रुषा व्योम्नि गर्जापदेशात् ॥२॥

धाराम्भःसायकौघं क्षिपति सरभसं यत्र योधानुकारे,
प्राणश्यन्मानशत्रुश्चकित इव मनो मन्दिरान्मानिनीनाम् ।
किं चात्यन्तं दिदीपे सकलविरहिणां मानसेऽनङ्गवह्नि-
स्तेनापूर्वेन्धनेनाचिररुचिरिव सुध्यातकान्ताकुचानाम् ॥३॥

शष्पैरादृष्टिपातं दलितमरकतत्विड्भिरानद्धमध्या,
कान्तेवाऽऽभाति सान्द्रासितवसनमहाकञ्चुका यत्र धात्री ।
पान्थस्त्रीहृद्विदारातनुरुधिरलवाभासिभिः शक्रगोपै-
स्त्वन्योन्यासङ्गवद्भिर्विरचितविलसत्पद्मरागावलीव ॥४॥

निन्ये यो वृद्धिमद्भिर्भुवि सकलनदीनीरदैरात्तनीरै -
रम्भोधेस्तद्वधूनां प्रियकरणरुचिर्नूनमुच्चैः कृतज्ञः ।
माद्यन्मद्गुप्रघोषैर्हरि[1]-निवहरवैश्चास्तुवंस्तां ध्रुवं यं ,
को वा नौचित्यकारी विदितसुचरितैः कीर्त्यते पूर्णकामैः ॥५॥

यत्र [2]स्तोककयोषितो घनजला वान्तिस्पृशोऽपि ध्रुवं ,
दृष्ट्वा गर्भभरालसा बकवधूस्तत्रापि बद्धस्पृहाः ।
कूजन्त्यः करुणं पयोदमनिशं याचन्त आत्मेप्सितं ,
लब्ध्वा तुच्छसमीहितोऽपि जगति प्रायेण को निःस्पृहः ॥६॥

मार्गेष्वम्बुभरावरुद्धगतिषु प्रस्थास्नुपान्थाङ्गना -
नेत्राब्जेषु यथा श्रवत्सु जलदेष्वच्छिन्नधारं पयः ।
आदित्या इव सोद्यमा अपि महातेजोनिधानत्वतः ,
कान्ताऽऽलिङ्गनलोलुपा इव नृपा यात्रां न यत्राऽदधुः ॥७॥

मधुरजलदनादैर्यत्र नृत्तप्रवृत्ताः ,
समदशिखियुवानः केकयाहूय नूनम् ।
प्रचिकटयिषवः स्वं तत्पुरो लास्यशिल्पं ,
युवतिजनमनोभ्यो मानमुद्वासयन्ति ॥८॥

ददति स चटुनागाः सल्लकीपल्लवानि ,
द्विगुणतररसानि प्रेयसीनां मुखेषु ।
तरुणमधुकरोऽन्तर्यूथिकायाः परागैः ,
परिचिततनुरासीद् यत्र गौराङ्गयष्टिः ॥९॥

कुटजविटपिपुष्पैर्नव्यधाराकदम्बैः ,
प्रतिवनमपनिद्रैः शोभितो यः शिलीन्ध्रैः ।
नवजलधरधारी तारताराबलीक -
द्विरदपतिविराजद् राजलीलां बिभर्त्ति ॥१०॥

---

१. चातक । २. मण्डूक ।

यत्र द्विरेफाः स्मितकेतकानि, श्रयन्ति हित्वा कमलं जलान्तः।
विपन्निमग्नं त्यजतां स्वसेव्यं, व्रीडाऽपि नो लुब्धमलीमसानाम् ॥११॥

नूनं शक्रः स्वचापं प्रकटयति घनध्वानटङ्कारकान्तं,
मुञ्चन् धाराम्बुकाण्डान् पथिकजनमभिक्रोधतस्तन्निवृत्त्यै।
विष्वक् यस्मिंस्तडिद्भिर्नवनयनसहस्रं दधानाऽतितारं,
यद् राजा दुर्बलानां बलमिति विलसत् पक्षपातोऽबलासु ॥१२॥

यत्रावहन् प्रथममश्रुजलप्रवाहाः,
सम्भारतश्चिरगतप्रियभर्तृकाणाम्।
पश्चान्निनादचकिताकुलसिद्धकान्ता,
कान्तावगूहनकृतो गिरिनिर्झरौघाः ॥१३॥

खद्योतैर्द्योतमानैर्नभसि भुवि जलासारवद्भिर्मरुद्भि-
र्भेकक्वाणैः सरस्सु द्रुततिषु शिखिनां ताण्डवाडम्बरैश्च।
सोत्कण्ठा सर्वतोऽपि प्रतिदिनमबला यत्र चाधीयमाना,
भर्तृष्वाक्रोशमुच्चैर्ददति चिरतरप्रोषितेष्वप्रसन्नाः ॥१४॥

स्फूर्जत्सौरभयक्षकर्दमयुजः कान्तोपगूढा दृढं,
पीतस्वादुतदद्भुताधररसा यत्राखिलाः कामिनः।
शृण्वन्तो जलदध्वनिं शिखिकुलस्यारब्धनृत्येक्षणाः,
पञ्चानामपि सश्रयन्ति सततं यत्रेन्द्रियाणां मुदम् ॥१५॥

ऊर्द्ध्वं प्रावृतनीलनीरदपटा वन्या लसत्कञ्चुका,
बिभ्राणा सुरगोपचित्रितमधोवस्त्रं तृणं विस्तृतम्।
प्रौढप्रावृडिति प्रकल्पितनवाकल्पा करोत्यङ्गिनः,
सोत्कण्ठानभिसारिकेव हिमगुज्योत्स्नापिधानप्रिया ॥१६॥

तत्रापि तीव्रादरतोऽन्वियेष, सनत्कुमारं स महेन्द्रसिंहः।
नदीषु वापीषु च निर्झरेषु, द्रोणीषु[1] च क्षोणिभृतां ततासु ॥१७॥

---

१. शैलयोः सन्धिषु।

न किंवदन्तीमपि चापमैत्री, रुचिं यथा कैरवखण्डमन्तः ।
तथापि स प्रश्रयतोऽवतस्थे, वने प्रतिज्ञातधना हि धीराः ॥१८॥

सन्धार्यमाणप्राणस्य तत्सङ्गममनोरथैः ।
संवत्सरोऽतिचक्रामाऽन्वेष्टुस्तस्य भुवस्तलम् ॥१९॥

ततः स चिन्तयामास क्षितौ तावन्न विद्यते ।
असौ न हि न पश्येत् सद्व्यापृत[1] चक्षुरादरात् ॥२०॥

तद् विशामि विशाल किं भोगिभीम रसातलम् ।
देवाद्भवेदसम्भाव्येऽप्यस्य देहिस्थितिर्नृणाम् ॥२१॥

उत्पतामि दिवं किं वा कमप्याराध्य नाकिनम् ।
देवतानां प्रसादस्यागोचरो यन्न किंचन ॥२२॥

किं वा विद्याधरश्रेणौ यामि सिद्धसहायकः ।
नागम्यं स सहायानां यदस्ति किमपि क्वचित् ॥२३॥

इत्थं यावदनेकध्यं ध्यायन्नध्याममानसः[2] ।
द्वित्राण्येव पदान्येष चचाल स्तिमितेक्षणः ॥२४॥

तावत् सारसहसादिरवस्तेनोपशुश्रुवे ।
सुहृदासङ्गम मङ्क्षु मधुरः सूचयन्निव ॥२५॥
युग्मम् ।

समाजगाम सुस्पशः स्पर्शनोऽप्यस्य सम्मुखः ।
मित्रोपश्लेषज मोदं यच्छन्निव सविग्रहम्[3] ॥२६॥

वयस्यमिव सुस्निग्धं चक्षुष्य नन्दनं हृदः ।
वनं स पुरतोऽद्राक्षीदिलायामिव नन्दनम्[4] ॥२७॥

चुकूजुस्तत्र च क्रौञ्चोद्दण्डकारण्डवादयः ।
सवयोऽर्थिनमाह्वातुं तं मुदा सत्वरा इव ॥२८॥

ननृतुर्नीलकण्ठा अप्यस्यासन्न महोत्सवम् ।
दर्शयन्त इवोत्केकाः समुदो बान्धवा इव ॥२९॥

---
१. विद्यमान । २. निर्मल । ३. मूर्त । ४. सुरवन ।

एवमन्तःसमाधानाधायिनानानिमित्तवान् ।
व्रजन् स तद्वनाभ्यासे प्राप पूर्णं जलैः सरः ॥३०॥

निमित्तावगमादन्तर्बहिर्वारिनिषेकतः ।
सोऽत्रेषन्निर्ववौ कान्तायुक्तः स्नात इव द्विपः ॥३१॥

निमित्तान्यनुलोमानि क्व क्व वा विजनाटवी ।
इत्यालोचयतोऽस्यालं चक्षुः पुस्फोर दक्षिणम् ॥३२॥

तस्यापसव्यः स्कन्धोऽपि ननर्त्तेव स्फुरन्मुहुः ।
चेतः समुल्ललासेवाऽऽकस्मिकप्रमदश्रिया ॥३३॥

श्रवणातिथितां चागान्मधुरो वल्लकीक्वणः ।
अम्भोदस्तनितस्पर्द्धिमृदङ्गनिनदैः सह ॥३४॥

किन्नरीकलगीतानि कोकिलाकूजितान्यपि ।
द्विषन्ति श्रुतिदोलायां दोलयामासुरुन्मुदः ॥३५॥

आमोदमप्यय जघ्रौ तं दिव्यं तत्र कञ्चन ।
आजन्मापि न यः पूर्वं घ्राणगोचरतां ययौ ॥३६॥

विलोक्याद्भुतमुद्भूतं तत्राकस्मिकमीदृशम् ।
पुनर्विभावयामास कौतुकोत्कलिकाकुलः ॥३७॥

किमिन्द्रजालमेवैतदथ स्वर्गसमागमः ।
किं वा मम हृषीकाणामभूद् व्यत्याससन्ततिः ॥३८॥

उताऽदृष्टेन दुष्टेन केनाऽपि परिपन्थिना ।
मामुद्भ्रंशयितुं सत्वान्नाटितं कूटनाटकम् ॥३९॥

यथाग्नौ चम्पकोद्भेदो न्यग्रोधे पुष्पमञ्जरी ।
बालके श्मश्रु सम्भाव्यमेवं सर्वमिदं वने ॥४०॥

त्रिभिर्विशेषकम् ।

एव वितर्ककल्लोललोलमानससागरः ।
गच्छन्क्षण ददर्शैष प्रासादं मेरुडम्बरम् ॥४१॥

स्फाटिक सप्तभूमं सन्मणिभिर्विविधैश्चितम् ।
शारदाभ्रमिवाश्लिष्टं सुरचापप्रभोत्करैः ॥४२॥

रत्नप्रभाभिराबद्धनानाशक्रशरासनम् ।
हसन्तमिव वर्षाद्यामेककोदण्डगर्विताम् ॥४३॥

जनौघाऽव्यक्तनादेन गुञ्जद्भृङ्गमिवाम्बुजम् ।
धूमैः कृष्णागुरोः सान्द्रैरुपर्यादर्शिताम्बुदम् ॥४४॥

ऊर्ध्वभूमौ महानीलप्रभास्वम्भोदविभ्रमात् ।
वलक्षाभिः पताकाभिर्बलाकाभिरिवाचितम् ॥४५॥

विचित्ररचनोच्चित्ररतिकेलिगृहाश्रयम् ।
वेश्यापाटकवद् भोगिलोकस्यानन्दनं दृशोः ॥४६॥

निपातोत्पातवद्विद्याधरैर्देवैरिवोज्ज्वलैः ।
आकीर्णमवतीर्णं कौ विमानमिव वज्रिणः ॥४७॥

आदिकुलकं सप्तभिः ।

त दृष्ट्वा भावयामास क्वेयमृद्धिर्वनं क्व च ।
सर्वथा फलितः कल्पशाखी धन्वन्ययं महान् ॥४८॥

तत् प्रविश्यात्र मित्रस्य करवाणि गवेषणम् ।
फलस्येव महाक्षेत्रे कृषीबल इवादरात् ॥४९॥

आसन्नतरगस्यास्य कर्णकोटरमाविशत् ।
स्वरस्तारः शुकस्येव नग्नाचार्यस्य कस्यचित् ॥५०॥

यत् खड्गः खड्गिलोलां[1] कलयति विलसन् कुम्भिकुम्भस्तनेषु ,
प्रोच्चैर्नानाबलानां त्वनभिमतकृतामादधत् खण्डनानि ।
पार्थक्य क्वापि गच्छन् सुनिविडपरिवारादपि प्रौढसार-
श्चित्रं नैवानुरक्तस्तदपि च सुरसद्वन्द्वभावावियुक्तः ॥५१॥

स्थातुं सङ्ग्रामभूमौ क्षणमपि पुरतो नाऽशकद्यस्य यक्ष-
स्ताक्ष्यस्तेजःश्रियाऽलं प्रबलपरबलाम्भोधिमन्थाचलेन्द्रः ।

---

१. षिद्गलीलां, इति पुस्तके पाठः।

शेषेसु व्योमचारिप्रभृतिषु गणना सर्पकल्पेषु को वा,
सोऽयं विद्याधराणां जयति दिनकरो धामभिश्चक्रवर्ती ॥५२॥
युग्मम्

सोऽचिन्तयन्निशम्यैतत् कोऽपि खेचरनायकः।
कीर्त्यतेऽत्र न मित्रं मे यत्तन्नामापि दुर्लभम् ॥५३॥

अपाठीत् पुनरन्योऽपि मागधोऽगाधधीधनः।
व्यश्नुवानः प्रतिध्वानैर्द्यामिवातिपटुध्वनिः ॥५४॥

सन्त्येवासह्यसह्यप्रहतरिपुभटश्रेणयः पार्थिवेन्द्राः,
भूयांसः किन्तु विद्याधरपतिविलसद्गर्वसर्वङ्कषोऽन्यः।
नैव त्यक्त्वा नृपेन्द्रं कुरुकुलतिलकं कोऽप्यभूद् भूतधात्र्यां,
ज्योतिर्लक्षेऽपि सूर्यादपर इह भवेत् कस्तमस्काण्डकालः ॥५५॥

मेधानिर्धूतवाचस्पतिमतिविभवत्वेन सौन्दर्यसार-
प्रत्यस्तानङ्गरङ्गद्रुचिररुचितनुत्वेन चाश्चर्यभूमिम्।
रामावन्मंक्षु विद्याः शतश इह मुदा नूनमन्योन्यसेर्ष्याः,
सहर्षाद् व्यञ्जितस्वस्वगुणगणभराः शिश्रियुर्यं मनोज्ञाः ॥५६॥

श्रीमान् विनिर्मलयशःकुमुदावलोभिः,
सम्भूषकः सकलदिग्वनिताकुचानाम्।
जीयादसौ निजकुलोदयभूधरेन्द्र-
प्रोद्यद्दिवाकर उदीर्णमहा महःश्रीः ॥५७॥
विशेषकम्।

महेन्द्रसिंहः श्रुत्वैतदपि चैव व्यचिन्तयत्।
नासौ विद्याधरोच्छेत्ता न च कान्ताशतप्रियः ॥५८॥

कुरुवंशोद्भवा भूपाः संभवन्तीह भूरिशः।
न ह्येक एव चन्द्रोऽभूद् रत्नं रत्नाकरेऽखिले ॥५९॥

तन्नमित्रमयं किन्तु तद्गोत्राह्वैव मोदिका।
रवेरभावे तद्भापि प्रातः स्याद् दृष्टिनन्दिनी ॥६०॥

अध्यवस्यत एवेत्थमस्यान्योऽप्यपठत् पुनः ।
नग्नाचार्यः सुराचार्यवचश्चातुर्यतर्जनः ॥६१॥

ये मूलात् स्कन्धबन्धं विदधति तरवस्ते जगत्यामसङ्ख्या ,
ये तन्नग्राः शिरस्तस्तमपि विरचयंन्त्याशु ते केचिदेव ।
स्वीयां साम्राज्यलक्ष्मीं कुलसमुपनतां भुञ्जतेऽस्यां प्रभूता ,
एकः श्रीअश्वसेनिर्निजभुजबलतः स्वीकृतास्वीयराज्यः ॥६२॥

रूपं सौन्दर्यसारं स्फुरितसहकृतं सौर्यमन्यासमानं ,
कन्यानां रूपभाजां निरुपमनृपतिस्त्वस्य चाप्त्या द्वयं च ।
यस्याभूद् भूरिभूतेः सफलमफलिताऽरातिचक्रे हि तस्य ,
श्रीमान् सोऽयं समस्तक्षितिपतिमुकुटं नन्दतात् खेचरेन्द्रः ॥६३॥

सनत्कुमारः सहदेव्युदारक्षेत्राङ्कुरः कल्पतरुः कवीनाम् ।
सम्पादनाच्चित्रसमृद्धिवृद्धेः, प्रवर्द्धतामुन्नतराजलक्ष्म्या ॥६४॥

आकर्ण्य कर्णपीयूषं वयस्यविषयं वचः ।
उच्चैरानन्दितस्वान्तः प्रासादं तं विवेश सः ॥६५॥

तत्रोच्चैरासनासीनमक्षतद्युतिसञ्चयम् ।
उदितं बिम्बमुष्णांशोरिवोदयशिलोच्चये ॥६६॥

मुक्ताकलापालङ्कारालङ्कृतं कण्ठकन्दले ।
सुनिर्झरद्वयोद्गारसारं मेरुमिवोन्नतम् ॥६७॥

कान्तया कान्तयोपेतं रत्येव रतिवल्लभम् ।
तत्कटाक्षच्छटाक्षीरस्नपिताननपङ्कजम् ॥६८॥

करपल्लवसंस्थाभ्यां युगस्य पणयोषितोः ।
चलच्चामरहंसाभ्यामवगाढप्रभाजलम् ॥६९ ।

नानाविद्याधरस्त्रीभिः पीयमानास्यदीधितिम् ।
वधूभिः सच्चकोराणामिव पीयूषदीधितिम् ॥७०॥

अन्तर्विद्याधरश्रेणिनिषण्णं सन्नशात्रवम् ।
सुराधीशमिवोदग्रं सुराणां संसदि क्षणम् ॥७१॥

पुरतः प्रकृतामन्दसङ्गीतकविधि नटैः ।
नानाभिनयनिर्माणभरतस्मृतिदायकैः ॥७२॥

दन्तद्युतिलसज्ज्योत्स्नाभिरामस्य निशाकरम् ।
लीलया दधतं गोष्ठी, सममासन्नकान्तया ॥७३॥

किं बहुना,

सा मूर्त्तिः सा सभा तस्य लीलास्तास्ताश्च सम्पदः ।
योगिनोऽपि भवच्चेतः मस्पृह यदवेक्षणे ॥७४॥

सनत्कुमारमद्राक्षीत् तमसौ प्रियदर्शनम् ।
चक्रवाकमिव प्रातश्चक्षुश्चक्राह्वयोषितः ॥७५॥

दशभिः कुलकम्

पीयूषसागरे मग्नः किमहं किमु निर्वृतः ।
सिक्तः कर्पूरसम्मिश्रश्रीखण्डस्य रसैरथ ॥७६॥

आभवोपात्तसुकृतफलानन्दैरुताश्रितः ।
इत्यात्मानमसौ सम्यग् न विवेद तदा मुदा ॥७७॥

युग्मम्

हर्षोत्कर्षोद्गताशेषवपुः पुलककञ्चुकः ।
जलधाराहतप्राञ्चत्कदम्बश्रियमुद्वहन् ॥७८॥

आनन्दाश्रुप्रवाहेण प्लाविताखिलविग्रहः ।
वनभ्रमणखेदोत्थं श्रमवारि क्षरन्निव ॥७९॥

मुखे विकास बिभ्राणः प्रातः पद्माकरो यथा ।
सर्वेन्द्रियेषु युगपद् भजन्निव परं सुखम् ॥८०॥

किं चित्रं यदसावङ्गे न ममौ मोदतस्तदा ।
क्षीराब्धिः किं क्वचिन्माति क्षपाकरसमुद्गमे ॥८१॥

चक्कलकम्

न मनागप्यमंस्तासौ तद्वनभ्रमणोद्भवम् ।
कष्टं गुर्वपि तद्दृष्टौ क्व वा तापो हिमोदये ॥८२॥

नूनमद्य निमित्तानि सत्यानि सकलान्यपि ।
तानि दैव्यः सरस्वत्यः प्रलयेऽपि हि नान्यथा ॥८३॥

स्निग्धे चिराय प्राप्ते स्युः केवलेऽपि मुदः पराः ।
किं पुनः प्राज्यलक्ष्मीके राकायामिव शीतगौ ॥८४॥

महेन्द्रसिंहस्तं पश्यन्नासीत् संस्तम्भितः क्षणम् ।
अनाख्येयरसात्कान्ताजनः कान्तमिवादृतः ॥८५॥

वाचोऽपि तत एवास्य पुस्फुरुर्न बहिस्तदा ।
सरित्सहस्रसम्पूर्णवारिधेरिव वीचयः ॥८६॥

नो राज्येन रतेन नापि न समं सर्वेष्टभोगेन च,
प्रादुष्यात् सुखमिद्धसौहृदजुषां शश्वद्द्वयस्येषु तत् ।
यद्यन्नातिशयाद्वहोश्च समयादन्विष्य विश्वं जगत्,
सम्प्राप्तेषु हि तेपु भाग्यनियतेः स्यादत्र लोकोत्तरम् ॥८७॥

इति युगप्रवरागमश्रीमज्जिनपतिसूरिशिष्यलेशविरचिते
श्रीसनत्कुमारचक्रिचरिते मित्रसमागमो
नामैकादशः सर्गः । छ. । ११ ।

द्वादशः सर्गः

सनत्कुमारस्तं सम्यक् प्रत्यभिज्ञाय सम्भ्रमात् ।
शीघ्रमेवाऽलपत् सन्तो यत्सदा पूर्वभाषिणः ॥१॥

मित्र ! मित्र ! कुतो यूयमिहैवं विजने वने ।
न कदाचिच्छिलापट्टे सम्भवोऽम्भोरुहस्य यत् ॥२॥

एह्येहीत्यवदद् भूयोऽप्यभ्युत्थानपुरस्सरम् ।
क्वापि वैनयिके कुल्या नालसा जातु कर्मणि ॥३॥

तं तथा सम्भ्रदाद् बाढमुरःपेषं पिपेष सः ।
यथास्य निर्ययौ खेदः सर्वः स्वेदच्छलाद् बहिः ॥४॥
तदा समागमेऽपूर्वः स हर्षः कोप्यभूत् तयोः ।
सुरसाम्राज्यभोगोऽपि यत्तुलां नाधिरोहति ॥५॥
स प्रासाधयदेतेन स्वासनस्यार्द्धमञ्जसा ।
व्यज्येत हि परः स्नेहो लोकेपि कथमन्यथा ॥६॥
तत्प्रेमाचरितं पश्यन् कौतुकोत्तानलोचनः ।
विद्याधरजनः सर्वोऽप्यासीत्तत्र महादरः ॥७॥
महिमानं नयन्त्येव प्रभूणां सम्भ्रमा नरम् ।
वैदेशिकोपि यदय मान्योऽभूत् सर्वपर्षदः ॥८॥
महेन्द्रसिहः प्रत्यूचे तमथ श्रव्यभाषिणम् ।
अभ्राम्यं वत्सरं यावत् त्वत्कृते महतीं महीम् ॥९॥
प्रवृत्तिमपि नावापं तावकीं क्वापि नन्दनीम् ।
घनाघनघटाच्छन्नामिव वर्षासु चन्द्रिकाम् ॥१०॥
श्रेयो निमित्तवृन्देन सूचितं त्वधुनाऽऽप्नवम् ।
त्वां निधानमहाकुम्भमिव दुर्गतसेवकः ॥११॥
विद्याधरमहाराजस्तमूचे पुनरुत्सुकः ।
चक्रतुः पितरौ किं किं मद्वियोगदवार्दितौ ॥१२॥
अधत्तां वा कथङ्कारं स्वप्राणान्प्रोषिते मयि ।
क्षणमप्यासते यन्न तिमयः सलिलं विना ॥१३॥
स प्राह रामवत् प्राप्ते वन तज्जनकाकृतिम् ।
त्वयि तत्पितरौ पूर्णामधत्तां शोककीलितौ ॥१४॥

किञ्च—

स्तम्भापचितसच्छायं हितपत्रलताद्युति ।
आसीच्छून्यपुराकारं अन्तःपुरमपि प्रियम् ॥१५॥
आस्यानि त्वद्वयस्यानां ग्रीष्मप्लुष्टदलश्रियाम् ।
अम्भोजानां रुचिं प्रापुः स्नेहार्द्राण्यपि सन्ततम् ॥१६॥

स कोऽपि नागरो नाऽऽसीद् यस्त्वयि प्रोषितेऽभवत् ।
पद्मबन्धाविव स्फारविकासः कमलाकरः ॥१७॥

कृत्वा प्रसादं रम्याऽथ स्वप्रवृत्ति प्रकाश्यताम् ।
अप्रकाशा हि न मुदे रूपवत्यपि नर्त्तकी ॥१८॥

कौतुकं तन्महद् यत्त्वं कथं केन क्व वाऽऽदृतः ।
कुतस्त्याः सम्पदो वैता लोकलोचनचन्द्रिकाः ॥१९॥

आशा न स्यात् कथं नाथ ! दुर्लभेऽपीह वस्तुनि ।
यदसम्भावितास्तित्वोऽप्यागास्त्वं विषयं दृशोः ॥२०॥

एव पर्यनुयुञ्जाने मित्रे सोऽचिन्तयन्नृपः ।
अत्रोत्तराप्रदाने स्यादज्ञता तावदात्मनः ॥२१॥

अन्यथाऽऽख्यानतः पापं यथास्थितनिवेदने ।
स्वगुणाविष्क्रिया वेद न च वृत्तं ममापरः ॥२२॥

विक्षेपकरणं मौग्ध्यं शाठ्यं व्याजान्नरोक्तितः ।
तत्कथं क्रियतामस्य कोविदस्येह निर्वृतिः ॥२३॥

त्रिभिर्विशेषकम्

किञ्चाऽऽत्मनः प्रशंसायां शिष्टाचारव्यतिक्रमः ।
नावदानं स्वमेते हि व्यञ्जयन्ति कथञ्चन ॥२४॥

इत्थं विकल्पकल्लोलाकुलमानसवारिधेः ।
प्रादुर्बभूव तस्यैवं प्रातिभज्ञानचन्द्रमाः ॥२५॥

एषा बकुलमत्येव श्रीप्रज्ञप्त्याः प्रसादतः ।
बुद्धास्माकीनवृत्तान्ता प्रियास्त्वस्य निवेदिका ॥२६॥

तामथाऽऽज्ञापयद् भूपो यथाबाधं निवेद्यताम् ।
वयस्याय समस्तोऽपि वृत्तान्तो मे तनूदरि ! ॥२७॥

मीलयेते पद्मवन्नेत्रे ज्योत्स्नयेव प्रमीलया ।
मामके मदिराक्षीति रतिवेश्म विशाम्यहम् ॥२८॥

तत्र चोभयतः प्रांशौ गङ्गापुलिनसुन्दरे ।
सहंसपक्ष्मतूलीके सितोत्तरपटास्तृते ॥२९॥
क्षीराम्भोधाविव स्वच्छे शयनीयेऽच्युते यथा ।
संविष्टे खेचराधीशे साऽवदत् कलभाषिणी ॥३०॥

युग्मम्

आर्य ! त्वन्मित्रवृत्तान्तः सिद्धान्त इव कापिलः ।
सत्त्वप्रकृतिबुद्ध्यादिलीलायितमनोहरः ॥३१॥
कस्य न श्रूयमाणोऽपि भवेदानन्दकन्दलः ।
वसन्ते पञ्चमोद्गारहारीव पिकनिस्वनः ॥३२॥

युग्मम्

कुमारो हि तदा दूरमपावाह्यत पत्तनात् ।
जवनेन तुरङ्गेण प्रमोद इव नागरः ॥३३॥
जन्मान्तरीय दुष्कर्मलवेनेव महाटवीम् ।
भवाटवीमिवाऽनायि तेनायं वीर्यशालिना ॥३४॥
यद्वा सुकृतपिण्डेन शुद्धेनेव श्रियं पराम् ।
क्षिप्रं प्रापयितुं शेषचक्रिभ्योऽभ्यधिकामिमाम् ॥३५॥

युग्मम्

पवनेनेव तेनैवादृश्यतामप्यनीयत ।
अकाण्डे सुप्रचण्डेन तूलवत् त्वरितं दृशोः ॥३६॥
स मनोजयिना धावन् रंहसाऽश्रान्तमश्रमः ।
अहोरात्रमहर्मात्रयायिन रविमत्यगात् ॥३७॥
जितादित्यहरिर्वेगान्नूनं प्राप्तुं हरीन्द्रताम ।
वनस्थानप्यसौ जेतुं हरीन् बभ्राम तद्वनम् ॥३८॥
द्वितीयेऽपि दिने तस्य तथैव द्रुतगामिनः ।
मध्याह्नः समभूद् दाववह्नितापाभिभावुकः ॥३९॥
यत्र भानुः प्रभाव्याजाद् वर्षत्यङ्गारसंहतिम् ।
आजन्मद्वेषवन्तीव कैरवाणि विहिंसितुम् ॥४०॥

छायाभ्यश्चातपत्रस्त मृगेन्द्रान् क्षुधितानपि ।
यत्र दृष्टैणयूथा अप्युत्सहन्ते न धावितुम् ॥४१॥

यत्र पानकरङ्केषु तीव्रतृष्णाः खगाघनाः ।
पिबन्तोऽपि न तृप्यन्ति तद्वार्यन्योन्यघट्टनैः ॥४२॥

जैनवेश्मसु नैवेद्यं निवेद्यार्च्यस्य धार्मिकाः ।
यत्रान्तर्बहिरुत्तापान् मुच्यन्ते प्रस्तुतार्चनाः ॥४३॥

राज्ञां भोजनशालासु दृष्टसामोदभोजनाः ।
कथञ्चिद् विषगन्धान्धाश्चकोरा रोदनस्पृशः ॥४४॥

मयूराश्च प्रनृत्यन्तो बोधयन्तीह देहिनः ।
विरागरागयोर्हेतुरेक एवेति यत्र च ॥४५॥

युग्मम्

यत्र श्रोत्रियगेहेषु होमधूमचितेष्वपि ।
निर्मला एव दृश्यन्ते तत्प्रियाणां मुखेन्दवः ॥४६॥

चञ्चूत्क्षिप्तस्वपक्ष्माणः प्रियाचुम्बनलालसाः ।
यत्र छायासु विकृतीर्भजन्ते चटका अपि ॥४७॥

गजेन्द्रा अपि न स्नानैर्न प्रियापरिरम्भणैः ।
लभन्ते स्वस्थतां यत्र पच्यमाना इवोष्मणा ॥४८॥

कथञ्चिन्मत्तमहिषा व्यावृत्ताः सलिलाशयात् ।
भ्रमयित्वा दृशो यत्र लुठन्ति भुवि घर्मतः ॥४९॥

एकतः कर्दमे मग्नाः स्पृष्टास्तापेन चान्यतः ।
अन्वभूवन् समं यत्र पोत्रिणो हिमपावकौ ॥५०॥

अदृष्टपद्मान्तरित प्रियः स्निग्धोऽप्ययुज्यत ।
दृष्टयाऽपि तया को को न भीरुर्यत्र चाऽऽतपात् ॥५१॥

निवृत्तजनसञ्चारा राजमार्गा निशीथवत् ।
यत्राऽभूवन् महाघर्मकुकूलायित[1]-रेणवः ॥५२॥

---

१. कारिषाग्निः ।

दारुणे तत्र मध्याह्ने गच्छन् मार्गणवद्द्रुतम् ।
तथा शश्राम तुरगो न चचाल पदं यथा ॥५३॥
तस्थौ च स तथावस्थः स्थाणुवन्निश्चलाकृतिः ।
वाजिनो हि क्व वा लोके दृष्टाः सततगत्वराः ॥५४॥
अपेक्षाकारिणो नूनं नैवारब्धसमापकाः ।
यदेष नाऽपयद् देशं कुमारं हृदयेप्सितम् ॥५५॥
विघटन्ते हि तरलाः सुचिरं लालिता अपि ।
पातयामास यदयं कुमारं दारुणाटवीम् ॥५६॥
निश्चलस्य च तस्याऽऽसीदुच्छ्वासोऽप्यतिनिश्चलः ।
स्वामिनं ह्यनुकुर्वन्ति विनीताः सहचारिणः ॥५७॥
कुमारोऽवततारास्मात् तूर्णं पिपतिषोर्भुवम् ।
अतिश्रान्तोऽपि दक्षत्वाच्छवस्पर्शभयादिव ॥५८॥
स्वप्रभोरपकर्त्तायमितीव मुमुचे क्षणात् ।
प्राणैः स्वाम्यपि वाहोऽसावनार्यं को नु रुध्यते ॥५९॥
नूनं जलधिकल्लोलः स्वाभिधानस्य सत्यताम् ।
प्रकाशयितुमाश्वेव जगाम विलं तदा ॥६०॥
कुमारः सुकुमारत्वान्मध्याह्ने मार्गखेदितः ।
तृष्णया शिश्रिये तत्र पिशाच्येवातिघोरया ॥६१॥
चचाल जलमन्वेष्टुं राज्यार्होऽप्यसहायकः ।
कस्य वा स्यात् स्थिरा लक्ष्मीः कल्लोलसहवासिनी ॥६२॥
विधीयतामहङ्कारः श्रीमद्भिः श्रीभवः कथम् ।
सकण्टकाटवीं पद्भ्यामटन्तं प्रसमीक्ष्य तम् ॥६३॥
तद्दशां वनदेवीनामप्याक्रन्दविधिप्रदाम् ।
नूनमद्रष्टुमभवन् द्रुमास्तत्र ह्यदृष्टयः ॥६४॥
क्व फेरवारवाः कर्णातिथयः क्व च गीतयः ।
तस्यासन् सर्वदा कस्य सुखैकनियता दशा ॥६५॥

अत्यटन्नपि तवासौ नाऽऽससाद क्वचिज्जलम् ।
तन्निष्ठदृष्टिचित्तोऽपि निदाघ इव चातकः ॥६६॥

दूरे त्वपश्यत् सामोदं पुष्पैः सप्तच्छदं तरुम् ।
स्कन्धे द्विपकटाघर्षमदगन्धाभिभावुकैः ॥६७॥

अतिविस्तृतनीलत्वान्निरभ्रव्योमविभ्रमम् ।
महापुरुषवन्नानाफलार्थिप्राणिसंसृतम् ॥६८

सच्छायत्वात्तुषारांशुवदुत्तप्ताङ्गिनन्दनम् ।
श्रिया भृङ्गैश्च सन्नद्धं कमलाकरवत् सदा ॥६९॥

त्रिभिर्विशेषकम्

प्रतस्थे तं प्रति प्राज्ञः प्रतप्तस्तपनांशुभिः ।
लब्ध्वा गदो विषीदेत् कः सकर्णो व्याधिपीडितः ॥७०॥

यावत् सप्तच्छदच्छायां प्राप स श्रान्तविग्रहः ।
तावन्मूर्छा मुमूर्च्छाङ्गे तदीये विषवल्लिवत् ॥७१॥

भ्रमयन्ती दृशोर्द्वन्द्वं स्वेदयन्ती वपुर्लताम् ।
दर्शयन्ती तमस्काण्डं विष्वद्र्यञ्चं मुहुर्मुहुः ॥७२॥

[1]मुखलालामिवाकाले दलयन्ती च चेतनाम् ।
कान्तोपगूहनमुदं ददती खेदभेदनात् ॥७३॥

विशेषकम्

तडितेव प्रबलया तयाऽपात्यत सोऽवनौ ।
अशाय्यत क्षणं भ्रातुमङ्कदेव्येव दुःखतः ॥७४॥

अत्रान्तरे तत् सुकृतैरिवाशु,
प्रणोदितः कोऽपि कुतोऽपि यक्षः ।
तं देशमागान्मणिभूषणांशु-
च्छटाभिरेनं स्नपयन्निवोच्चैः ॥७५॥

---

१. अमृतकलालक्षणां ।

प्रालेयशैत्यं परितर्जयद्भिः,
पीयूषमाधुर्यमपि क्षिपद्भिः।
हसद्भिरुद्भास्वरशारदेन्दु-
ज्योत्स्नाशुचित्वं पयसः कणौघैः ॥७६॥

अन्तःप्रवृद्धप्रणयाम्बुराशि-
समुच्छलद्बिन्दुगणैरिवैषः।
असिक्तसंखिन्नमखिन्नबाहु-
स्तं सन्ततं सम्भृतकिङ्करश्रीः ॥७७॥

युग्मम्

प्रावीजयच्चांशुकपल्लवेन ,
विपल्लवाविष्टममुं प्रयत्नात्।
असाध्यमत्रास्ति न किञ्चिदुद्यत्-
पुण्याधिराजस्य समुद्गतस्य ॥७८॥

इत्थं यक्षेण क्लृप्तप्रलयविलयकृत् योग्ययोग्याभ्युपायः,
प्रोन्मीलन्नेत्रपत्रः सपदि समभवद् राजबीजी वितन्द्रः।
शीतांशोरंशुजालैः कवचितमुकुलः कैरवाणां किमोघः,
स्यादुन्निद्रच्छदो नो कलितनिरुपमश्रीसमृद्धिर्निशायाम् ॥७९॥

इति युगप्रवरागमश्रीमज्जिनपतिसूरिशिष्यलेशविरचिते
श्रीसनत्कुमारचक्रिचरिते यक्षदर्शनो नाम
द्वादशः सर्गः । छ. ।१२।

त्रयोदशः सर्गः

वदनमस्य विनिद्रविलोचनं, समवलोक्य ननन्द स गुह्यकः ।
निरुपधिप्रणयामृतसिन्धवो, जगति नाम भवन्ति हि सज्जनाः ॥१॥

शरा

१. भयंचिकीर्षुः ।

दृढप्रहारामपि तामवमत्य तदैव सः ।
प्राहरन्न प्रतीकारे सविलम्बा महौजसः ॥६८॥

सद्यो विशसनान् माभूद् युधो विघ्न इतीव सः ।
श्मश्रूण्येव क्षुरप्रेण तस्याऽलावीत् कुतूहली ॥६९॥

द्वितीयेनाऽपि तेनाऽसौ छिन्नतच्छीर्षकोऽच्छिनत् ।
निःशेषाङ्गच्छिदा मूलमिव पूर्वं शिरोरुहान् ॥७०॥

तं तथा विकृतं दिव्यस्त्रीणां नवकुतूहलम् ।
विदूषकमिवोत्प्रास्यं[1] पश्यन्तीनां मुहुर्मुहुः ॥७१॥

तत्राऽट्टहासकुसुमप्रकरेण समं दिवि ।
उत्तालकरतालौघदुन्दुभिध्वनिरुद्ययौ ॥७२॥

युग्मम्

नीतिस्थितिप्रीतिभृतं पातयन्तं द्विषां बलम् ।
लम्पटेशान् शातयन्तं तं पापे यशसाऽमलम् ॥७३॥

क्षुरिका

अनर्हयुं विवेकित्वात् कुमारं तुष्टुवुर्जनाः ।
अवदान्येऽप्यनौद्धत्यं विद्वत्तायाः परं फलम् ॥७४॥

युग्मम्

लूनकेशोऽपि मानित्वान्न व्यरंसीत् स युद्धतः ।
दन्तव्यसनवान्[2] दन्तीवाऽतिरोषाद् विभीषण ॥७५॥

स्वशिल्पानीव विशिखान् यान् यान् भूपो व्यपीपरत् ।
तांस्तान् स ताडयामास सम्मुखं दुर्जनानिव ॥७६॥

अनात्मज्ञे निस्त्रपे चाऽनादधत्याऽऽरतिं युधः ।
तज्जीविताशामिव स ज्यां विचिच्छेद धन्वनः ॥७७॥

स शितासिकरो वल्गन् अर्द्धचन्द्रेण सत्वरम् ।
विहस्तहस्तिराजस्य निन्ये तेन[3] विहस्तताम् ॥७८॥

---

१. उपहास्यम् । २. हस्ती । ३. कुमारेण ।

दोलायिताऽप्याभिमुख्यं जयलक्ष्मीरनायि च ।
प्रहारपटुताभाजा विदग्धेनेव कामिनी ॥७९॥

नृमात्रप्रेक्षितस्यास्य विक्रमं प्रेक्ष्य तादृशम् ।
किञ्चिदात्मानमज्ञासीत् स रामस्येव रावणः ॥८०॥

गते विलक्षत्वमिति क्षमापतौ, वलत्यनैकध्यमवध्यदेहिषु ।
पदं[1] महास्त्रं हि बबन्ध सद्युति, क्षणाद्भुजङ्गाकलनं रुषाचिते ॥८१॥

निःश्रेणिका

तन्माहात्म्यान् महीयांसः कालपाशा इवोरगाः ।
विषज्वालाविलासित्वोदुद्वमन्त इव क्रुधम् ॥८२॥

चक्षुःशिरोरत्नभाभिः सूत्रयन्तः सुरायुधम् ।
भटानां रुद्धसच्चेष्टाःपेतुः कण्ठकरांह्रिणि ॥८३॥

युग्मम्

ततस्स तत्राऽतनुधीः कुमारः, कलङ्कपङ्कच्छिदुरः खगेन्द्रान् ।
ससर्ज सन्त्रासदनादकन्दप्रदम्मुदश्शदभिदत्तदक्षः ॥८४॥

चामरम्

तार्क्ष्यपक्षप्रभाश्लिष्टं व्योममण्डलमाददे ।
कौतुकात्काञ्चनाऽऽलिप्तमहाकौक्षेयकश्रियम् ॥८५॥

बभुस्ते भोगिभोगेषु चञ्चुव्यापारतत्पराः ।
कोकाः श्यामाब्जनालाशलालसा इव रंहसा ॥८६॥

स्वभावादेव मलिनाः कुटिला द्रोहकारिणः ।
तेन तैर्वन्ध्यतां नीताः शत्रोर्मन्त्रा इवाहयः ॥८७॥

आग्नेयमन्त्रं नृपतिराजुहावाग्निदीपनम् ।
आविष्कर्तुमिवान्तःस्थं प्रज्वलत् कोपवाडवम् ॥८८॥

---

१. स्थितिम् ।

स्फूर्जद्धूमकचः शिखामयभुजः प्राण्यौघदत्तातुल-
त्रासो घोररवाट्टहासविकटो वेतालकल्पः शिखी ।
संवृद्धो दवतोऽधिको रणभुवि प्राणापहारो जग-
ज्जन्तूनामपि तूर्णमुद्धुरजवात् क्षुन्दन् हसन् साहसम् ।।८९।।

कलशः

तेनाऽथ पावकेनाऽपि क्षुद्रोपद्रवकारिता ।
आरेभे वाडवेनेव कुमारबलवारिधौ ।।९०।।

सर्वतश्च तदाश्लिष्टमूर्त्तयः प्रांशवो भटाः ।
आगता भारत द्रष्टुं मेरोः पादा इवाऽऽबभुः ।।९१।।

सस्मार वारुणं मन्त्रं राजबीजी जयावहम् ।
येन सद्यो गजश्यामैर्व्यानशे व्योमवारिदैः ।।९२।।

जयाऽऽशाचापलं शत्रोराददे तत्र विद्युता ।
गर्जितेन तु कौमारदुन्दुभिध्वानधीरता ।।९३।।

ववृषुस्तोयदास्तोयं सन्ततं कुन्तधारया ।
शमिताग्निपरौद्धत्यं वीरा इव शरोत्करम् ।।९४।।

समूलघातं निहते रिपुदर्प इवानले ।
खे विचेरुः समं सिद्धप्रमोदैः [1]स्तुतिसंकथा ।।९५।।

श्रीसद्माऽपि कुशेशयं ननु जडा सङ्गिस्फुरत्कुङ्कुम
च्छायोऽप्यभ्युदयन् सुमास्समुपचेयाऽङ्कः[2] शिवो मारहा ।
इत्थं कोऽपि न यस्य साम्यमभजद् वासस्य विश्वश्रियां,
सोऽयं माननिधिः प्रतापतरणिः केनाऽवनौ जीयते ।।९६।।

श्रीसनत्कुमारस्येति नामाङ्कं छत्रम्

जजाप मन्त्रं वायव्यं व्याहतोऽपि स भूपतिः ।
उल्लासः कन्दुकस्येव यो घाते साहिमानिता ।।९७।।

१. प्रशसा । २. उपचीयमानकलङ्कः ।

असहायमनायासात्तमसौ हरि ··· ··· ··· पः ।
राहवीयां दशां निन्ये शितास्त्रेण सुरैस्ततः ॥१६॥

क-चवर्गद्वयपरिहारेण चत्वारः ।

अन्यानपि निरासेऽसौ गुरुमन्युभृतः परान् ।
भूरिवर्ण्यसपक्षत्वान् मरुत्वानिव भूभृतः ॥१७॥

गूढचतुर्थकः

रुषोत्तस्थौ महावेगो विद्युद्वेगसहोदरः ।
पयोद इव [1]धौताऽस्त्रविद्युद्वेग[2]-सहोऽदरः ॥१८॥

आस्फालितधनुर्नादस्तस्य व्याप नभस्तलम् ।
सुरत्वस्वामि सैन्यानां साधुवादशतैः समम् ॥१९॥

शरसन्धानपातादि तस्याऽवेदि विदापि नो ।
सत्वरत्वात् सिताऽश्वस्य[3] विभ्रमं दधतो युधि ॥२०॥

आदधेऽथ यश शेषा भूरिसेनाः स शात्रवीः ।
सुसंहता अपि तत्तीरन्तरुरिव तामसीः ॥२१॥

महत्यथेतरत्राऽस्य ध्वंसेनाऽभूद् भिदा युधि ।
यवसे[4] शिशपायां वा दाहे दावततेरिव ॥२२॥

क-च-टवर्गत्रयपरिहारेण चत्वारः

अद्भुते राजहंसेऽस्मिन् परपक्षविधूननैः ।
क्रीडत्येवाऽपतच्चण्डवेगोऽकाण्डक्षयाम्बुदः ॥२३॥

अगर्जन्नपि गम्भीरः शरवर्षैरनारतम् ।
वर्षन्नुत्त्रासयामास राजहंसकुलान्यसौ ॥२४॥

प्रावाहयन् नदीमस्रैः क्षतवीरशरीरजैः ।
क्षुरप्रलूनकेशालि [5]विलुलच्छैवलाऽऽकुलाम् ॥२५॥

१. सित । २. पान । ३. अर्जुनस्य । ४. तृणविशेष । ५. प्रसरत् ।

न तेषु सदयो धीरो ये दुर्वृत्ता[१] महाऽरयः ।
नतेषु सदयोऽधीरो[२] धनदो दुष्कृताऽऽगमे ॥२६॥

खड्गाऽशनि सखाट्कारं तथा मूर्धन्यपातयत् ।
असावस्य यथाऽन्येऽपि पशुनाशमिहाऽनशन् ॥२७॥

अथ तत्र नृपेऽनेकं पपात कुसुमं दिवः ।
ससार तत एवालं सुगन्धितसितं यशः ॥२८॥

अरीणां सकला सेना विनिमीलितलोचना ।
तारकापेतनिशया समं[३] रेजे महातमाः[४] ॥२९॥

असंयोगः

तद्वधेऽशनिवेगोऽपि दुःखी श्यालवधादभूत् ।
सहस्रगुणमन्यैव स्वाङ्गभङ्गे हि वेदना ॥३०॥

मृगाधिप इवात्यन्तं मूलोत्खातनखाशनिः ।
निरस्तदन्तो दन्तीव फणीवोद्धृतसद्धनुः ॥३१॥
विलुप्तपक्षः पक्षीव शुशोच खचराधिपः ।
सन्तानसदनस्तम्भतनूजोन्माथसव्यथः ॥३२॥

युग्मम्

त्रिलोकीपुञ्जितक्रोधधारयेव स शिश्रिये ।
समं[५] समस्ततल्लक्ष्मलक्षिताखिलविग्रहः ॥३३॥

महामर्षभरः सोऽपि विवेश समरं स्वयम् ।
भीमं यमस्य वेश्मेव मुमूर्षुरिव साहसी ॥३४॥

सुरैरशंसि यः सारमहो[६]राशिविभावसुः[७] ।
पविः परेषु शैलेषु श्रीवासाय सरोरुहम् ॥३५॥

शिश्रिये यो हिमाभीशुसौम्यास्यसरसीरुहैः ।
परेषु परुषैः शूरैः पीवरांसैः सहस्रशः ॥३६॥

१. दुराचाराः । २. भयालुः । ३. तुल्यं । ४. शोक । ५. युगपत् । ६. तेज । ७. रविः ।

सभायामसुरेशोऽपि यशः समरसम्भवम् ।
यस्योरुरोषभीमस्य विववार शशिप्रभम् ॥३७॥

क-च-ट-तवर्गचतुष्कपरिहारेण चत्वारः ।

निःशेषनिजसैन्यौघैः प्रलयक्षुभिताम्बुधिम् ।
लघयन् घोरनिर्घोषैरारेभे योद्धुमुद्धुरः ॥३८॥

आद्येऽपि तदिषुक्षेपे क्षयवृष्टिरयाधरे ।
चण्डवेगः प्रचण्डोऽपि कान्दिशीकत्वमाददे ॥३९॥

सकलं[1] युध्यमानोऽसौ सकलं द्विषतां बलम् ।
सकलङ्कं ह्रिया चक्रे सकलं रोगिणं[2] यथा ॥४०॥

शरावलिरसह्याऽस्यासुरेश्वरसहः[3] श्रियः ।
अरिवारैरशेषैलाशस्यवश्ययशोलवैः ॥४१॥

आहवेऽवसरः सारः[4] साहसेहा वराऽऽशिषाम् ।
वीरराशेरिहाऽस्याऽसल्लीलावारसरो रवेः ॥४२॥

वारिवाह इवावश्यविसारि शरवर्षसूः ।
सहस्रशो वीरशिरःस्राव्यस्रोरुसरिल्लयः ॥४३॥

रसालः[5] शौर्यवर्याऽलेः संश्लेषो यशसः श्रियाम् ।
आसील्लीलाहवः शस्यः सुरास्यसरसीरुहाम् ॥४४॥ युग्मम्

पञ्चवर्गपरिहारेण चत्वारः ।

तमभि श्रीभानुवेगाऽमिततेजोमुखा नृपाः ।
शौर्योष्ममुषिताकाग्निप्रतापास्तूर्णमैयरुः ॥४५॥

स्वनाम्नः सदृशं चक्रेऽमिततेजाः प्रतापयन् ।
बाणैः परानन्तरपि क्रोधाग्न्युद्दीपितैरिव ॥४६॥

निपातितसुदुस्साधो गुणवृद्धिप्रथश्च सः ।
साधितानेकसच्छब्दो रणोऽव्याकरणायत ॥४७॥

---

१. धनुर्वेदाद्यभ्यासान्वितं यथा भवति । २. सह कलेनाजीर्णेन वर्तते । ३-४. बल । ५. आम्रः ।

सुनिर्दयं विमृद्नन्तः प्रतिपक्षं परस्परम् ।
मत्तेभा इव भूपालाः क्षणार्धं न व्यरंसिषुः ॥४८॥

स्वयम्वरायामिव चान्दोलितायां जयश्रियि ।
समुत्तस्थौ रणोत्सङ्गे कुमारो हरिविक्रमः ॥४९॥

सुदृष्टिः शस्यरत्नोऽपि सुपक्ष्मा कान्तसत्प्रभः ।
ददृशे शशिरम्योऽपि स परैः कालसन्निभः ॥५०॥

गोमूत्रिका

आददे नम्रता साधुवरबाहुप्रसाधनम् ।
स धनुः सद्गुणोपेतं कान्तागात्रमनोहरम् ॥५१॥

प्रतालव्यः

संरोप्यमाणगुणमप्याऽऽचक्रन्दाऽथ तत्तदा ।
दासदुरुछात्रवत्कुण्ठ[1]-वभावभावितसाहसम् ॥५२॥

संयोगञ्चापबाणेन शुद्धिभाजा समञ्जसम्[2] ।
संतोषिताऽनेकदिव्यवधूसिद्धवनेचरम् ॥५३॥

युग्मेन खड्गः

दृष्टेऽपि तामसात् तस्मिन् [3]नानाहेतिमनोहरे ।
सूर्योदय इवोलूकाः सद्यश्चुक्षुभिरे परे ॥५४॥

तादृग् धनुर्धरो धीमानोजसा द्विषतां बलम् ।
लंघयन्मोदिसुजनो मानी शक्रं जिगाय सः ॥५५॥

मुशलम्

सुवंशजत्वान्नतिमद्बलादाकृष्टमप्यहो ।
भङ्गाभिमुखतां भेजे न धनुस्तस्य सर्वथा ॥५६॥

रेजे कुण्डलितं घोरटङ्काराट्टहसं मुखम् ।
खं व्याप्यैतद्यमस्येव लम्पटं द्विषतां व्रजे ॥५७॥

धनुः

---

१. वक्रीभावेन कौटिल्येन च । २. समीचीनम् । ३. शस्त्रकरावच ।

प्रलयानिलविद्वेषी समूलोन्मूलितांह्रिपः ।
ववौ वायुः प्रतिदिश रंहसा प्रौढसूत्कृतः ॥९८॥

महावेतालदुर्दर्शो रजःपुञ्जावरूषितः ।
सर्वतस्त्रासयामास सत्वान् सात्विकानपि ॥९९॥

न याचदतिचक्राम प्रतिसैन्यं स भीषणः ।
सद्यस्तावत् कुमारोऽपि शैलेन्द्रं तत्र निर्ममे ॥१००॥

निजानीकपरिक्षेपी[1] द्वितीयो मानुषोत्तरः ।
वातवेताललीलानां दूरे यो मन्त्रसिद्धवत्[2] ॥१०१॥

सर्वास्त्रपरमं राज्ञस्तद्वज्रमिव वज्रिणः ।
घ्नताशोऽपि हतप्रायश्चक्रे शिशुकचक्रिणा ॥१०२॥

शिल्पमस्त्र बलं मन्त्रं यद्यदाविश्चकार सः ।
समूलकाषं न्यकषत् तत्तदेष महाबलः ॥१०३॥

विश्वा[1]सह्यरण[8]क्रियं बलनिधिं [11]तत्तारसोमा[5]स्पदं ,
युद्धेन[2] क्षणितुं [6]चकार लसनं [12]मिथ्यापि शू[4]रत्ववतः ।
वल्गत्[3 4]कुण्टभुजो [10]रिपूत्पलमहा[13]दतो मृधे [7]चत्वरे -
ऽरेक[3] भाविनि भूयुजः स्ववपुषोऽदंष्ट्रावतः स्त्रस्तरे(?)॥१०४॥

सनत्कुमारचक्रिचरितमिदमितिवाक्यग र्भचक्रम्

[4]नियुद्धाधानबुद्धयाऽसौ विसारितभुजद्वयः ।
रंहसाऽधावदुर्वीशस्तं प्रतीभ इवाऽकरः ॥१०५॥

आक्रोशन्नुच्चकैश्चैष महाबीभत्सदर्शनः ।
राजाऽपि न रराजेव सर्वः शस्योऽनुरूपकृत् ॥१०६॥

मनोऽङ्गगीरशुद्धेन स्पर्शो माभून्ममासुना ।
इतीवाऽऽराल्लुलावास्य शिरश्चक्रेण चक्रभृत् ॥१०७॥

---

१. परिवेष्टकः । २. सिद्धे इव । ३. निःसंशयम् । ४. बाहुयुद्धः ।

[1]तत् सैनिकाश्रुभिः सार्द्धं तत्पपात भुवस्तले ।
समं सुरप्रशंसाभिर्व्याप खं चक्रिणो यशः ॥१०८॥
सन्ततेर्वीरदेहानामनाथाहमिति क्लमः ।
माऽभूदितीव तद्देह[सू]तन्मुदे न्यपतद् भुवि ॥१०९॥

सर्वत्राऽसति पुष्पमम्बरभवं प्रामाणिकैः प्रोच्यते ,
दृष्टान्तस्तदमन्यताकृत[2] इव प्रौढेन्दुबिम्बद्युतिः ।
व्योमन्यद्भुतयुद्धदर्शनभवन्मोदातिरेकात् स्फुटः ,
पुष्पाणां प्रकरः स्मितेन रचितः स्वःसुन्दरीभिस्तदा ॥११०॥

बंहीयस्त्वादमान्तो ध्रुवमिह भुवने साधुवादास्तदीया ,
अत्याश्चर्याहवोत्थाः सुविरचितमहासान्द्रताः खे प्रसस्रुः ।
आनन्दात् तारतारं बहलकलकलं ताडितानां सुरौघै-
र्विश्वस्य श्रावणार्थं मधुरिमगुरवो दुन्दुभीनां निनादाः ॥१११॥

तस्याऽऽजिक्षतविग्रहस्य नरपस्यान्तर्मुदालम्बिनी ,[3]
[4]पद्मानन्दपरप्रसन्ननयना भूमित्रमाऽऽगत्य तम् ।
वव्रे पात्रमचिन्त्यकीर्त्तनगिरां[5] [1]कोदण्डपाणिन्नवं[7] ,
वंशद्योतरविं पवित्रवचनं नीत्याश्रितं स्वाऽऽहवम् ॥११२॥

'जिनपालगणिविरचितमिदम्' इति कविनामगर्भं चक्रम्

इति युगप्रवरागमश्रीमज्जिनपतिसूरिशिष्यलेशविरचिते
श्रीसनत्कुमारचक्रिचरिते रिपुविजयो नाम
एकविंशतितमः सर्गः ।छ।।२१।।

---

१. शिरः । २. वैतस्यापादनाय । ३. चेतसि हर्षाश्रयिणि । ४. सेनादिरूपाराज्यलक्ष्मीः
५. प्रशंसावचसाम् । ६. धन्विनम् । ७. तरुणम् ।

द्वाविंशतितमः सर्गः

अस्तखेचरपतिः स्ववीर्यतः, प्राप कृत्स्नखचरेन्द्रतामसौ ।
केसरीव मृगराजतां किमु, प्रौढविक्रमभृतो हि दुर्लभम् ॥१॥

स प्रतापनिधिराशु शात्रवं, तन्निरस्य तिमिरौघविभ्रमम् ।
खेचराऽचलमभिप्रचक्रमे, गन्तुमात्तरिपुकीर्त्तिवैभवः ॥२॥

सान्द्रचन्द्रविमलस्वकान्तिभि-र्भारतस्य भरितस्य योऽभितः ।
क्षीरनीरनिधितां निशाकरद्योतनैर्दिशति रूप्यनिर्मितः ॥३॥

नित्यमन्तरुपसर्पदापगाम्भोभृतोदरतयाऽप्यतृप्तिमान् ।
वारुणीहरिदिशोर्मुखद्वयेनोदधिं च धयतीव यो भृशम् ॥४॥

'सिद्धकूटमुखकूट[1]-कोटिभि[2]-स्तारकौघमिव योऽदधत् बभौ ।
सर्पराज इव भूतलं पतद्, भूरिभिः फणभुजैः समुच्छ्रितैः ॥५॥

दुःप्रभोर्महत उद्वति स्पृशोऽन्तःप्रविश्य कठिनान्तरात्मना ।
द्वंधमिद्धमसतेव संदधे, भारतस्य भुवि येन शाश्वतम् ॥६॥

एकमप्यपरशैलकाननं, येषु भूषयति तानि कोटिशः ।
कामकेलिकुलमन्दिराण्यहो, यत्र खेचरयुगाणि सन्त्यलम् ॥७॥

यः कुरूनपि हसत्यसंशयं, राजधर्मजिनधर्मराजिभिः ।
पत्तनैरिह धरोऽपरः श्रियं, को नु तस्य तुलयेन्महानपि ॥८॥

स्वर्दुरापकलकोकिलारवासक्तिमानिव सुराङ्गनाजनः ।
यस्य शृङ्गविपिनं कदापि न, प्रोज्भति प्रियतमानुगामुकः ॥९॥

यस्य नूनमुदधिस्थभूधरान्, पश्यतः प्रियतया स्वगोत्रजान् ।
अस्तमिन्दुरुदयं दिवाकरः, सदधन्नयनतां प्रगे ययौ ॥१०॥

---

१. नाम । २. अग्रभाग । ३. वंताढ्ये कूटा ९ उच्चत्वे योजन ६ क्रो० १, मूले विष्कम्भोऽप्येष एव । मध्ये तु किञ्चिदूनानि योजन ५, उर्द्ध्वं तु योजन ३ क्रोशार्द्धं च । मध्ये कूटास्त्रयः सौवर्णाः, शेषास्तु षड्रत्नमयाः ।

उन्नतं यमनुपास्य चक्र्यपि, प्राप कोऽपि सकलां न चक्रिताम् ।
को हि भूभृदपरश्चरो'ऽचर[2]-स्तेन साम्यमुपयातु भूतले ॥११॥

मानबाह्यपृतनोऽपि चक्रभृद्, यस्य कुक्षिविवरे हरेरिव ।
व्यासभाजि न विभाव्यते जरत्तोयबिन्दुरिह् हेलयाऽशितः[3] ॥१२॥

उन्नतेन घननीलपत्रलेनोपरिस्थितवता वनेन यः ।
नूनमद्रिषु विभुत्वसूचकं, छत्रमुद्वहति केकिपक्षजम् ॥१३॥

यस्य कूटनिकटाच्छतारका, भान्ति मौक्तिककणा इवोज्ज्वलाः ।
केसरिप्रहतकुम्भिकुम्भतः, प्रच्युताः प्रसृमरा निशागमे ॥१४॥

तालमूर्द्धपतितस्फुटत्फलप्रोच्छलद्रसविहस्तपाणयः ।
यत्र नर्त्तनयुजः प्रमोदतो, हासयन्ति शबरीर्बलीमुखाः[4] ॥१५॥

उत्क्षिपंश्च चमरीगणः सितान्, बालधीन् प्रविचलत्पयोधरः ।
यस्य शैलविभुतां समापयत्याशु वारवनिताकृतिः क्वचित् ॥१६॥

दैत्यहेव वनमालयाचितः, केसरीव विलसज्जटाशतः ।
शब्दशास्त्रमिव धातुसङ्गतो, यः समुन्नतशिराः सगर्ववत् ॥१७॥

भूरिभिर्विमलदूरगामुकश्रेयसीभिरिव कीर्त्तिभिः सदा ।
निम्नगाभिरवनीशनाथवद्, भाति यः सरलतापुरस्कृतः ॥१८॥

यस्य निर्झररवोत्त्रसद्वधूगाढकण्ठपरिरम्भमोदिताः ।
तुष्टुवुः शिखरवृन्दमुन्नतं, कामिसिद्धनिवहा निकुञ्जगाः ॥१९॥

दन्तिदानसलिलानुलेपनाश्चम्पकाऽऽरचितचित्रशेखराः ।
केसरस्तबकितश्रुतिद्वया, गुञ्जिकाफलविराजिवक्षसः ॥२०॥

मन्दमन्दतमसि प्रहर्षतो, दत्तकोमलविलासरासकाः ।
गच्छतां शबरयोषितोऽम्बरे, रान्ति यत्र वनदेवताभ्रमम् ॥२१॥

युग्मम्

---

१. राजा । २. प्रद्रिः । ३. भक्षितः । ४. वानराः ।

धामधामयमुपास्य निम्नगा, काऽपि तारयति तां शिलामपि ।
काऽपि तूलमपि मज्जयत्यधः, स्पर्द्धते क इह तेन भूधरः ॥२२॥
यस्य पादसततोपसर्पणान्नूनमापि भुवने पवित्रता ।
गङ्गयाऽपि कथमन्यथा न सा, [1]तज्जहाति युगसंक्षयेऽपि हि ॥२३॥
मस्तकेन दधतः सदार्हतः, किं नु चित्रमिदमस्य सङ्गतौ ।
स्यात् परस्य यदतीवशुद्धता, काञ्चनस्य शिखिसङ्गमे यथा ॥२४॥
यः पयोजविकचाक्षिपत्रया, भ्रू विलासिविलसत्तरङ्गया ।
पद्मसङ्गिमधुपालिकेशया, कान्तयेव मधुरैकरूपया ॥२५॥
तीररूढघनकेतकीरजःकल्पितोरुतरसैकतश्रिया ।
राजहंसमिथुनध्वनिस्फुरत्कामकामियुगलालितान्तया ॥२६॥
स्नानकेलिचलसिद्धसुन्दरीपीवरोरसिजकुम्भताडनैः ।
[2]उद्विवृत्तशफरीविलोचनाऽऽरब्धकान्तगिरिराजवीक्षया ॥२७॥
हारिर्बाहिनिनदप्रबोधिता - ऽनङ्गनाकिमिथुनैर्वनान्तरे ।
खिन्नकायलतिकैरपि स्फुरद्भूरिभङ्गिसुरतैः सुजुष्टया ॥२८॥
कोमलेति सुरभौ च सैकते, मन्मथेन [3]जलमानुषीरपि ।
सस्पृहाः सततमादधानया, स्वप्रियेषु रमणीयसीमया ॥२९॥
वेतसीतरुतलान्यशून्यतां, कामिभिः [4]समयगुप्तचारिभिः ।
संदधन्ति तटयोर्द्वयेन सच्चूतचम्पकयुजोर्दधानया ॥३०॥
गङ्गया बहुधुनीप्रसारया, सिन्धुसंज्ञसरिता च पार्श्वयोः ।
आसमुद्रहिमशैलमाप्तया, पक्षवानिव सदापि लक्ष्यते ॥३१॥
तं मनोहरमवाप्य भूधरं, श्रान्तिमौज्झदखिला पताकिनी ।
अध्वजां तृषमिवार्त्तचातकी, लब्धमेघ्यजलबिन्दुसन्ततिः ॥३२॥
श्रीकुमारवर आलिवर्यया-ऽस्माकमेष नवया जयश्रिया ।
श्लिष्ट इत्यधिकरागया ध्रुवं, विश्वराज्यरमया कटाक्षितः ॥३३॥

---

१. पादोपसर्पणम् । २. परावृत्त । ३ मत्सी । ४. सकेत ।

सोऽवदानपरिकीर्त्तनामृतस्राविवक्त्रकमलैः सुमागधैः ।
नन्द्यमान उपगीतकिन्नरध्वाननिन्दिनिनदैः पदे पदे ॥३४॥

वैरिणो यश [1]उदीर्णमम्बरादुद्विवासयिषुरुत्कटत्वतः ।
व्याप्नुवन्निति निरन्तरं ध्रुवं, प्रौढतूर्यनिनदैः पुरःसरैः ॥३५॥

नृत्यमानकरणाङ्गहारवन्नर्तकीकररुहप्रभोत्करैः ।
विस्तृतं स्वपुरतो महारिपो,: स प्रतापमपसारयन्निव ॥३६॥

दिव्ययानसुविमानचारिभिः स प्रियः खचरसञ्चयैर्वृतः ।
पाकशासनममर्त्यतत्प्रियाराजिराजिगमनं पराभवन् ॥३७॥

पौरचारुवनिताविलोचनान्यञ्जयन्निव सुध शलाकया ।
कान्तदर्शनतया हि तन्मनो - ऽनङ्गसायकशतैः सपूरयन् ॥३८॥

विश्वभाविशिवकल्पशाखया, सिद्धमङ्गलविधिः सुनन्दया ।
प्राविशन्निजपराक्रमार्जित, प्रीतिमानशनिवेगपत्तनम् ॥३९॥

सप्तभि कुलकम्

माङ्गलिक्यमनुरूपमिष्यते, चेष्टितस्य महतां महोभुजाम् ।
नूनमद्भुतरणाय चक्रिणे, सर्वराज्यमिति ते ददुर्नृपाः ॥४०॥

येऽप्यनसिषुरनल्पदर्पतो, नैव खेचरनृपा अपि प्रभुम् ।
तान्नदीरय इवैष नम्रतां, वेतसानिव हठादवापयत् ॥४१॥

तत्र भूभृति महोदयेऽपरः, कोऽप्यभूत् क्षितिपतिर्न सत्प्रभः ।
चण्डरोचिषि नभः प्रसाधयत्यन्य उल्लसितभाग्रहो हि कः ॥४२॥

अभ्यषिच्यत स शेषखेचरैः, स्वप्रभुत्व उदितोरुविक्रमः ।
को हि सद्गुणगुरुर्न धार्यते, माल्यवच्छिरसि मानितैरपि ॥४३॥

नाऽपरस्य महतोऽपि चक्रिणः, कस्यचिद् गिरिवरेऽभिषेचनम् ।
एवमत्र खचरैर्निशम्यते, सत्तमा ह्यसमभूतिभाजनम् ॥४४॥

चन्द्रकान्त इव रत्नसन्ततौ, मालतीव कुसुमेषु वर्यताम् ।
खेचरेषु दधदत्यवाहयत्, तत्र सौख्यनिचितः स वासरान् ॥४५॥

---

१. उदयप्राप्तम् ।

भानुवेगनृपतिः कदापि तं, प्राञ्जलिः प्रणयतो व्यजिज्ञपत् ।
रूपदत्तकमलाचपेटिकाः, सत्कला हि मम सन्ति कन्यकाः ॥४६॥

वल्लभा बकुलमत्यपश्चिमाश्चारुभाश्च शतसंख्ययान्विताः ।
रोहिणीप्रभृतिविद्यया चिरं, त्वत्तनूरिव नितान्तमाश्रिताः ॥४७॥

व्याहृता मदनुयोगपूर्वकं, ज्ञानिना सुमुनिनाऽप्यमूरिति ।
तुर्यचक्रिकरपङ्कजालिनीश्रीधरा हि समयेऽत्र भाविनि ॥४८॥

तन्महाज्वरहरोरुतक्षकोद्दीप्ररत्नजलदेशनोपमम् ।
सुष्ठु दुष्करतया मुनेर्वचो, व्याकुलोऽहमभव निशम्य च ॥४९॥

चक्रिणा क्व नु समागमो मम, क्वाऽर्थना क्व च तदर्थसङ्गतिः ।
इत्यनल्पकुविकल्पकल्पनैः, कष्टवानुषितवानियच्चिरम् ॥५०॥

अद्य तु स्वयमिहागमत् प्रभुर्मत्प्रसूतिसुकृतैरिवाऽऽहृतः ।
तत्करोतु सफलां ममाऽर्थनामङ्गजा तरुणिमोद्गमैः समम् ॥५१॥

मत्पितुर्वचनतः सदक्षिणः, कन्यकाशतमशीत[1]-मन्मथम् ।
पर्यणेष्ट हरिणाङ्कमण्डलव्याजविश्वविलसद्यशश्चयः ॥५२॥

स प्रजाकुमुदिनीसुधाकरो, बन्दिबालजननीपयोधरः ।
वैरिमानसकुटीदवानलः, कामकेलिवलभीशिखावलः ॥५३॥

काव्यसद्गुणनिबद्धभारती-शारिकारुचिरवक्त्रपञ्जरः ।
साधुसङ्गसुविविक्तहृद्गृहप्रस्फुरद्विमलतत्त्वदीपकः ॥५४॥

जैनबिम्बमहिमोद्भवन्महापुण्यशैलदलितैरिवाहितैः ।
नष्टमूर्त्तिभिरबाधितप्रजा - सन्ततोत्सवशतप्रमोदितः ॥५५॥

सर्वतोऽपि घटमानसम्पदां, सुभ्रुवां च परिभोगलालसः ।
यक्षराज इव तत्र तस्थिवानीश्वरप्रकृतचित्तनिर्वृतिः ॥५६॥
चक्कलकम्

अन्यदाऽगमदथो हिमागमः, प्रेयसीमततमप्रियागमः ।
शारदार्ककरतापितोर्वराशान्तये ध्रुवमतीव शीतभाक् ॥५७॥

---

१. उद्दीप्त ।

यत्र वाति पवनः पतद्धिमासारसीकरभृदप्यहर्निशम् ।
प्रोषितप्रियतमामनःकुटीकोटरेषु दवतां दधत्पराम् ॥५८॥

गन्धतैलघनकुंकुमद्रवौ, सान्द्रकञ्चुकसुसिक्थका-¹दरौ ।
हैमनं व्रतमिवाऽनिशं दधुर्यत्र सोष्मवपुषोऽपि योषितः ॥५९॥

ईषदुन्मिषितरोध्रकुड्मलं, कन्यकास्तनरुचिं दधाति यत् ।
तेन तस्य परिरम्भलोलुपः, कुन्दमेति न हि यत्र षट्पदः ॥६०॥

दह्यमानघनसारचन्दनोद्भूतगन्धसुभगैः शुभानलैः ।
स्पर्शदत्तदयिताङ्गसम्मर्दै-र्यत्र भान्ति निचिता हसन्तिकाः² ॥६१॥

तत्समीपगनिजप्रियामुखालोकमोदभरबद्धसकथाः ।
ईश्वराः सुरतकेलितोऽधिकं, यत्र सौख्यमलभन्त कामुकाः ॥६२॥

यत्र शीतजलमज्जनैः समं, रात्रिषु क्वणितदन्तवीणया ।
पार्वतीमिव भजन्ति कन्यकाः, शेषयोषिदधिरूपसम्पदे ॥६३॥

कुन्दहाससुभगाः प्रियंगुभि-र्भूषिता अपि वनान्तभूमयः ।
दुर्भगा इव ददुर्मनो मुदं, यत्र पान्थनिवहायनेक्षिताः ॥६४॥

प्रौढपुष्पलवलीसमागमे, यत्र षट्पदविटोऽप्यजीजनत् ।
पुत्रिकामिव वियोगिनीमनो-मन्दिरानिशविलासिनीं रुजम् ॥६५॥

यत्र पक्वबदरीवनश्रियः, पद्मरागशकलद्युतिद्विषः ।
विप्रयुक्तपथिकस्फुटद्वृदां, भान्ति शोणितमहाहृवा इव ॥६६॥

यत्र नूनमसमेषुणा धनुः, स्वं सुदुर्बलमवेत्य नूतनाः ।
सज्जिता विरहिणीमनोभिदे, मञ्जुलाः शितिमहेक्षुयष्टयः ॥६७॥

स्निग्धसान्द्रहरितैर्यवांकुरैरात्तनीलघनकञ्चुका ध्रुवम् ।
बालिकेव रुरुचे हिमागमश्रीरदृष्टविकसत्पयोधरा ॥६८॥

केकिनां न हि ³शिखण्डमण्डलं, नाऽपि पञ्चमकलापिकीरवः ।
एकको मरुबकः समुल्लसन्, यत्र मोदयति सर्वकामिणः ॥६९॥

---

१. अधरादियोग्यं मधूच्छिष्टम् । २. अग्निशकटिकाः । ३. पिच्छ ।

मित्रवच्च शिशिरोऽपि तच्छ्रियं, संपुपोष कलयाऽतिशायिभिः।
साम्बुशीकरसुचण्डमारुतैः, पुष्पितैर्दमनकैश्च चारुभिः ॥७०॥
सोष्मपीनकुचगाढसङ्गमं, सद्रसायनमिवैष कारयन्।
कामिनां विनयति स्म दूरतस्तीव्रशीतमयमामयं निशि ॥७१॥
द्राघयत्यतितरामयं निशाः, सन्तताऽऽन्तरतकेलिनिर्भरात्।
सर्वकामिमिथुनान्महाशिषो, लब्धुकाम इव कामसम्मतः ॥७२॥
भूरिधूमपटलेन सन्दितं[1], नक्तमावसथसञ्चयं व्यधात्।
शीतभीतित इवात्तवाससं, चण्डवायुपरिकम्पित हि यः ॥७३॥
तत्र चक्रभृत एणचक्षुषो, गन्धतैलकुसुमाढ्यकुन्तलाः।
चक्षुषामिव जनस्य काम्यतां, सन्दधुर्मधुलिहामपीक्षिताः ॥७४॥
कुंकुमाविरलरागरञ्जिताः, स्वर्णचूर्णरुचिरत्विषो बभुः।
काञ्चनाचलविलासभित्तयो, नूतनातपनिषेविता इव ॥७५॥
मन्मथोष्मनिचितानपि स्तनानावरोषत सुपीनकञ्चुकैः।
सप्रतापमपि हृद्विबाधकं, नाऽपि धत्त इह कः सचेतनः ॥७६॥
ताभिरङ्गजविहारभूमिभिः, सार्द्धमुद्धतरसो हिमागमम्।
वीतशीतविकृतिर्वसंतयंस्तुर्यचक्रभृदुपालल[2]-च्चिरम् ॥७७॥
इन्द्रियौघसुखसन्ततिप्रदा, अप्यपूर्वललिताक्षिविभ्रमाः।
तस्य नाकिललनाजितः प्रियाः, स्वर्गतोऽप्यदुरिहाधिकां मुदम्। ७८॥
कोष्णपीनकुचया सुनन्दया, प्रौढयौवनयुजा समेत्य तु।
शीतजं मदनदाहज च तद्दुःखमौज्झदखिल क्षणेन सः ॥७९॥
दीर्घिकासु विपिनेषु पर्वतेष्विन्द्रियामृतकणेषु कौतुकात्।
हेलयाऽथ विहरन् कदाप्यसौ, शैलमागमदमुं मनोहरम् ॥८०॥
अत्र चाद्य सुकृतद्रुमोदयाच्चक्रिणोऽपि भवता समागमः।
चण्डरोचिष इवाम्बुजन्मना, मीलिताक्षिदलशालिनाऽभवत् ॥८१॥

---

१. सम्बद्धम्। २. चिक्रीड।

श्रीमहेन्द्र ! मयकेऽतिलेशतस्त्वद्वयस्यचरितं प्रकाशितम् ।
श्रूयमाणमपि यज्जगन्मनः, केकिनो नवपयोदडम्बरम् ॥८२॥
यावदित्थमवदत् कुटुम्बिनी, चक्रिणो बकुलमत्यभिख्यया ।
विश्रुता सुरतमन्दिरान्तरे, तावदीक्ष्यत विभुः स निद्रया ॥८३॥
सार्द्धमाशु निजमित्रसुन्दरी, सैनिकैः प्रमदनादनिर्भरैः ।
चन्द्रमौलिरिव सत्परिच्छदः, शैलराजमगमत्तमेव सः ॥८४॥
तत्र चावसरमाप्य कर्हिचिच्छिष्यवन्निमित[1]-पाणिनालिके ।
श्रीमहेन्द्र सुहृदा प्रियवदोऽवादि साश्रु कुरुराजनन्दनः ॥८५॥
ग्रीष्ममुक्तसलिलाशयोत्पतन्मीनबालकविलासिसाम्प्रतम् ।
त्वद्वियोगशिखिकुण्डगर्भगं, वर्तते जनकयोर्द्वयं तव ॥८६॥
तं निशम्य गुरुमन्युमुद्धुरं, तत्र चाशु कृतराज्यसंस्थितिः ।
भानुवेगनृपतिं निजे पदे, सन्निवेश्य गिरितश्चचाल सः ॥८७॥
सावरोधबहुपौरखेचरः, खं विमानपटलेन संस्तृणन् ।
स्वर्णशङ्करुचिरेण तद् ध्रुवं, स्वप्रतापयशसोश्चयेन सः ॥८८॥
नाकिनामपि समापयन् क्रियाः, संज्ञया श्रुतिपथे जडीकृते ।
योधमागधमृदङ्गकाहला - दुन्दुभिध्वनिभिरुद्धुरोद्धुरैः ॥८९॥
यावदेवमगमन्नृपेश्वरः, स स्वसैन्यविजितामरेश्वरः ।
नाऽतिदूरमथ मागधाधिपस्तस्य कौतुकमिति न्यदर्शयत् ॥९०॥
पश्य श्रीकौस्तुभेन्दुप्रभृतिहृतिभवन्मन्युनेवातिलोलत्- ,
कल्लोलोत्ताल[2]-हस्ताहतिनिनदमहाभैरवोऽयं विषादी ।
अब्धिः सर्वस्वलोपाकुलगलितमुदश्चातुरीं गाहते स्राक् ,
देव ! त्वद्वैरिनेतुर्गुरुगिरिविवरासङ्गिनः श्याममूर्त्तेः ॥९१॥
नृत्यद्विद्याधरस्त्रीकठिनघनकुचास्फालनस्रस्तहार -
श्च्योतन्मुक्तावलीभिः शबलितकटकोऽष्टापदाद्रेरभिख्याम्[3] ।
शश्वज्जैनेन्द्रवेश्मोत्सवविधिषु जनिष्वेव तीर्थेश्वराणां ,
तादृग्लीलस्य [4]कर्षत्यनुपममहिमाऽष्टापदोऽयं धरेन्द्रः ॥९२॥

---

१. न्यस्त । २. उद्भट । ३. शोभाम् । ४. पराजयते ।

नाथ ! त्वत्पूर्वजानामय[1]-ममरगृहश्रीविलुण्टाकमूर्त्ते -
र्जैनागारस्य दासीकृतसलिलनिधेर्विष्णुपद्या[2] भ्रमस्य ।
निर्माणं मानवेच्छापथगलितमिदं दर्शयन्नद्भुतं ते ,
नूनं कर्मण्युदारे प्रदिशति नितरां वृत्तिमेवंविधे स्राक् ॥६३॥
दृष्ट्वा सम्भोगभङ्गिव्यतिकरसुभगं खञ्जनद्वन्द्वमस्या-
स्तीरे भूमिं खनन्तः कनकनिधिमहालाभलुब्धाः किराताः ।
लभ्यं लब्ध्वापि देवाऽस्खलितकरयुजस्त्वत्प्रतापा इवैते ,
गङ्गायानां रमन्ति क्षणमपि ललनालालिताङ्गाः समीरैः ॥६४॥
त्वत्स्त्रैणस्याऽऽस्यलक्ष्मीं प्रविकचकमलैः कोकयुग्मैस्तनाभां ,
कल्लोलैर्भ्रूविलासांस्तरलतरवपुः पश्यतस्ते मुषित्वा ।
सिन्धुर्भीत्येव देवान्तरिततनुलतातीरवीरुद्वितानै-
रेषा रेखायमाणा कुटिलगतिमती तस्करेव प्रयाति ॥६५॥
सोऽयं कश्मीरदेशः कनकरुचिमुखां यत्र कान्तामुखानां ,
भूषायै केसराणि श्रुतियुगमलिकं चाऽनुविन्यासभाञ्जि ।
धृत्वा गन्धेन लक्ष्मीं मृगमदजयिनस्त्वद्यशःसौरभस्या-
ऽऽश्चर्यं मूर्त्तिं तु बिभ्रत्यरुणमणिरुचस्त्वत्प्रतापस्य देव ॥६६॥
नाथाऽनाथेयमुर्वी कुरुकुलतिलकं नूनमेकं विनेति ,
ध्यायन्ती त्वां सखेदा दिनकरतनयाश्यामता तां प्रपद्य ।
सम्प्रत्येषा नु कूजत्सितविहगकुलैः सप्रमोदा हसन्ती ,
ननं याति प्रवक्तुं गजपुरमभि ते किंवदन्तीं जवेन ॥६७॥
इत्थं पश्यन्ननेकं विकसितनयनः कौतुकं शक्रलीलः ,
प्राप प्राज्यप्रतापो गजपुरमचिराच्चित्रकृच्चित्तभित्तौ ।
विश्वस्यापि स्वनाम्नो मदकलकरिभिः प्रांशुभिर्भूरिभिर्यत् ,
संरुद्धाशेषमार्गं ध्रुवमनिशमभात् सत्यताख्यापनाय ॥६८॥

इति युगप्रवरागमश्रीमज्जिनपतिसूरिशिष्यलेशविरचिते
श्रीसनत्कुमारचक्रिचरिते गजपुरप्रत्यागमनो
नाम द्वाविंशतितमः सर्गः ॥छ. ॥२२॥

---

१. अष्टापदः । २. गङ्गावर्त्तनस्य ।

त्रयोविंशतितमः सर्गः

कीर्तिमानशनिवेगमर्दनाद्, गीयमानखचराचलार्ज्जनः ।
बान्धवैर्गजवराधिरोहिभि - र्विश्वसेनसचिवैरुपावृतः ॥१॥

सत्पताकमवबद्धमालिकं, पूर्णकुम्भरुचिरं सतोरणम् ।
सर्वमेव स विवेश तत्पुरं, स्वःपुरायितमशेषतद्गुणैः ॥२॥
युग्मम्

तत्र तस्य विशतः पुरेऽभवत्, कोऽपि तज्जनकयोः सुखोदयः ।
सम्मदं समतिशय्य नाकिनामप्यधाद् य उपमानबाह्यताम् ॥३॥

राजमार्गमवतीर्णमङ्गनाः, पातुमिन्दुमिव तं चकोरिकाः ।
आययुः प्रतिपथं विलोचनैरादधत्य इव सोऽत्यलं पुरम् ॥४॥

कायकान्तिमवरोधसम्पदं, तस्य खेचरपरिच्छद बलम् ।
पश्यतां पुरपुरन्ध्रिचक्षुषां, कौतुकं किमपि काममुद्ययौ ॥५॥

कापि सत्वरमपास्य बालकं, निर्यती स्वगृहतः कुतूहलात् ।
स्रस्तनीविरभवत् कुतूहलं, सैव षिद्गनिकरस्य दूरतः ॥६॥

अस्तु पुष्परचना सविभ्रमा, बन्धनैऽप्यविहितादृतिः परा ।
मूर्द्धजेषु जवतः समाययौ, कुत्र कामिनिवहे ह्यचापलम् ॥७॥

सम्भ्रमाच्छ्रवसि कङ्कणं करे, कुण्डलं तु परिधाय धाविता ।
वाससोऽपि परिवृत्तितत्परा, कापि तत्र हसिता सखीजनैः ॥८॥

अञ्जितैकनयनाऽपराऽऽपतद्, वेगतः करगृहीततूलिका ।
नान्यदञ्जितुमसौ प्रचक्रमे, ताडितेव मदनेन पत्रिणा ॥९॥

अर्द्धरञ्जिततलं प्रसाधिका, हस्ततोंऽह्रिमपकृष्य काचन ।
चित्तरागपदरागसङ्गमा, जीर्णभोरिव समागमद् द्रुतम् ॥१०॥

पीवरोरुजघनस्तनस्थला, रुद्धवेगगमना समुत्सुका ।
काऽप्यदृष्टनृपतिर्निनिन्द ताऽन्यङ्गकान्यहितकृन्न शस्यते ॥११॥

चक्रवर्तिनि समीपवर्तिनि, व्यक्तमन्मथमदा मृदाङ्गनाः ।
पार्वतीप्रतिघशङ्किनाऽभवन्, शम्भुना क्षणमनीक्षिता इव ॥१२॥
चक्रुरेणनयनामुखाम्बुजैर्जालिकान्यनुगृहं सपत्रकैः ।
व्यक्तलाञ्छनशशाङ्कलाञ्छितान्यप्यहन्युदितराजकौतुकाः ॥१३॥
तद्गुणश्रुतिसुधौघनिर्भरं, रोद्धुमेव चकिता बहिःप्लवात् ।
नूनमंगुलिमुखेन सम्मुखं, कापि कर्णविवरं व्यघट्टयत् ॥१४॥
ऊर्ध्ववेल्लितभुजा श्लथीभवन्-नीविरुन्नमदुरःपयोधरा ।
दृश्यमध्यनवरोमसन्ततिर्वीक्ष्य कापि नृपतिं व्यजृम्भत ॥१५॥
रूपलोलितरतिः समन्मथा, निर्निमेषनयना सुनिश्चला ।
उच्चसौधशिखरं श्रिता परा, सदधे नगरदेवताकृतिम् ॥१६॥
[1]निर्लसन्त्यमलमेखला स्त्रियाः, किङ्किणीबहलनिक्वणैर्व्यधात् ।
सुप्तबुद्धमिव कामकुञ्जरं, कामिनीमृदुलताऽवलोलनम् ॥१७॥
नाकलोकबलिसद्मकामिनी, दृष्टिमार्गमपवृज्य[2] भूतले ।
निर्ममेऽस्मदनुकम्पया ध्रुवं ब्रह्मणायमशरीरतर्जनः ॥१८॥
न्यूनरूपविभवोऽपि मन्मथः, स्पर्द्धते शशिमुखेन चक्रिणा ।
सोऽस्य पक्षपतितेन भस्मतां, प्रापि नूनमिति चन्द्रमौलिना ॥१९॥
किं जपेन तपसाऽपि किं यदि, प्राप्यते प्रियतमोऽत्र नेदृशः ।
स्वं कृते ह्यविदितैतदुन्नतिः, खिद्यते खलु नितम्बिनीजनः ॥२०॥
रूपवानिति यदीदृशं पतिं, प्राप्तवान् कथमयं वधूजनः ।
यन्नधातुरनुरूपसङ्गतौ, दृश्यते क्वचिदपि प्रवीणता ॥२१॥
एवमादिवचनामृतं पिबन्, यौवतस्य समुदोऽवलोकितः ।
तेन[3] चानिमिषलोचनेन स, प्राप राजसदनस्य तोरणम् ॥२२॥
तत्र मौक्तिकशुभैस्तमक्षतैर्योषितो नतशिरस्यवाकिरन् ।
इन्द्रवद्विहितविश्वमङ्गलः, प्राविशन्निजगृहं महानृपः ॥२३॥

---

१. स्रंसमाना । २. परिहृत्य । ३. यौवतेन ।

तत्पिता जननतो महोत्सवं, सोच्छ्रयं प्रमदतो व्यधापयत् ।
आत्तराज्यपदवल्लभाङ्गजस्याऽऽगमात् किमपरं हि हर्षदम् ॥२४॥
तत्समागममुदो न सम्ममुः, पौरचित्तभवनेषु विस्तृताः ।
तद्यशांसि भुवनेषु भीतयो, वैरिवर्गहृदयेषु वा यथा ॥२५॥
तं महेन्द्रमपि मित्रमुज्जगुः, सज्जनाः सपदि मेलितप्रभुम् ।
सर्वतोऽभिमतकल्पपादपप्रापकं हि भुवि को न शंसति ॥२६॥
एवमुन्मुदि पुरे न्यवेश्यत, स्वे पदे स पुरुहूतशासनः ।
रञ्जितेन जनकेन तद्गुणैः, को हि पात्रमवधीरयेद् बुधः ॥२७॥
चक्रिणा तु वटबीजवत्तनु, प्राप्य तन्निजगुणैरवर्ध्यत ।
साधनेन सकलस्य भारतस्याप्तवृद्धिपरमा[1] हि सत्तमाः ॥२८॥
राज्यमाज्यवदकण्टकं कृती, गोसमुत्थमतिशायि सद्रसम् ।
स्नेहसारमतिपोषदं तनोः, सेवते स्म सुनिरामयो ह्यसौ ॥२९॥
बद्धहेममुकुटाः सहस्रशो, भूभुजोऽग्र्यमभिषेकमादधुः ।
सार्वभौमपदवीविभावनं, द्वादशास्य शरदः प्रमोदतः ॥३०॥
त्रिर्यथास्य न तथाऽभवन्नृपश्रीविधिस्तु महतोऽपि कस्यचित् ।
पाञ्चजन्यमपहाय किं हरे, रत्नमुद्वहति वा त्रिरेखताम् ॥३१॥
तच्चतुर्दशतयाऽस्य भास्वरं, रत्नजातमचिरादजायत ।
चक्रिभीतित इवाऽऽश्रितं सुरै - र्यन्नजय्यमपरैः सहस्रशः ॥३२॥
भास्करोऽप्यरुणमग्रतःसरं, सविधाय तिमिरं निकृन्तति ।
तद्वदस्य जयिनः सपत्नभिद्वेधसा व्यरचि सैन्यनायकः ॥३३॥
प्रातरुप्तकलमादिलावकः, सायमाविरभवद् गृहाधिपः ।
तस्य सैन्यसुकृतावनीरुहो, मूर्त्तिमानिव शुभः फलोदयः ॥३४॥
शान्तिकर्मकुशलः पुरोहितस्तस्य नूनमिति स क्षतामयः ।
वैरिदत्तनिखिलाधिसङ्गतव्याधिकोटिरकरोत् प्रजावनम् ॥३५॥

---

१. परायणाः ।

दन्तिराड् न नृपतिं गुहागतो, मण्डलान्युभयतोऽप्यकारयत् ।
रोहणेन लघु किं नु तच्छलाच्छेषदन्तिषु विमाननां ददौ ॥३६॥

अश्वरत्नमपि तस्य तद्बभौ, यज्जवेन मरुतोऽभिभावकम् ।
तच्छलेन हरिणाऽवतारितं, वाहनं स्वमिव सर्वलक्षणम् ॥३७॥

विश्वकर्मकरणि:[1] सवर्द्धकिस्तस्य केन सुधिया न शस्यते ।
खेचराचलनदीद्वये स्थलीचारितां हि कटकस्य यो व्यधात् ॥३८॥

स्वावरोधपरिभोगसङ्करे, तस्य खिन्नवपुषः सुधाश्रियम् ।
यद्दधे निखिलभोग्यशेखरं, स्त्रीमिषेण तदभूच्च जीवितम् ॥३९॥

चक्रमक्रमनिर्वतिता हि तं, [2]चक्रवालविलसत्प्रभं बभौ ।
भानुबिम्बमिव तत्प्रतापतो, व्रीडितं सदुपसेवनोद्यतम् ॥४०॥

आतपत्रमपि तस्य चित्रकृत्, स्पर्द्धया गगनमण्डलस्य यत् ।
विस्तृतं ध्रुवमघाज्जलापदि, प्रीणयेत् कटकमन्यथा कथम् ॥४१॥

तस्य सैन्यनिवहस्य तावतः, पादपीठपदवीं दधद्भुवम् ।
यज्जिगाय तदरेणुकण्टकं, रत्नतां कथमुपैतु नाजिनम् ॥४२॥

यत्र चण्डमहसोऽपि कुण्ठता, खेचराचलमहागुहान्तरे ।
तत्र भासनपटुर्नवो रविस्तस्य शश्वदभवद्वशो मणिः ॥४३॥

भान्वनाशिततमस्तमोपहान्[3], दीप्रमण्डलमिषेण भास्करान् ।
सूत्रयन्त्यचलगान् बहून् विभोः, काकिणी विजयते स्म वेधसम् ॥४४॥

तत्कृपाण उदितप्रभोऽप्यभूद्, वैरिवर्गवनितामुखेष्वलम् ।
शोकपङ्कमृगनाभिमण्डनारम्भदम्भनिपुणः पुरो नटः ॥४५॥

गच्छतः स्थपुटभूसमत्वकृत्, वज्रतोऽपि निपतन् सुदारुणः ।
कालदण्ड इव वैरिखण्डनस्तस्य दण्ड उदभूदखण्डितः ॥४६॥

एवमस्य निधयो नवाऽभवन्, यक्षवामनयनाः क्षितीश्वराः ।
सोत्सवा जनपदाः सहस्रशो, नाटकानि च सदा महामुदे ॥४७॥

---

१. सदृशः । २. मण्डलेन । ३. पुस्तके तु '० तमस्तमापहान् इति पाठः ।

स्यन्दनाः करिवरास्तुरङ्गमा, लक्षणाङ्कवपुषश्च लक्षशः ।
कोटिशो कुटिलगाः पदातयो, ग्रामकाश्च नगराभिभावुकाः ॥४८॥

खेटकाकरपुरोरुपत्तन-द्रोणवक्त्रकमडम्बकर्वटाः ।
निर्जितामरपुरीविभूतयस्तस्य रेजुरभयाः सहस्रशः ॥४६॥

आधिपत्यमिति स प्रतापतः, पालयन् जिनमतेऽतिभक्तिमान् ।
पूर्वजन्मजमिवान्वभूदऽसौ, प्राप्य रूपमपरं भुवस्तले ॥५०॥

स्वीयकान्तललनौघलालितो, दानवानुपचिताऽङ्गसप्तकः[1] ।
नागकुञ्जर इवात्यवाहयत्, स क्षणार्द्धमिव वत्सरव्रजम् ॥५१॥

तैलरूषिततनोरभूषणस्याऽस्य कौचन कदाचिदेयतुः ।
[2]अग्रजन्मतरुणौ सकौतुकौ, सश्रमाविव किलाऽध्वलङ्घनात् ॥५२॥

द्वारपालकथितौ विलोक्य तौ, रूपसम्पदमतीतवाक्पथाम् ।
तस्य तां तुतुषतुस्तरां हृदि, ब्रह्मणः[3] परमयोगिणाविव ॥५३॥

ध्यायतः स्म शुचिविस्मितेक्षणौ, तावहो ! दिवि सुराः स्वमूर्त्तिभिः ।
नाकमात्रकदृशः स्मयाचलं, किं वहन्ति मरुकूपदर्दुराः ॥५४॥

नागलोकललना अपि प्रियैर्-मर्कटैरिव तदङ्गना मुदम् ।
व्यर्थमादधति दुग्धवञ्चिता, काञ्जिकेऽपि रमते द्विकप्रिया ॥५५॥

तेऽणवोऽत्र परमाः प्रशस्यते, चैक एव स भुवि प्रजापतिः ।
येन रूपकमिदं विनिर्ममे, शिल्पिनं मयमतीत्य दूरतः ॥५६॥

अद्य जन्म सफलं विलोचने, दृश्यदृष्ट्यमृतलेखयाञ्जिते ।
यत्र रूपरुचिभाग्यसम्पदां, मन्दिरं महदयं विलोकितः ॥५७॥

इत्थमुद्गतमुदौ विलोक्यतावन्वयुंक्त[4] मधुराऽक्षरं विभुः ।
[5]भूमिदेवयुगलेन भूषितं, मन्दिरं किमिदमद्य मामकम् ॥५८॥

प्रोचतुः प्रहसिताऽऽस्यपङ्कजौ, तौ नरेन्द्रमभिकीर्त्यते तव ।
रूपसम्पदसमा जगत्त्रये, क्षिप्तदेवदनुजेश्वरद्युतिः ॥५६॥

---

१. स्वाम्यमात्यसुहृत्कोशराष्ट्रदुर्गबललक्षणम् । ४ पादशुण्डलिङ्गलांगूललक्षणानि च । २. ब्राह्मण । ३. परमात्मनः । ४. पप्रच्छ । ५. द्विज ।

कौतुकेन बत तां प्रपश्यतो-रावयोः समजनिष्ट सम्मदः ।
तन्निशम्य जलराशिवत्क्षये. स स्मयेन सुदृढोऽपि चाऽक्षुभत् ॥६०॥
गर्वपर्वतगतोऽब्रवीदसौ, तैलसिक्तवपुषो हि का द्युतिः ।
हैमनाम्बुकणपङ्क्तिेऽम्बुजे, किं कदापि कमलाऽवतिष्ठते ॥६१॥
तन्मदीयतनुरूपदीधितिर्दृश्यतां सदसि चेत् कुतूहलम् ।
उन्मिषत्यहिमरोचिषोऽपि यत्, कोऽपि हन्त! महिमोदयाचले ॥६२॥
तौ विसृज्य कृततूर्णमज्जनोऽलङ्कृतिस्तबकिताऽखिलाङ्ककः ।
शुभ्रकान्तिकरधौततारका-वारचुम्बिनभसः श्रियं दधत् ॥६३॥
सोऽध्युवास मृगराजविष्टरं, सन्निविष्टमणिकान्तमुन्नतम् ।
कल्पवृक्षकलिताग्ररोहणश्रीधरं तदुपवेशने तदा ॥६४॥
चारुचामरयुगोपवीजितः, सिन्धुसिद्धसरितोर्द्वयेन च ।
यक्षबद्धमुकुटावनीश्वर-श्रेणिवारवनिताशतावृतः ॥६५॥
अङ्गरक्षशतदूतकौशिक[1]-व्यूहपत्तिकुलसकुल सदः ।
आश्रयन्नधिरुरोह वज्रिणा, स स्वसभ्यपरिवारिणा तुलाम् ॥६६॥
आह्वयत् प्रमुदितः स तौ द्विजौ, वीक्ष्य चक्रिणमिमौ तु चक्रतुः ।
सैंहिकेयपिहितेन्दुमण्डलद्योति तत्र वदनाम्बुज शुचा ॥६७॥
मस्तकं दुधुवतुः सविस्मयौ, तौ तदापहृतवातकिश्रियौ ।
चक्रभृच्चतुरबुद्धिरुच्चकैः, पृच्छति स्म किमितोदृशौ युवाम् ॥६८॥
ऊचतुः सुरगतौ सदा स्थिरा, रूपयौवनबलच्छविश्रियः ।
मासषट्कमवशेषमायुषो, यावदाहृतसुधारसादिव ॥६९॥
दृष्टनष्टसुभगाः क्षणे क्षणे, पुंसु ता अपि तडिल्लता इव ।
एतदित्थमिति कोऽनुयुज्यतामित्युवाच नृपराट् सुविस्मितः ॥७०॥
अङ्गमेव भवतोऽत्र साक्षिकं, किं दविष्ठमलिनै[2]-र्निदर्शनैः ।
हस्तगे प्रकटदीप्रकङ्कणे, को हि दर्पणधृतौ प्रयस्यति ॥७१॥

---

१. भाण्डागाररक्षक । २. व्यभिचारिभिः ।

सूक्ष्ममेतदवगम्यते कथं, तावपृच्छदिति पार्थिवेश्वरः ।
ऊचतुश्च विषये किलेदृशे-ऽप्यावयोः स्फुरति संविदुत्तमा ॥७२॥

एवमग्रजनिभाषितनृपो, हास्यरत्यतिशयौ विदूरयन्[1] ।
संदधार डिमरूपरूपतां, कोऽप्रियश्रवणतो हि तुष्यति ॥७३॥

किं हि तत्त्वमिति मे निवेद्यतां, सम्यगेवमुदितौ नृपेण तौ ।
आहतुः सदसि नाटकेक्षणाऽऽक्षिप्तदृष्टिमनसो हि वज्रिणः ॥७४॥

सङ्गमाख्य उरुकार्यतः सुरः, सन्निधिं त्रिदिवतोऽद्वितीयतः ।
कृत्स्नदेवरुचिरूपसम्पदोर्दास्यदीक्षणगुरुः समागमत् ॥७५॥

द्वादशार्कपरिभावुकप्रभामण्डलेन पटकान्तिनाऽप्यधात् ।
तत्सभानिमिषवृन्दमन्तिके, कौतुकाद्धरिमिथाभ्यधुः सुराः ॥७६॥

अस्य रूपकमला महीयसी, सर्वतोऽपि कुत ईदृशो विभो ! ।
शुद्धमम्लपरिवर्धमानकं, नाम दुष्करमनेन यत्तपः ॥७ ॥

तप्तमन्यजनने ह्यनुत्तमं, तस्य चारु फलिकेयमुदययौ ।
किन्तु साम्प्रतमणीयसीयमाश्वन्तकान्तिकमुपैष्यतोऽभवत् ॥७८॥

आदितस्तु सकल सुरालयं, न्यक्चकार परितः स्फुरन्त्यसौ[2] ।
ईदृशः किमपरोऽपि कुत्रचित्, कश्चनेति पुनरब्रुवन् सुराः ॥७९॥

प्राह शक्र उदितप्रभः प्रभुर्भारतस्य खलु हस्तिनापुरे ।
अस्त्यनीचकुरुवंशकेतनः कान्तताऽपहसिताऽखिलाऽमरः ॥८०॥

तस्य किङ्करपदे सुधाकरो, हृच्छयस्तु गलहस्तिकाश्रयः ।
पुष्पकाल उदयद् दयाऽऽस्पद, कान्तिरूपसुविलाससम्पदाम ॥८१॥

त विधाय कृतकृत्यतासुखी, साम्प्रतं स्वपिति नूनमात्मभूः ।
नागलोकसुरलोकयोस्ततस्तादृशो न विबुधोऽपि जायते ॥८२॥

त्वन्नुति तत[3] इमां निशम्य नावप्रतीतित इहाऽऽगतौ सुरौ ।
वैजयन्तक-जयन्त-सञ्ज्ञितौ, निह्नवाविव विभोर्बचस्यलम् ॥८३॥

---

१ पच्छिरन् । २. तेजःसम्पत् । ३. शक्रात् ।

तैलदिग्धवपुषः श्रियं परां, पश्यतो पुनरभूदनादृतिः ।
तद्वचस्यनुपमस्य तेन[1] किं, ह्यस्य वर्णितमिति प्रतोपगा ॥८४॥

आस्थितस्य तु तवाधुना सदः, सत्वरं क्वचिदितो[2] जगाम सा[3] ।
बिभ्यतीव[4] सुमुखी पतिव्रता, वेश्मतो हि विटकोटिसङ्कटात् ॥८५॥

तत्त्वमेवमवगत्य भूपते, साध्यमात्महितमेव चिन्त्यताम् ।
बान्धवाविव विबोध्य तौ सुरौ, जग्मतुर्मधुकराभमम्बरम् ॥८६॥

चक्रभृच्चतुरधीरचिन्तयत्, स्वीयमङ्गमरुचि प्रलोकयन् ।
आशु रूपकमला कथं ययौ, स्वैरिणीव बहुधाऽपि लालिता ॥८७॥

वेगवाहिसरिदम्बुपादुका[5], श्रीयुजीह सकलेऽपि वस्तुनि ।
कुत्र मानसमहो निवेश्यतां, [6]सिन्धुसौध इव ही स्थिराशया ॥८८॥

नूनमेणनयनाः स्वलोचनैः, प्रेमचापलमुशन्ति[7] चञ्चलैः ।
[8]स्थामकामरविणा विशोष्यते, पल्वलाम्भ इव तापिनानिशम् ॥८९॥

नीचगामिचलवेष्टिचेष्टितैरुन्मदात्[9] स्वपितुरम्बुधेर्ध्रुवम् ।
श्रीरतीवचकिता पराङ्मुखी, स्थैर्यसत्तमगृहाधिवासयोः ॥९०॥

कुत्स्यविस्रतनगर्भदर्शनघ्राणतोऽति बहुनिर्विदाकुलम् ।
मानवान्तरुपयाति नो रतिं, जीवितं क्षणमितीव चञ्चलम् ॥९१॥

सार्वभौमपदवी च दूतिकेवाऽनिशं प्रथितदुष्कथाशता ।
दुर्गतिप्रवरयोषिता क्षणात्, सङ्गमं नयति मुग्धभूपतिम् ॥९२॥

स्वर्गदत्तविलसच्चपेटका, ये मुदाचिततयेष्टसङ्गमाः ।
तेऽपि चात्महतये द्रुतं ध्रुवं, ढौकिताऽहितशताः खला इव ॥९३॥

कर्णपादकदली[10] सुबालधीनुत्क्षिपन् मुहुरमून् प्रवक्त्यदः ।
नूनमात्मचलतां हि तच्छला, दन्तिपत्तिरथवाजिसर्वदा ॥९४॥

---

१. प्रभुणा । २. देहात् । ३. रूपसम्पत् । ४. रूपवती । ५. काष्ठमयोपानत् । ६. नदी । ७. भाषन्ते । ८. शारीराधिकं बलम् । ९. हर्षवतः । १०. वैजयन्ती ।

यत्कृते च समुपास्यते रणः, कालवेश्मवदतीवदारुणः ।
ते कपीन्द्रमुखवृत्त्युदुम्बरोत्पातिजन्तुभिदुराः खगोचराः[1] ॥९५॥
पत्तनादिविभुताऽपि वात्यया, साम्यमेति पुरुषं रजःकणम् ।
गर्वपर्वतशिरोधिरोप्य सा, तूर्णमेनमथ पातयन्त्यधः ॥९६॥
विद्युपूर्णतपनीयकुम्भक-श्रीविडम्बिबहिरुज्ज्वलत्वतः ।
यौवतं हरति कामिसूकरस्यात्र मानसमहो विपर्ययः[2] ॥९७॥
व्याधयोऽपि पटुतापहारिणो, दाववह्निविडतापकारिणः ।
तैरहर्निशमिह ग्रहैरिव, ग्रस्तशस्तवपुषः कुतः सुखम् ॥९८॥
सर्वमेवमशुचिस्थिरेतरद्दुर्गतेरनुपमं निबन्धनम् ।
क्षप्यते नवपतङ्गवज्जनैः, किं मयाऽत्र सजता दृशोः प्रिये ॥९९॥
पश्यताऽपि पशुनेव बालिशेनेदृश भवभवं न वेदितम् ।
वस्तुविस्तृततमस्तया मया, कौशिकप्रतिकृतिं वितन्वता ॥१००॥
मामधन्यतममाप्तसम्पदो, हारिण सुकृतदूरगत्वतः ।
धिग् धिगत्यरसपोषणच्छलात्, स्वस्य दुर्गतिरसप्रपोषकम् ॥१०१॥
किं पुरैः किमु गजाश्वपत्तिभि-र्भूरिभिर्विटजनोपयोगिभिः ।
नैकवाहनगृहादितो यतो-ऽन्यत्स्वयं बलवताऽपि भुज्यते ॥१०२॥
अल्पराज्यविभवस्य दुर्गतिश्चास्रवोपचयजा न मा स्म भूत् ।
अस्य नूनमिति चक्रितामदादुच्छ्रिता मम रुषाऽऽशु दुर्विधिः ॥१०३॥
कूटपातिहरिणस्य लुब्धकेनाऽऽहूतस्य शरणं यथा न भोः ।
तद्वदन्तकभटेन मे हठान्नीयमानवपुषोऽपि किं भवेत् ॥१०४॥
यो विहाय कुलटामिवेन्दिरां, लालितामपि परस्पृहावतीम् ।
अग्रहीद् व्रतधुरां महोक्षवन्नाभिनन्दनसुतः स शस्यते ॥१०५॥
मादृशैस्तु विषदिग्धपायसा, स्वादलम्पटतुलाधिरोहिभिः ।
भाव्यमित्यतुलदुःखदाङ्गना, भोगरागपरमै[3]-रिहास्यते ॥१०६॥

१. कपादयः । २. मिथ्याज्ञानम् । ३. एकतानैः ।

तत्कुलीन इव भृत्य ईश्वरं, यावदुज्झति न मां वपुर्बलम् ।
तावदेतदतिदुष्करेऽपि सत्कर्मणि न्यसितुमेव साम्प्रतम् ॥१०७॥
इत्यशेषभवभाव्यसारता, ध्यानकोटिमयमारुरोह ताम् ।
योगिनाथ इव भूमिनाथतामैच्छदुज्झितुमसङ्गधीर्यया ॥१०८॥
आभिमुख्यमभजच्छिवालयद्वार उग्रचरणा तदैव सः ।
जातसाधनबला उदासते, [1]तद्ग्रहे न गुरुसाध्यसाधकाः ॥१०९॥
देहरूपगलनश्रुतेरपि, प्रोल्ललास स विवेककोरकः ।
तस्य यो विरतिभावनामयं, सौरभं समतनोद् विकासतः ॥११०॥

इति निरुपमनिर्विन्निर्ममत्वोऽपि विष्वक् ,
सगर इव स चक्री राज्यसंस्था चकार ।
तनुजसचिवभृत्यैः स्वस्वकृत्ये नियुक्तै-
र्गुरुरिव मुनिनागैर्गच्छ वृत्ति सुवृत्तः ॥१११॥

इति युगप्रवरागमश्रीमज्जिनपतिसूरिशिष्यलेशविरचिते
श्रीसनत्कुमारचक्रिचरिते देवागमनो नाम
त्रयोविंशतितमः सर्गः ।छ॥२३॥

---

१. साधनाङ्गीकारे ।

चतुर्विंशतितमः सर्गः

अष्टवासरभवो महामहो, घोषिताऽभयविधिर्व्यधाप्यत ।
तेन जैनसदनेषु सर्वतो, नापकृत्यचतुरा महाशयाः ॥१॥
कृत्यमन्यदपि तत्क्षणोचितं, सूत्रयन्नभिदधे स पार्थिवैः ।
प्रेमपूर्वमवरोधगुह्यकाशेषपौरनिधिनायकैरपि ॥२॥
नाथ ! किं वयमुपेक्षितास्त्वयाऽकाण्ड एव निविडागसो यथा ।
किं विहातुमुचितो निरञ्जनः[1], प्रेमवानपि हि मातुरङ्गजः ॥३॥
त्वां विनत्य नतवत्सल नतिं, क्वापरत्र मनुजे विदध्महे ।
किं प्रपीय हि सुधां सुधाभुजः, प्रीतिमादधति पल्वलाऽम्भसि ॥४॥
एषु केनचिदलङ्घि शासनं, तावकं किमु मदान्धशासनम् ।
को हि वासुकिफणामणिं स्पृशेदंऽह्रिणा सघृणधीः स्वजीविते ॥५॥
याचनस्त्वयि रतिः प्रियंकरे, सा न पुत्रपितृसुन्दरीष्वपि ।
पुष्कराणि जलजान्यपि प्रियं, भावुकं हि रविमेवमन्वते ॥६॥
तद्विधाय करुणां सुवत्सलो-ऽस्मासु तिष्ठ सुखयन् प्रजागृहे ।
प्रार्थिता न विमुखत्वमादधत्युन्नतप्रकृतयो हि कुत्रचित् ॥७॥
सत्यमित्यथ समर्थ्य तद्वचः, प्राह गौरवपुरस्सरं स तान् ।
क्वापि कोऽपि न मयि प्रतीपकृद्, ब्रह्मणीव परमे भवत्स्वहो ॥८॥
किन्तु सिंहत इवोद्भटाद्भवात्, त्रस्तमेण इव मे मनोऽधुना ।
वाञ्छतीह शरणं सुगह्वरं[2], तेन जैनचरणं यथा तथा ॥९॥
तन्न केनचिदिहान्तरायदे, नेह भाव्यमिति स ब्रुवन् पुनः ।
वैरभाणि नगरेऽपि न क्षमाः, स्थातुमङ्ग ! तव दर्शनं विना ॥१०॥
मन्दिरं वनतिचन्दनं दवत्यर्क्कति व्यजनचारुमारुतः ।
और्वति प्रवरपल्लवास्तृति-र्नाथ ! वल्लभजनादृते यतः ॥११॥

---

१. निष्पापः । २. दुष्करत्वाद् गहनम् ।

इत्यनल्पकलजल्पितानपि, प्रोज्झ्य तान् सपदि सोऽप्रियानिव ।
बद्धहैमनृपपट्टसुन्दरेणा-ङ्गजेन स बलेन सङ्गतः[1] ॥१२॥

यानरूढललनाक्षितीश्वरा-ऽनेकपौरपरिवारितः क्षणात् ।
अन्तरुत्कटविवेकधारया, स्नापितः सुरभिवारिभिर्बहिः ॥१३॥

भूषितोऽन्तरमलैर्महागुणै-र्भूषणैश्च मणिहेमजैर्बहिः ।
तर्जितोर्जितरुचिद्युसद्गृह-श्रीविलासशिबिकाधिरोहभाक् ॥१४॥

गीतिमङ्गलविमिश्रदुन्दुभि-ध्वानरुद्धदिगनेकपश्रुतिः ।
[2]श्रौतधर्मधनशेवधेर्महा-म्भोनिधेश्चरणरत्नसम्पदः ॥१५॥

पापमूलमपहाय चक्रितां, सद्गुरोर्हि विनयन्धरप्रभोः ।
पादमूल उदपाटयद्धुरं, शुद्धशीलतपसस्तदेकधीः ॥१६॥

पञ्चभिः कुलकम्

ते त्वकृत्रिममहानुरागतो-ऽन्तःपुरावनिपशेवधीश्वराः ।
सर्वरत्नकटकश्रिया समं, नम्रशीर्षकमलाः पदे पदे ॥१७॥

मन्त्रचूर्णविवशीकृता इव, प्रौढशाठ्य ठकिता इवाऽथवा ।
प्रेमतन्तुपरिकृष्टमूर्त्तयो, नूनमेनमनुजग्मुरञ्जसा ॥१८॥

युग्मम्

एष राग इयमेव भक्तता, सर्वथार्पणमिदं च सत्प्रभौ ।
यद्विहाय गृहमप्यनारतं, निष्परिग्रहगुरोरुपासनम् ॥१९॥

मासषट्कमिति तेऽभ्रमन् भ्रमात्तन्निवर्तनकृते वृथा श्रमाः ।
याति जातु न रविर्दिशं हरे-र्वारुणीत इति नैव तेऽविदन् ॥२०॥

वीतविश्वविभवस्पृहस्त्वसौ, चक्षुषाऽपि समभावयन्नतान् ।
किं विदग्धतरुणोपतिव्रताश्चित्रिणः समदनान्निरीक्षते ॥२१॥

सर्वमद्भुतमहो महात्मनां, यन्न कृत्स्नकटकेन कस्यचित् ।
श्रूयतेऽनुगतिरेवमादराद्, दीक्षितस्य महतोऽपि भूतले ॥२२॥

---

१. अनुगम्यमानः । २. सम्पूर्णद्वादशाङ्गलक्षणः ।

[1]चक्रवालयतिचर्ययाऽचिराच्छिश्रिये स नृपसंयतस्तथा ।
एककास्खलितसद्विहारिता, योग्यतामभजतोत्तमां यथा ॥२३॥

अष्टमासमुखतीव्रसत्तपस्तापिनोऽस्य तपसः किमुच्यताम् ।
यत्र[2] षष्ठतपसो लघिष्ठता, पुद्गलेषु सकलेष्वणोरिव ॥२४॥

एक एव स परं प्रवेदको[3], लब्धयोः प्रवरभोगशोषयोः ।
येन[4] शेषनरराट् तपस्विनां, दास्यदीक्षणमदायि तत्क्षणे[5] ॥२५॥

कर्मणा सममशुष्यदङ्गकं, शान्तिरुग्रतपसा सहाऽपुषत् ।
तस्य शुद्धमनसस्तपोनिधे-र्वासरे शशिरविद्युती इव ॥२६॥

तस्य पर्युषितचीनकाभिधाऽन्नेन षष्ठतपसोऽप्यभूत्तदा ।
छागलाम्लतरतक्रसंयुजा, पारणाविधिरदीनचेतसः ॥२७॥

भूय एव स चकार तत्तपः, पारणाऽप्यभवदस्य तादृशा ।
दुर्विधेः प्रबलरोगपादपोद्भूतिबीजगुलिकेव कोमला ॥२८॥

जज्ञुरस्य तत उद्धुरा रुजः, सप्त सप्तशिखसच्छिखा इव ।
तापिका न बहिरेव किन्तु ताः, शश्वदन्तरपि कालकूटवत् ॥२९॥

कण्डूज्वरौ कासगलावशोषौ, भक्तारुचिः कुक्षिविलोचनार्त्तौ ।
सप्ताप्यमी तस्य रवेरिवाश्वा रथ यथा प्राणगणं व्यकर्षन् ॥३०॥

आसीद् रोषणवृश्चिकेद्धदशनोत्तालो[6]-ल्ललद्वानर-
[7]प्राञ्चच्चापलवैभवप्रद उरुः कच्छूपिशाचीग्रहः ।
येनानारतमुग्रकोटिनखरैः कण्डूयनं क्रीडया,
लोको न क्षणदास्वपि स्वपिति सद्धैर्यो हि [8]तत्रापि सः ॥३१॥

यत्राङ्ग तापगर्भं सुहुतहुतभुजः सश्रयत्याशु लक्ष्मीं,
कम्पस्वेदावसादाः[9] क्षणमपि च रतेः संस्थितिं न क्षमन्ते ।
तत्र प्रौढे ज्वरेऽपि प्रतिसमयमसौ ध्यानधाराधिरोहात्,
क्लान्ति नागाद् विरत्या सुदृढमबलयाऽऽलिङ्गितत्वेन शङ्के ॥३२॥

---

१. पुनः पुनरावृत्त्या । २. तपसि । ३. अनुभविता । ४. चक्रिणा । ५. भोगशोषानुभवप्रस्तावे । ६. उद्भट । ७. स्फुरत् । ८. कच्छूग्रहे । ९. ग्लानि ।

कण्ठाबाधपटुः[1] समस्तधमनिश्रेण्याहृतिप्रत्यलो[2],
विश्वांत्रावलिकृष्टिसृष्टिसुविधिर्नेत्राब्जशोतद्युतिः ।
कासः पाश[2] इवावरुद्धनिनदाध्वापि प्रभुर्नाऽभव-
त्तस्यात्मैकरति[3] त्वजीवितहृतौ योगिप्रभोर्जातुचित् ॥३३॥

ग्रीष्मे पल्वलवारिणि प्रियतमाङ्केऽपि प्रियाऽसङ्गमे,
शोषो नारसतावधिर्भुवि भवन् दृष्टो ह्यदस्त्वद्भुतम् ।
यद्वक्त्राम्बुरुहान्महामृतकलां [4]निःशेषयन्नप्ययं,
शोषः पोषयति स्म संयमरसं तस्य प्रभोः प्रत्युत ॥३४॥

कामान्धस्य गुरूपदेश उदयज्ज्ञानावुलूकस्य च,
प्रेयस्याः प्रियविप्रयोग उपलास्वादे [5]हरेर्वा यथा ।
तद्वत्तस्य नितान्तनिर्वृतिरसा-[6]ऽऽध्मातान्तरत्वाद् ध्रुवं,
माधुर्योपगतेऽपि भोज्यनिवहे नाऽऽसीद् रुचिः सर्वथा ॥३५॥

सङ्ग्रोज्येन जिगीषुणेव विभुना स्वस्याश्रये शाश्वते,
संवीक्ष्येव कदन्नवैरिणमधिष्ठातुं तमुद्योगिनम् ।
तन्निर्वासनसोद्यमेन गणनाऽतिक्रान्तबाधाभरः,
प्रारेभे जठरे मुनेर्न हृदयं तेनाऽप्यकम्प्यस्य तु ॥३६॥

विद्धे वायसकीलकेन कलिते वोज्ज्वालदावानले-
नाघ्रातेत्र सुवृश्चिकेन [7]शमनेनेव क्षुधा लोलिता[8] ।
शश्वद्वाक्यपथातिगातिबहुलाबाधाभराक्रान्तिभाक्,
दृष्टिस्तस्य तथापि नाद्यसमितिं संध्वंसते स्म क्षणम् ॥३७॥

सप्तस्वेषु गदेषु शेषपुरुष ह्येकोऽपि हन्तुं क्षमः,
सम्भूता[9] अपि त त्विमे न दुधुवुः पञ्चास्यमेणा इव ।
नात्युग्रा अपि सद्ग्रहा निजकरैर्मथ्नन्ति नाथं रुचां,
नो वा पूर्णसरित्प्रवाहनिवहाः संक्षोभयन्त्यम्बुधिम् ॥३८॥

---

१. पटीयान् । २. पाशोऽपि कंठाबाधादिकारित्वादिगुणो भवति । ३. व्यावृत्यबाह्यविषयेन्द्रियमनसः स्वात्मैकलीनत्वम् । ४. अपनयन् । ५. सिंहस्य । ६. पूरित । ७. यमेन । ८. प्रमर्दिता । ९. मिलिता ।

ज्ञानसत्त्वनिधिराचकांक्ष[1] स, व्याधिशेषसमुपागमं तदा ।
यन्नवेदनमृते स्वदुष्कृतस्याऽस्ति मुक्तिरिति वास्तवी श्रुतिः ॥३९॥
प्रागिवोग्रतप आदधे च स, [2]व्याधितोऽप्यतितरामखिन्नधीः ।
दैन्यमन्यवदुपैति सात्त्विको, नैव जातु विधुरे महत्यपि ॥४०॥
इत्थमस्य सहतो महारुजः, शुद्धभावशितखड्गधारया ।
दुष्कृतावनिरुहान्निकृतन्ततो, जज्ञिरेऽतिशयकल्पपादपाः ॥४१॥
ते च चारुमहिमानमुद्ययु-र्व्याधिसप्तकजयोद्भवा इव ।
सप्त तावदुपकल्पिताऽतुल-श्रीफलास्त्रिजगति प्रथामिताः ॥४२॥
स्पर्शौषधिर्मूत्रविडोषधीश्च, श्लेष्मामलं विप्रुडथ प्रतीकाः ।
आसन्निमेऽस्यौषधिभेदरूपाः, [3]संभिन्नसर्वश्रुतिता[4] च चित्रा ॥४३॥
अङ्गतद्भवमलादयोऽप्ययुः, सौरभं सकलरोगहारिताम् ।
तस्य किं हि न फलन्ति सत्तपांस्यादरेण विहितानि सत्तमैः ॥४४॥
आमर्षौषधिरस्य कामदुघया संस्पर्द्धमानाऽभवत् ,
पाणिस्पर्शनमात्रकेऽपि हि यतः सम्पद्यते कुष्ठिनाम् ।
उच्छिन्नामयसम्पदुज्ज्वलमहासौभाग्यभाग्यश्रिया ,
सार्द्धं रूपरमाऽसमा कनकरुक्कान्ते वपुर्मन्दिरे ॥४५॥
विण्मूत्रादिमलान्यसौरभमपास्याऽस्य द्विरेफाङ्गना -
नन्दित्वं दधति प्रबुद्धबकुलोद्गन्धित्वतोयान्यलम् ।
चक्रुः स्पर्शवशाद् दृढार्शसमहाकण्डूतिपीडाभृतो -
ऽप्युल्लाघानिति तान्यनाप्नुयुरहो साम्यं कथं पङ्कजैः ॥४६॥
श्लेष्माऽप्यस्य सरुग्नराङ्गलगनेऽप्यासूत्रयन् कानकीं ,
लक्ष्मीं [5]तद्वरधातुसङ्ग्रहमृतेऽभूद्धातुवादी नवः ।
किं चांशेन शिवालयं ह्यनुचकाराऽऽरोग्यमापादय -
न्नाजन्मा पुनरुद्भवेन महिमाम्भोधिः स किं वर्ण्यताम् ॥४७॥

---

१. अभिललाष । २. पीडितः । ३. परस्परमिश्र । ४. श्रुतिशब्देन श्रोत्रेन्द्रिय उपलक्ष्यते । ५. कनक ।

तस्याङ्गे बहिरुल्वणो मलभरः प्रस्वेदतः प्रस्रव -
न्नन्तः प्रौढसुरूढसंयमरसेनाऽऽप्लावितः पापराट् ।
नूनं तेन निजानुषङ्गवशतः प्रापय्य पूतात्मनां,
चक्रे स्पर्शनिवर्त्तिताखिलमहारोगः सदा रोगिणाम् ॥४८॥

विप्रुट् तस्य महात्मनो नववयःस्तम्भं बलिध्वंसनं,
सर्वाङ्गीणविलिप्तितः शुचिसुधेवाधान्नृणां रुग्विणाम् ।
चिन्तारत्नतुलाजुषां त्रिजगतोऽप्याश्चर्यचर्यापुषां,
वस्तूनां महिमा 'विधेरपि हि न प्रातीतिकः'[1] कश्चन[2] ॥४९॥

निःशेषा अपि तस्य केशकरजाद्याः सत्प्रतोकाः कथा -
तीतं गन्धमसंख्यरोगदमने चाऽऽपुः परं पाटवम् ।
सूर्यस्याखिलदिक्समूहविलसद्द्योतस्तमस्काण्डहा -
प्रोद्यन्नद्भुतविश्रुतैकमहिमा न ह्येक एवांऽशुकः ॥५०॥

भूयांसस्तेन नादा युगपदुपनताः श्रोत्रवद्वीक्षणाद्यै -
रप्यक्षैर्गन्धमुख्या अपि च जगृहिरे तैरशेषैरशेषाः ।
संभिन्नस्रोतसेति प्रतिकलममलज्ञानिनेवेद्धधाम्ना,
शक्तिः कस्येतरस्येत्यनुपमतपसोऽप्यन्यधर्मस्थितस्य ॥५१॥

इत्थ सप्त सुलब्धयो निरुपमं लब्ध्वा चिराद्दुल्लभं,
तं कान्ता इव सन्ततं समपुषस्तोषादनन्यस्पृहाः ।
ये चाशीविषकोष्ठबुद्धिविभुताद्याः सम्पदोऽस्याऽभव -
स्तासां कः कलयेत् प्रमां सुनिपुणोऽप्यब्धेर्मणीनामिव ॥५२॥

लब्धिसम्पदतिवर्द्धनेऽप्यसौ, तस्य शुद्धपरिणामभूपतिः ।
नारराम सुकृतान्तरार्जनादुद्गतेच्छ इव विश्वभूतये ॥५३॥

उग्रघोरमहदादिसंज्ञितान्याचचार स तपांस्यनारतम् ।
तानि यानि घनकर्मकानने, मत्तदन्तिकरदन्ततां दधुः ॥५४॥

---

१. विधातुः । २. प्रतीतिविषयः । ३. लोकोत्तरः ।

तं समुत्सुकमतिं च निर्वृतौ, व्याधयस्तु नितरामपीपिडन् ।
इन्द्रदत्तनृपतेः सुतं यथा, शेषसूनव उदग्रमत्सराः ।।५५।।

सर्वथाङ्गपरिकर्मवर्जने, रुक्परीषहजये च जातुचित् ।
स्वःपतिः सुमुनिसंकथान्तरे, तं शशंस मुनिचक्रवर्तिनम् ।।५६।।

अप्यमर्त्यशिखरी प्रकम्पते, भानुमानुदयतेऽपराचले ।
अम्बुराशिरवगाहते नभः, क्षोणिपीठमपि वाऽऽवर्तते ।।५७।।

दैवतो यदि तथापि तन्मनो, नान्यथा स्वनियमाद् विधीयते ।
देवदानवशतैः स नायकै-रप्यचिन्त्यबलवीर्यशालिभिः ।।५८।।

युग्मम्

भूय एव विबुधौ तथैव तावेयतुर्निजविभोः पराङ्मुखौ ।
वाक्यतः सुमधुरात् प्रियादपि, क्षीरतो ज्वरितबालकाविव ।।५९।।

वृद्धसच्छबरवैद्यरूपिणौ, तं महामुनिमुपेत्य तौ सुरौ ।
सादरं रचितहस्तकुड्मला-वूचतुश्चतुरवाक्प्रपञ्चनौ ।।६०।।

त्वद्वपुष्यसमरोगसम्पदो, यातना तु कृपयाऽऽवयोर्हृदि ।
अस्तमेति सविता हि बाध्यते, मानसं[1] तु विरहेण कोकयाः ।।६१।।

तत्कृपालुवर जल्प्यतां हि तं, तूर्णमात्मपरयोस्ततोऽभ्यधात् ।
सोऽस्थिरेण वपुषा चिरच्युते, वाऽहितेन पटुनाऽपि किं फलम् ।।६२।।

छन्दसां प्रणववद्व्रतश्रियां, कामिनीव जगतामिवाऽऽत्मभूः ।
इन्दुकान्तयशसा यथा न यो, मूलमेतदखिलार्थसम्पदाम् ।।६३।।

अस्य तेन वपुषो महादरात्, पोषणं परमबन्धुनीतितः ।
कार्यमार्यचरित त्वदग्रतः, प्रोच्यते किमिति तौ समूचतुः ।।६४।।

युग्मम्

प्राह साधुरतिपोषणेऽपि यद्, यात्यमुत्र पदमात्रमप्यमा ।
नात्मना प्रकटदुर्जनाकृतेस्तस्य कैव परमेह बन्धुता ।।६५।।

---

१. चित्तम् ।

व्याधयोऽपि मम कर्मसङ्करे, सत्सहायपदवीं[1] दधत्यमो ।
तत् त्यजामि विधुरे कथं हि तांस्तानुपेत्य समुपस्थितान् स्वयम् ॥६६॥
तौ पुनः प्रति जजल्पतुर्मुने !, धर्मवैद्यकपरौ लभेवहि ।
त्वां सकष्टमभिवीक्ष्य निर्वृतिं, सज्जनप्रकृतिभावतः कथम् ॥६७॥
क्षीयतां प्रकृतिरीदृशो सतां, यत्सदापि परदुःखदुःखिताः ।
धिग् विधिं तमपि येन निर्मितास्ते स्वकार्यविमुखाः शशाङ्कवत् ॥६८॥
तत्प्रसद्य वितर प्रतिक्रियादेशमाशु तनुवस्तनुं तव ।
येन तप्ततपनीयहासिनी, मा भवं पुनरभावि रुग्व्यथाम् ॥६९॥
तौ समूचतुरिति प्रतिक्षणं, यावदाशु स मुनिर्निजांगुलिम् ।
श्लेष्मणैव चकृवान्निघृष्यतां, तावदिद्धकनकद्युतिद्विषाम् ॥७०॥
नूनमंगुलिमदर्शयत्तयोर्भेषदीप्ररुचिमोज आत्मनः ।
किन्तु तीव्रमुद्भासयन्मुनिस्तद्विपर्ययतमोपनुत्तये ॥७१॥
बाह्यरुग्विटविलुण्टने पटुर्हृट्टयोषिदिव मे प्रगल्भते ।
शक्तिरेव सुतपःप्रभावजा, तत्र चाङ्ग युवयोः किमर्थनम् ॥७२॥
सत्यमेव भिषजौ युवां यदि, क्षप्यतां मम तदान्तरो गदः ।
किं हि [2]जम्बुकवधे यशो हरेरित्यभाषत मुनिर्विरक्तधीः ॥७३॥
किं भवादपि गदः परः परः, कोऽपि यज्जयितया प्रतन्यते ।
वैद्यतात्मन उरुर्न भूधरो, यत्सुराधिपमहीधरादपि ॥७४॥
शक्तिरस्ति यदि वां प्रयत्यतां, सर्वथा तदुपशान्तये ततः ।
शेपसाधन[3]-पथातिगोद्यमी,[4] शस्यते हि रविवत्तमोपहः ॥७५॥
दार्ढ्यमेवमवगम्य चेतसस्तस्य कायपरिकर्मवर्जने ।
पर्वतादपि परं परीक्षकावोज्झतां तदपवर्तनग्रहम् ॥७६॥
प्राहतुश्च भिषजौ भवाऽऽमयध्वंसने न चतुरत्वमावयोः ।
किं भवेद् द्विरदकुम्भपाटने, पाटवप्रकटनं क्वचित् कपेः ॥७७॥

१. प्रियम् । २. शृगाल । ३. कारण । ४. प्रतिक्रान्ते उद्यमी ।

भ्रान्तरामयहतौ तु धावते, शक्तिरप्रतिहता तवैव हि ।
शैलपक्षलवने प्रगल्भताऽन्यस्य कस्य भवति स्वरुं[1] विना ।।७८।।

श्रीमुनीन्द्रचरितेन्दुधामभिः, सप्रमोदहृदयाऽऽर्द्र[2]-कैरवौ ।
स्वं प्रकाश्य वपुरुल्लसद्द्युति-त्रैदश नुनुवतुर्मुदाञ्चितौ ।।७९।।

येनाऽसंख्येयसख्येष्वरिनिकरमवस्कन्द्य सद्यः करीन्द्र-
व्यूहाभं स्वीकृता श्रीमृगपतियशसा तस्य मुक्ताफलाभा ।
तामाधायोपभोग्यां पणयुवतिमिवाशेषपादातजात-
स्योच्चैः साम्राज्यलक्ष्मीर्निरुपधि बुभुजे स्वात्मनाऽनन्यतुल्या ।।८० ।

दत्वा हस्तं गले प्रागुपचितममतादासिकायाः सरोष,
सर्वस्वत्यागरागात्तदनुगलिरिवाऽऽचक्रमे शोलभारैः ।
बध्वा सद्धयानपाशैरपदयमधुना रुक्प्रतीकारहान्या,
दध्वसे येन देहेऽप्यकृतपरिपुषा सा महावैरिणीव ।।८१।।

सच्चारित्रस्य भारः शुचिहृदयतुलारोपितो वर्द्धमानः,
